MASTERS OF ARTS
IN
SANSKRIT

VEDIC LITERATURE–SAMHITA TEXT

Paper-12

UTKAL UNIVERSITY
NAAC ACCREDITED A+

UTKAL UNIVERSITY

VANI VIHAR, BHUBANESWAR, ODISHA-751004

Name of the Study Material: Systems Language & Literature

Author Name: ....

Edition: 2019

Copyright © Laxmi Publications Pvt Ltd.

No part of this publication which is material protected by this copyright notice may be reproduced or transmitted or utilized or stored in any form or by any means now known or hereinafter invented, electronic, digital or mechanical, including photocopying, scanning, recording or by any information storage or retrieval system, without prior permission from the publisher.

Information contained in this book has been published by Laxmi Publications Pvt Ltd and has been obtained by its authors from sources believed to be reliable and are correct to the best of their knowledge. However, the publisher and its author shall in no event be liable for any errors, omissions or damages arising out of use of this information and specially disclaim and implied warranties or merchantability or fitness for any particular use.

Printed and Published by:
Laxmi Publications Pvt Ltd.
113, Golden House
Daryaganj, New Delhi-110 002.
Tel: 011-43532500, E-mail: info@laxmipublications.com

For:
Directorate of Distance & Continuing Education
Utkal University, Vaniihar, Bhunabeswar-7, Odisha
Email: helpline@ddceutkal.ac.in
Website: www.ddceutkal.ac.in

Book Code - C–
Typeset at: Friends Enterprises, Delhi Printed at:

DIRECTORATE OF DISTANCE & CONTINUING EDUCATION
UTKAL UNIVERSITY : VANI VIHAR
BHUBANESWAR-751007

From the Director's Desk

The Directorate of Distance & Continuing Education, originally established as the University Evening College way back in 1962 has travelled a long way in the last 52 years. 'EDUCATION FOR ALL' is our motto. Increasingly the Open and Distance Learning institutions are aspiring to provide education for anyone, anytime and anywhere. DDCE, Utkal University has been constantly striving to rise up to the challenges of Open Distance Learning system. Nearly one lakh students have passed through the portals of this great temple of learning. We may not have numerous great tales of outstanding academic achievements but we have great tales of success in life, of recovering lost opportunities, tremendous satisfaction in life, turning points in career and those who feel that without us they would not be where they are today. There are also flashes when our students figure in best ten in their honours subjects. Our students must be free from despair and negative attitude. They must be enthusiastic, full of energy and confident of their future. To meet the needs of quality enhancement and to address the quality concerns of our stake holders over the years, we are switching over to self instructional material printed courseware. We are sure that students would go beyond the course ware provided by us. We are aware that most of you are working and have also family responsibility. Please remember that only a busy person has time for everything and a lazy person has none. We are sure, that you will be able to chalk out a well planned programme to study the courseware. By choosing to pursue a course in distance mode, you have made a commitment for self improvement and acquiring higher educational qualification. You should rise up to your commitment. Every student must go beyond the standard books and self instructional course material. You should read number of books and use ICT learning resources like the internet, television and radio programmes etc. As only limited number of classes will be held, a student should come to the personal contact programme well prepared. The PCP should be used for clarification of doubt and counselling. This can only happen if you read the course material before PCP. You can always mail your feedback on the course ware to us. It is very important that one should discuss the contents of the course materials with other fellow learners.

We wish you happy reading.

DIRECTOR

Paper-12. Vedic Literature–Samhita Text

Unit-I Hymns from the Rgveda with Sayana's Commentary-Surya I.125, Usas- III.61, Hiranyagarbha-X.121 Pururava-Urvashi- Samvada X.95

Unit-II Hymns from the Shukla-Yajurveda (Vajasaneyi-samhita) Shatarudriya- XVI.1-20 Yogaksema and Prarthana-mantras- XXII.22,33 Sarvamedha-XXXII. 1-16 Pravargya'gnika'shvamedhopanisahad XXXVI. 1-24

Unit-III Hymns from the Atharvaveda Rastrabhivardhanam- I. 29 Prthivi XII.21-63, Kala XIX.54

Unit-IV Hymns from the Trayi (from three Vedas) - 'Shrisukta, Rgveda khilasukta- II.6 Jnanasukta, Rgveda-X.71 Apratiratha-sukta, Shukla-yajurveda XVII.33-44 Madhuvidya, Atharvaveda I.34

Unit-V Short notes and word-meanings from the texts of the above units

Books Recommended:

1. New Vedic Selection Part-I and II, Eds. Telang and Chubey, Bharatiyavidya Prakashan, Varanasi, 1973
2. Yajurvedasamhita Ed. Jagadishlal Shastri, Motilal Banarsidass, Delhi, 1999
3. Atharvaveda with Sayana's Comm. (1-5 Vols.), VVRI, Hoshiarpur, Punjab
4. Vaidika Sahitya aur Samskrti, Baladev Upadhyay, Sharada Samsthan, 37 B. Rabindrapuri, Durgakunda, Varanasi
5. Vaidika-vanmayasyetihasah (in Sans), Acharya Jagadish Mishra, Chaukhamba Surabharati Prakashan, Varanasi
6. Hymns of the Atharvaveda, (Ed. and Trans.) M. Bloomfield, Motilal Banarsidass, 1954
7. Hymns of the Atharvaveda, (Ed. and Trans.) W.D Whitney, Motilal Banarsidass
8. The Hymns of the Atharvaveda, (Ed. and Trans.) R.T.H. Griffith, Motilal Banarsidass, New Delhi, 1954
9. Rksukta-vaijayanit, H.D. Velankar, Vaidika Shamshodhan Mandala, Pune, 1965
10. Rksuktashati, H.D. Velankar, Bharatiya Vidyabhavan, Mumbai, 1972

अध्याय : १

ऋग्वेदभाष्ये

१.० उद्देश्यानि

अस्य पाठस्य अध्ययनेन भवान् -

वेदे विद्यमानस्य दार्शनिकसूक्तस्य परिचयं प्राप्नुयात्।

हिरण्यगर्भसूक्तस्य मूलमन्त्रान् सस्वरं ज्ञास्यति।

१.१ प्रस्तावना

विदितमेवेदं यद् विश्वस्य सर्वासु प्राचीनसभ्यतासु प्राचीनसंस्कृतिषु च भारतीयसंस्कृते: प्रमुखं स्थानं विद्यते। भारतीयसंस्कृति: तावत् कालेन वर्तते यावत् अन्यासां सभ्यतानां प्रादुर्भावो नासीदिति समेषां विचारकाणां सम्मति:। तत्र भारतीयसंस्कृति: कियत्प्राचीना इति विषये विदुषां वैमत्यमस्ति।

भारतीयसभ्यता कियत्प्रचीनेति विषये न शक्यते ज्ञातुं तस्या: सभ्यताया: प्रमुखशास्त्रेभ्य: ऋते। अत: भारतीयसंस्कृतिसभ्यतयो: सम्यग्ज्ञानाय तानि शास्त्राणि आवश्यकानि। तेषु शास्त्रेषु प्रमुखं शास्त्रं वेद: अस्ति। वेद एव सृष्टे: प्रथमा वाणी।

१.२ वेदशब्दस्यार्थ:

वेदशब्दस्यार्थ:-

वेद: केन निर्मित:, कस्मै उपदिष्ट: इत्यत्र विविधा विचारा: सन्ति। मीमांसकानां मते ‘अपौरुषेयं वाक्यं वेद:‘‘। वेद: परमेश्वरस्य श्वासरूपा:, उक्तमपि ‘‘यस्य नि:श्वसितं वेदा:’’ इति। अत: एतन्न मन्तव्यं यत् सृष्टेरनन्तरं वेदानां रचना जाता इति। अपितु वेद-ानुसारी सृष्टि: सृष्टिकर्त्र्या कृता। वेदो हि न कस्यापि रचना, मानवेभ्यो ज्ञानप्रदानाय एव वेदा: वर्तन्ते। गुरुमुखोच्चारणानूच्चारणपरंपरया हि वेदा: इदानीं पर्यन्तं रक्षिता: सन्ति। अत: श्रुतपरम्परया वेदस्य अपरं नाम श्रुतिरित्यपि वर्तते।

वेदस्य लक्षणम्-

वेदो हि धर्ममूलम् अस्ति। मनुना उक्तम्, ‘‘वेदोऽखिलो धर्ममूलम्।’ सायणाचार्येण न्वेदस्य लक्षणं कृतम् - ‘‘इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं यो ग्रंथो वेदयति

स वेदः' इति। वेदशब्दो हि विद् ज्ञाने, विद्लृ लाभे, विद् सत्तायां विद् विचारणे इति चतुर्भिः धातुभिः व्युत्पाद्यते। आधुनिकभाष्यकारेण श्रीदयानंदस्वामिना अपि स्वकीये ऋग्वेदादिभाष्यभूमिकायां ''विदन्ति जानन्ति, विद्यन्ते भवन्ति, विदन्ति सर्वा सत्यविद्या यैः येषु वा स वेद' इति कथितम्। वेदः अपौरुषस्य नित्यः कालातीतश्च इति निश्चेतुं शक्यते।

वेदपदत्वेन तु। 1. संहिता, 2. ब्राह्मणम्, 3. आरण्यकम्, 4. उपनिषद् इति चतुर्णां ग्रंथानां बोधो भवति। चत्वारो वेदाः सन्ति, ते च - 1. ऋग्वेदः, 2. यजुर्वेदः, 3. सामवेदः, 4. अथर्ववेदश्च। महर्षिणा कात्यायनेन कथितम् - ''मंत्रब्राह्मणयोर्वेदनामधेयम्''। वेदाध्ययनविषये महाभाष्ये कथितम् - ''ब्राह्मणेन निष्कारणो धर्मः षड्अंगो वेदोऽध्येयो ज्ञेयश्च''। वेदस्य महत्वं अस्मिन् श्लोके वर्णितम् -

प्रत्यक्षेणानुमित्या वा यस्तूपायो न बुध्यते।

एनं विदन्ति वेदेन तस्माद्वेदस्य वेदता।।

१.३ ऋग्वेदस्य परिचयः-

ऋचां समूहः ऋग्वेदः। सृष्टयुत्पतिकाले वेदः एकः एव आसीत्। भगवता कृष्णद्वैपायनव्यासेन द्वापरयुगस्य अंते मानवबुद्धिसामर्थ्यम् अध्ययनसौकर्यं च अभिलक्ष्य एकस्य एव वेदस्य ऋग्यजुःसामाथर्वरूपेण चत्वारो विभागाः कृताः। ऋग्वेदे मण्डलक्रमेण दशमण्डलानि वर्तन्ते, 1028 सूक्तानि च। अष्टकक्रमेण 8 अष्टकाः, 64 अध्यायाः सन्ति। प्रत्येकस्मिन् अष्टके अष्टौ अध्यायाः सन्ति। चरणव्यूहानुसारम् ऋग्वेदे 10,580 मंत्राः सन्ति।

ऋग्वेदस्य शाखाः-

ऋग्वेदस्य 21 शाखाः आसन्। परमद्य न सर्वाः उपलभ्यन्ते। अद्य ऋग्वेदस्य चतस्रः शाखाः प्राप्यन्ते, तासां नामानि-

1. शाकलशाखा।
2. वाष्कलशाखा।
3. आश्वलायनशाखा।
4. शांखायनशाखा।

ऋग्वेदभाष्यकाराणां परिचयः-

वेदेषु निहितानां तत्वानां ज्ञानार्थं मंत्राणां व्याख्यानं कर्तुं निरुक्तदिशाशास्त्राणां रचना

जाता। वेदविहितविषयप्रतिपादनार्थं वेदभाष्याणां रचना विविधैः विद्वद्भिः कृता।

स्कंदस्वामी-

ऋग्वेदसंहितायाः सर्वप्रथमः भाष्यकारः स्कंदस्वामी गुजरातप्रदेशस्य वल्लभी-वास्तव्य आसीत्। अस्य पितुर्नाम भर्तृध्रुवः इति आसीत्। स्कंदस्वामी शतपथब्राह्मणस्य भाष्यकारस्य हरिस्वामिनः गुरुः आसीत्। हरिस्वामिनो भाष्यस्य रचनाकालः 638 ई (अष्टत्रिंशदधिकषट्शततमः खीष्टाब्दः) इति मन्यते। अतः स्कंदस्वामी तत्पूर्ववर्ती आसीत् इति वक्तुं शक्यते।

अस्मिन् भाष्ये ऋग्वेदस्य प्रत्येकस्य सूक्तस्यादौ सूक्तस्य ऋषेः देवतायाश्च उल्लेखो दृश्यते। निरुक्तादीनाम् उद्धरणमपि अत्र समुपलभ्यते। भाषा सरला अस्ति। स्कंदस्वामिनो भाष्यं चतुर्थाष्टकं यावद् अस्ति।

वेंकटमाधवः-

ऋक्संहितायां वेंकटमाधवस्य संपूर्णं भाष्यं प्राप्यते। अस्य पितुर्नाम वेंकटाचार्यः, मातामहस्य नाम भवगोलः, मातुश्च नाम सुंदरी आसीत्। अस्य अनुजस्य नाम संकर्षणः आसीत्। अयं चोलदेशवास्तव्यः आसीत्। अस्य समयः 1300 विक्रमसंवत्सरात् पूर्वमिति विद्वद्भिः मन्यन्ते।

आनंदतीर्थः-

द्वैतसिद्धांतप्रवर्तकः 'मध्वाचार्य' एव 'आनंदतीर्थ' इति नाम्ना परिचितः अस्ति। अस्य आविर्भावकालो वि.स. 1335 मन्यते। अयमनेकान् ग्रंथान् रचयामास। ऋग्वेदस्य प्रथममंडलान्तर्गतानां केषांचिन्मंत्राणाम् आनंदतीर्थस्य व्याख्यानं लभ्यते। आनंदतीर्थो वैष्णवः आसीत् तन्मते सर्वे वेदाः सर्वाणि शास्त्राणि च पूर्णपुरुषस्य नारायणस्य प्रतिपादनं कुर्वन्ति।

सायणः-

अस्य वर्णनम् अग्रे भविष्यति।

दयानंदसरस्वती

गुजरातप्रदेशान्तर्गतटंकानगरे 1824 खीष्टाशब्दे लब्धजन्मा सामवेदी, औदीच्यब्राह्मणः दयानंदसरस्वती प्रसिद्धभाष्यकारेषु अन्यतमः। अस्य पितुर्नाम कर्षणजी-लालजी इति आसीत्। मातुर्नाम यशोदाबाई इति आसीत्। आदौ अस्य नाम 'मूलशंकरः' इति आसीत्। अयं विरजानंदयतीश्वरस्य शिष्यो भूत्वा संन्यासदीक्षां स्वीकृत्य दयान-दस्वामीति नामावाप। अध्ययनसमाप्त्यनन्तरं वेदविद्यायाः प्रचारप्रसारार्थं गुरुणा उपदिष्टः

1875 तमे खीष्टाब्दे अप्रैलमासस्य 12 दिनांके दयानंदस्वामी आर्यसमाजस्य प्रतिष्ठां कृतवान्। वेदभाष्यस्य क्रमे तेन लिखितम्-

संस्कृतप्राकृताभ्यां यद् भाषाभ्यामन्वितं शुभम्।

मंत्रार्थवर्णनं चात्र क्रियते कामधुङ्. मया।।

स्वामिनां भाष्याणि संस्कृतप्राकृतभाषाभ्यां रचितानि सन्ति। एतेषु भाष्येषु मंत्राणामर्था: वर्तन्ते। एषां भाष्येषु एकेश्वरवादस्य प्रतिष्ठा दृश्यते। ऋग्वेदभाष्यभूमिकाया: समापने ग्रंथसंकेतविषयरूपेण एभि: उक्तम्-

मन्त्रार्थभूमिका ह्यत्र मंत्रस्तस्य पदानि च।

पदार्थान्वयभावार्था: क्रमाद् बोध्या विचक्षणै:।।

दयानन्दस्य भाष्येषु मंत्र:, मन्त्रस्य पदपरिचय:, पदानाम् अर्था:, अन्वय:, भावार्था: इत्येते विषया: क्रमेण वर्णिता: सन्ति। ऋग्वेदस्य सप्तममण्डलान्तर्गतद्वितीयसूक्तस्य द्वितीयमंत्रं यावत् एव दयानन्देन भाष्यं रचितम्। तत: अयं 1883 खीष्टाब्दे अक्टूबरमासस्य 30 तमे दिनांके दीपावल्यां निर्वाणमवाप्य इहलीलां त्यक्तवान्।

१.४ ऋग्वेदभाष्यभूमिकाया:

परिचय

सायणाचार्येण प्रत्येकस्य वेदभाष्यारम्भे वैदुष्यपूर्णा भूमिका लिखिता वर्तते। तत्र भूमिकासु ऋग्वेदभाष्यभूमिका सर्वाधिका उपयोगिनी वर्तते। तत्र वेदेषु ऋग्वेदस्य अभ्यर्हितत्वम्, यजुर्वेदस्य प्रथमव्याख्यानस्य औचित्यम्, वेदास्तित्वविचार:, मंत्रभागस्य प्रामाण्यम्, मंत्रेषु अर्थबोधकता अस्ति न वा इत्यस्य विचार:, विधिभागस्य प्रामाण्यविचार:, अर्थवादभागस्य प्रामाण्यविचार:, वेदापौरुषेयत्वम्, मंत्रब्राह्मणयो: लक्षणम्, ऋक्सामयजुषां लक्षणविचार:, वेदाध्ययनविचार:, वेदाध्ययनस्य अदृष्टार्थत्वम् दृष्टार्थत्वं च, अध्ययनविधे: अर्थावबोधपर्यन्तता अध्ययनविधे: अक्षरप्राप्तिपर्यन्तता, वेदार्थज्ञानस्य प्रशंसा अज्ञाननिन्दा च, वेदस्य अनुबंधचतुष्टयम्, वेदस्य शिक्षादीनि षडअंगानि इत्यादयो विषया: ऋग्वेदभाष्यभूमिकायां प्रतिपादिता: सन्ति।

सायणाचार्यस्य परिचय

वेदभाष्यकारेषु सायणाचार्यस्य स्थानं सर्वोपरि विद्यते। चतुर्षु वेदेषु अस्य भाष्यं समुपलभ्यते। अयं महानुभाव: बुक्कमहीपते: आज्ञया तथा च स्वभ्रातु: माधवाचार्यस्य प्रेरणया वेदभाष्यरचनायां प्रवृत्त: अभवत्। तदेवोक्तं तैत्तिरीयसंहिताया: भाष्योपक्रमणिकायाम्-

यत्कटाक्षेण तद्रूपं दधद् बुक्कमहीपतिः।

आदिशन्माधवाचार्यं वेदार्थस्य प्रकाशने।।

स प्राह नृपतिं राजन्! सायणार्यो ममानुजः।

सर्वं वेत्येष वेदानां व्याख्यातृत्वे नियुज्यताम्।।

इत्युक्तो माधवार्येण वीरो बुक्कमहीपतिः।

अन्वशात् सायणाचार्यं वेदार्थस्य प्रकाशने।।

ये पूर्वोत्तरमीमांसे ते व्याख्यायातिसंग्रहात्।

कृपालुः सायणाचार्यो वेदार्थं वक्तुमुद्यतः।।

सायणाचार्यस्य पितुर्नाम 'मायणो' मातुर्नाम 'श्रीमती' आसीत्। सः गोत्रेण भारद्वाजो बभूव। कृष्णयजुर्वेदस्य तैत्तिरीयशाखाध्यायी बौधायनश्रौतसूत्री च आसीत्। तस्य द्वौ भ्रातरौ वेदशास्त्रसंपन्नौ आस्ताम्। तयोः ज्यायान् माधवाचार्यः विजयनगरसाम्राज्यसंस्थापकानां महाराजाधिकराजहरिहराणां मंत्रिमूर्धन्यः आसीत्। कनीयान् भोगनाथः संगमनरपतेः नर्मसचिवः कमनीयकाव्यकलाकुशलः आसीत्। सायणाचार्यस्य त्रयः पुत्रा अभवन्, कम्पणो मायणः शिंगणश्च। कम्पणः संगीतकलासंपन्न आसीत्। मायणः गद्यपद्यरचनापटुः आसीत्। शिंगणश्च वेदविद्यासंपन्नः विकृतिपाठी चासीत्। सायणाचार्यः आंध्रदेशीयः आसीत्।

सायणाचार्यस्य समयः-

सायणाचार्यकृतवेदभाष्याणां परिशीलनेन तस्य समयस्य निर्धारणं कर्तुं शक्यते। सायणाचार्यः बुक्कमहीपतेः (1364 ई तः 1378 ई यावत्) राजसभायामासीत्तथा तदादेशेनैव भाष्यं लिखितुं प्रयत्नं चकार इति ज्ञायते। सायणाचार्यकृतऋग्वेदभाष्यपुष्पिकायाम् एवं लिखितं दृश्यते - ''इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कसाम्राज्यधुरन्धरेण सायणाचार्येण विरचिते माधवीयवेदार्थप्रकाशे ऋक्संहिताभाष्ये प्रथमाष्टके प्रथमोऽध्यायः'' इति। अतो बुक्कमहीपतेः काले सायणाचार्यः आसीदिति निश्चेतुं शक्यते।

सायणस्य गुरवः-

सायणाचार्यस्य त्रयो गुरवः आसन्। प्रथमो विद्यातीर्थः, द्वितीयो भारतीतीर्थः, तृतीयः श्रीकंठः। एतेषु विद्यातीर्थं तपस्वी यतिराजः परमात्मतीर्थानां शिष्यश्च बभूव। विद्यावैभवप्रभावेणैव विद्यातीर्थं महेश्वरस्य अवतारत्वेन सायणाचार्यः वर्णयति सर्वेषां भाष्याणामुपक्रमे-

यस्य नि:श्वसितं वेदा यो वेदेभ्योऽखिलं जगत्।

निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम्।।

भारतीतीर्थ: श्रृंगेरीपीठस्थो गुरु: आसीत्। कांचीस्थशासनेपत्रे सायण: श्रीकंठमात्मनो गुरुं निर्दिशति।

वेदभाष्याणां पौर्वापर्यम्-

सायणाचार्य: कृष्णयजुर्वेदीयतैत्तिरीयशाखाध्यायी आसीत्। अत: सायणाचार्येण तैत्तिरीयसंहिताया: आदौ व्याख्यानं कृतम्। ऋग्वेदस्य प्राथम्यं सर्ववेदाध्ययनतत्पारायणब्रह्मयज्ञजपादौ अस्ति। ऋग्वेदस्य अभ्यर्हितत्वमस्ति एव। परं च ''यज्ञस्य मात्रां विमिमीत उ त्व:'' (ऋ. 10.71.11), 'यजुर्यजते:' (नि.7.3) इति यास्ककृतनिर्वचनेन च यजुर्वेदस्य यागनिष्पादकत्वं विद्यते। यजुर्वेदस्य प्रथमव्याख्याने को हेतु:? इत्यत्र स्वयमेव ऋग्वेदभाष्यभूमिकायां सायणाचार्येण लिखितम् - ''एवं सति अध्वर्युसंबन्धिनि यजुर्वेदे निष्पन्नं यज्ञशरीरम् उपजीव्य तदपेक्षितौ स्तोत्रशस्त्ररूपौ अवयवौ इतरेण वेदद्वयेन पूर्येते इत्युपजीव्यस्य यजुर्वेदस्य प्रथमतो व्याख्यानं युक्तम्। (ऋ.भा.भू.पृ.8)

यजुर्वेद: कृष्णशुक्लभेदेन द्विविध:। कृष्णयजुर्वेदस्य 86 शाखा: आसन्। तैत्तिरीया शाखा सायणाचार्यस्य अभूत्। अत: स्वकीयत्वेन अस्या: शाखाया: व्याख्यानं सायणाचार्येण प्रथमतो विरचितम्। तत: ऋग्वेदस्य व्याख्यानं विरचितम्। यजुर्वेदस्य व्याख्यानानन्तरं ऋग्वेदभाष्यस्य औचित्यं सायणाचार्येण इत्थं निगदितम्-

आध्वर्यवस्य यज्ञेषु प्राधान्याद् व्याकृत: पुरा।

यजुर्वेदोऽथ हौत्रार्थमृग्वेदो व्याकरिष्यते।।

सामानि ऋगश्रितानि भवन्ति। ऋग्व्याख्यानानन्तरं तदाश्रितं सामवेदं सायण: व्याकरोत्। तत: काण्वसंहिताया: भाष्यं कृतम्। अथर्ववेदस्य व्याख्यानं संहिताभाष्याणाम् अंते कृतम्। सायणाचार्येण ब्राह्मणानामपि केषांचित् प्रसिद्धानां व्याख्यानानि निबद्धानि। तै: आरण्यकद्वयस्य व्याख्यानम् अपि कृतम्।

सायणाचार्येण अधोलिखितानां संहितानां व्याख्यानं कृतम्-

(1) तैत्तिरीयसंहिता (कृष्णयजुर्वेदीया)

(2) ऋग्वेदसंहिता

(3) सामवेदसंहिता

(4) काण्वसंहिता (शुक्लयजुर्वेदीया)

(5) अथर्ववेदसंहिता

सायणाचार्येण व्याख्यातानि ब्राह्मणानि-

(1) तैत्तिरीयब्राह्मणम् (कृष्णयजुर्वेदस्य)

(2) ऐतरेयब्राह्मणम् (ऋग्वेदस्य)

(3) ताण्डयमहाब्राह्मणम् अथवा पंचविंशब्राह्मणम् (सामवेदस्य)

(4) षड्विंशब्राह्मणम् (सामवेदस्य)

(5) सामविधानब्राह्मणम् (सामवेदस्य)

(6) आर्षेयब्राह्मणम् (सामवेदस्य)

(7) देवताध्यायब्राह्मणम् (सामवेदस्य)

(8) उपनिषद्ब्राह्मणम् (सामवेदस्य)

(9) संहितोपनिषद्नब्राह्मणम् (सामवेदस्य)

(10) वंशब्राह्मणम् (सामवेदस्य)

(11) शतपथब्राह्मणम् (शुक्लयजुर्वेदस्य)

आरण्यके ययोः व्याख्यानं सायणाचार्येण कृतम्-

(1) तैत्तिरीयारण्यकम् (कृष्णयजुर्वेदस्य)

(2) ऐतरेयारण्यकम् (ऋग्वेदस्य)

सायणाचार्यो बहून् ग्रंथान् रचयामास। ते ग्रंथाः ततच्छास्त्रविषये उपकारकाः सन्ति। ते ग्रंथाः अधोलिखिताः सन्ति-

(1) सुभाषितसुधानिधिः

(2) प्रायश्चित्तसुधानिधिः

(3) अलंकारसुधानिधिः

(4) धातुवृत्तिः

(5) पुरुषार्थसुधानिधिः

(6) आयुर्वेदसुधानिधि:

(7) यज्ञतंत्रसुधानिधि:

वेदानुशीलने सायणाचार्यस्य महत्वम्-

वेदानुशीलने परंपराया: महत्वं वर्तते। निरुक्तकारेण यास्केनापि मंत्रार्थविचारप्रसंगे परंपराया: महत्वं प्रतिपादितम्। ''अयं मंत्रार्थचिन्ताऽभ्यूहोऽपि श्रुतितोऽपि तर्कतो न तु पृथक्त्वेन मंत्रा निर्वक्ताव्या: प्रकरणश एव तु निर्वक्तव्या:। न ह्येषु प्रत्यक्षमस्त्यनृषेरतपसो वा पारोवर्यवित्सु तु खलु वेदितृषु भूयोविद्य: प्रशस्यो भवतीत्युक्तं पुरस्तात्। (नि. 13.11)

अयमाशय: - मंत्राणाम् अर्था: मंत्रार्था: तेषां चिन्ता तस्या: अभ्यूह: वितर्कणा भवति। मंत्रार्थ: वितर्कयितुं शक्यते इति स्पष्टमेव। स च अर्थ: श्रुतित: श्रुतेराधारेण तर्कतो वा अभ्यूहितव्य:। कदाचिदपि मंत्रा: पृथक्त्वेन न निर्वाच्या:। प्रकरणमनुसृत्यैव ते निर्वचनीया:। याज्ञं, दैवतम्, अध्यात्मम्, इतिहासश्चेति चत्वारि प्रकरणानि भवन्ति। मंत्रेषु ऋषिभिन्नस्य अतपसो वा प्रत्यक्षमर्थदर्शनं नास्ति। ये एतेषु उपदेशेन परोवरभावेन मंत्रार्थान् संजानन्ति ते पारोपर्यविद: तेषु बहुश्रुत एव कश्चित् प्रशंसाया: पात्रम्।

ऋग्वेदस्य प्रथमाष्टकस्य व्याख्यानक्रमे सायणाचार्येण व्याकरणप्रक्रियाया: निदर्शनं विस्तरेण कृतम्। पुनरुक्ते: भयाद् अग्रिमेषु अष्टकेषु व्याकरणप्रक्रियाया: विस्तर: न कृत:। आवश्यकानां सूत्राणां यत्र तत्र उल्लेख: कृत:। येषां मंत्राणां निरुक्तकारेण यास्केन व्याख्यानं कृतं, तेषां समेषां मंत्राणां व्याख्यानानि सायणाचार्येण अविकलरूपेण स्वव्याख्यानक्रमे उद्धृतानि।

सायणाचार्येण प्रत्येकस्य महत्वपूर्णस्य शब्दस्य व्युत्पत्ति:, सिद्धि:, स्वराघातस्य वर्णनं पाणिनीयसूत्रै: यत्र तत्र प्रातिशाख्यस्य साहाय्येन च सुष्ठु प्रतिपादितम्। अपि च प्राचीनभाष्यकाराणां स्कंदस्वामिवेंकटमाधवादीनाम् अर्था: प्रसंगानुसारं गृहीता:। कल्पसूत्राणाम् उपयोगो विस्तरेण कृत:। सायणाचार्यो यज्ञविधानेन सम्यक् परिचित आसीत्। कल्पशास्त्रसंबद्धानां तथ्यानां वर्णनं यथावकाशं सर्वत्र कृतम्।

सूक्तव्याख्यानस्य आदौ एव सर्वत्र ऋषिच्छंदोदैवतविनियोगानां वर्णनं सोद्धरणं दत्तम्। येषां मंत्राणां व्याख्यानक्रमे आख्यायिकानां वर्णनम् आवश्यकम् आसीत्, तेषां मंत्रसंबंद्धानाम् आख्यायिकानां सर्वत्र स्वभाष्ये वर्णनं कृतम्। सायणाचार्य: मीमांसक: अपि आसीत् इति ऋग्वेदभाष्यभूमिकाया अध्ययनेन स्पष्टं भवति। ऋग्वेदभाष्यभूमि-कायाम् अध्ययनविधे: वर्णनक्रमे भट्टमतगुरुमतयो: सन्निवेश: पूर्णरूपेण दृश्यते। सर्वेषां वेदभाष्याणामारम्भे सायणाचार्येण उपोद्धातरूपेण वेदस्य पौरुषेयत्वापौरुषेय-सार्थत्वानर्थ-

कत्वादिनिबंधनं कृतम्। वेददानामवश्यं ज्ञातव्या विषयाः निबद्धाः।

वेदार्थतत्वज्ञस्य भूयसी प्रशंसा श्रूयते। अतः वेदार्थज्ञानम् आवश्यकम्। मनुना उक्तम्-

वेदशास्त्रार्थतत्वज्ञो यत्र तत्राश्रमे वसन्।

इहैव लोके तिष्ठन् स ब्रह्मभूयाय कल्पते।।

सेनापत्यं च राज्यं च दंडनेतृत्वमेव च।

सर्वलोकाधिपत्यं च वेदशास्त्रविदर्हति।।

१.५ सायणाचार्यो (भाष्ये)

सायणाचार्यो हित प्रारीप्सितं ग्रंथं निष्प्रत्यूहेन परिसमापयितुं शिष्टाचारतः परिप्राप्तं श्रेय:साधनं मंगलाचरणं करोति। मंगलाचरणस्य परंपरा अतिप्राचीना वर्तते। ग्रंथकाराणाम् अयं विश्वासो यन्मंगलाचरणेन ग्रंथस्य समाप्तिः विघ्नानां निवारणं च भवति। इयं परंपरा न केवलं शिष्टाचारस्य निर्वाहार्थम् आवश्यिकी अपितु मंगलाचरणेन अध्यापकानां छात्राणां च श्रेय:संपादनं भवति। यथाह भगवान् पतंजलिः-

मंगलादीनि मंगलमध्यानि मंगलान्तानि च शास्त्राणि प्रथन्ते वीरपुरुषकाणि भवन्त्यायुष्मत्पुरुषकाणि च अध्येतारश्च सिद्धार्था यथा स्युः। (महाभाष्ये पस्पशाह्निके)

अर्थात् मंगलाचरणयुक्तानि शास्त्राणि वृद्धियुक्तानि भवन्ति, शास्त्राध्येतारः सिद्धार्थाः आयुष्मन्तश्च भवन्ति। इत्येवं परंपरामनुसृत्य सायणाचार्यः ऋग्वेदभाष्यभूमिकायां मंगलमाचरति।

मंगलाचरणम्-

१. प्रथमं पद्यं भावार्थश्च

वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे।

यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननम्।।

वागीशशब्देन ब्रह्मा बृहस्पतिः वा बोध्यते। वाचाम् ईशो वागीशः सुष्ठु वक्ता वा। वागीशदिदेवाः सर्वकार्यारम्भे यं नत्वा कृतकृत्याः भवन्ति, अर्थात् यं प्रणम्य तेषां कार्याणि सफलानि भवन्ति, तथाविधं गजाननं (गजस्य हस्तिनः आननं मुखम् इव आननं यस्य सः गजाननः तं) गणेशमहं प्रणमामि।

२. द्वितीयं पद्यं भावार्थश्च-

यस्य नि:श्वसितं वेदा यो वेदेभ्योऽखिलं जगत्।

निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम्।।२।।

वेदो हि यस्य नि:श्वासरूप:, येन च वेदाधारेण संपूर्णं जगत् निर्ममे, तथाविधं विद्यातीर्थस्वरूपिणं महेश्वरम् अहं वन्दे।

३. तृतीयं पद्यं भावार्थश्च-

यत्कटाक्षेण तद्रूपं दधद् बुक्कमहीपति:।

आदिशन् माधवाचार्यं वेदार्थस्य प्रकाशने।।३।।

यस्य विद्यातीर्थमहेश्वरस्य कृपाकटाक्षेण कृपादृष्टया प्रेरणया वा तत्स्वरूपं धृत्वा राज्ञा बुक्करायेण माधवाचार्यो वेदार्थप्रकाशनाय आदिष्ट:।

४. चतुर्थं पद्यं भावार्थश्च-

ये पूर्वोत्तरमीमांसे ते व्याख्यायातिसंग्रहात्।

कृपालुर्माधवाचार्यो वेदार्थं वक्तुमुद्यत:।।४।।

ये पूर्वमीमांसोत्तरमीमांसात्मके द्वे शास्त्रे स्त: तयो: अतिविस्तरपूर्वकं व्याख्यानं कृत्वा जिज्ञासावतां जिज्ञासोपशमनाय तेषाम् अनुग्रहाय माधवाचार्यो वेदार्थप्रकाशने उद्यत: अभवत्।

५. पंचमं पद्यं भावार्थश्च-

आध्वर्यस्य यज्ञेषु प्राधान्याद् व्याकृत: पुरा।

यजुर्वेदोऽथ हौत्रार्थमृग्वेदो व्याकरिष्यते।।५।।

सर्वेषु यज्ञकर्मसु अध्वर्युनाम्न: ऋत्विज: संबद्धानि कर्माणि प्रधानानि, अत: पूर्वम् अध्वर्यो: सम्बद्धस्य वेदस्य यजुर्वेदस्य व्याख्यानं कृतम्, तदनन्तरं होतृनामकस्य ऋत्विज: सम्बद्धानां कर्मणां व्याख्यानं करिष्यते।

६. षष्ठं पद्यं भावार्थश्च-

एतस्मिन् प्रथमोऽध्याय: श्रोतव्य: संप्रदायत:।

व्युत्पन्नस्तावता सर्वं बोद्धुं शक्नोति बुद्धिमान्।।६।।

अस्य ऋग्वेदस्य प्रथमोऽध्याय: संप्रदायत: श्रवणीयो भवति। गुरुपरंपरागतवेदशब्दराशे: उपदेश: संप्रदाय:। ऋग्वेदस्य प्रथम: अध्याय: संप्रदायाध्ययनयुक्ताद् वेदविदुष: श्रवणीय:। प्रथमाध्यायस्य श्रोता व्युत्पन्नो भूत्वा सर्वम् ऋग्वेदम् अवगन्तुं समर्थो भवति।

१.६ ऋग्वेदस्य श्रेष्ठत्वाद् ऋग्वेदस्य एव पूर्वं व्याख्यानम् उचितमिति पूर्वपक्षः-

सायणाचार्यो व्याख्यानक्रमे पूर्वपक्षरूपेण ऋग्वेदस्य एव व्याख्यानम् उचितमासीत् इति उपस्थापयन् कथयति यत् ऋग्वेदस्य सर्वत्रैव प्रथमप्रयोगो भवति अतः पूर्वम् ऋग्वेदस्यैव व्याख्यानम् उचितमासीत्, किमर्थं पूर्वं यजुर्वेदस्य व्याख्यानं कृतम्। गणनाक्रमे सर्वत्र ऋग्वेदस्य प्राथम्यं श्रूयते, 'अभ्यर्हितं पूर्वम्' इति न्यायः अपि श्रूयते। तस्मादभ्यर्हितत्वाद् ऋग्वेदस्य व्याख्यानम् आदौ युक्तम्।

४. ऋग्वेदस्य श्रेष्ठत्वे प्रमाणानि :

१.तस्माद्यज्ञादिति मंत्रार्थः-

तस्माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे।

छन्दांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत।।

सर्वं हूयते यस्मिन् सः सर्वहुत् तस्मात् पुरुषमेधाख्यात् अथवा सर्वैः हूयमानात् (सहस्रशीर्षा पुरुषः) इत्युक्तात् परमेश्वरात् ऋचः सामानि, यजूंषि च यथाक्रमेण जातानि। अतः श्रुत्युक्तत्वात् ऋग्वेदस्य एव व्याख्यानम् आदौ उचितमिति। पुरुषसूक्ते ऋग्वेदस्य प्राथम्यं वर्णितम्।

२ इन्द्रं मित्रं वरुणमिति मंत्रार्थः-

इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान्।

एकं सद् विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः।।

यज्ञेषु इन्द्रादयः देवाः अपि हूयन्ते। ''सर्वहुतः'' इति परमात्मनो विशेषणं नोपयुक्तमिति, न यतः परमेश्वरस्य एव इन्द्रादिरूपेण अवस्थानं तत्र तत्र विद्यते। अतः सर्वत्र एव हूयमानत्वेन परमेश्वरः एव प्रकीर्तितः, तस्मान्न कश्चिद्विरोधः। परमेश्वरस्य एव अवस्थानविशेषाः इन्द्रादयः, अर्थात् परमेश्वरः एव तत्तद्देवरूपेण तत्र तत्र यज्ञेषु उपस्थितो भवति इति श्रुतेः आशयः। परमेश्वरः एकः अस्ति, तं परमेश्वरं विप्राः इन्द्र-मित्र-वरुणाग्निप्रभृतिभिः नामभिः संबोधयन्ति।

३. 'तद्यदिदम्' इति बृहदारण्यकवाक्यस्य अर्थः-

तद्यदिदमाहुरमुं यजामुं यजेत्येकैकं देवमेतस्यैव सा विसृष्टिरेष उ ह्येव सर्वे देवाः।

अयमर्थः - कर्मप्रकरणे याज्ञिकाः यागकाले यदिदं वचः आहुः अमुमग्निं यज, अमुमिन्द्रं यज इत्यादि। भिन्नम् एव अग्न्यादिदेवमेकैकं मन्यमाना आहुः, तन्न तथा विद्यात् इत्यर्थः। यस्माद् यः सर्वो देवभेदः एतस्यैव प्रजापतेरेव सा विसृष्टिः। एषः प्रजापतिः एव

सर्वे देवा:, नान्यद्देवतान्तरमस्ति।

श्रुतिषु ऋचां प्राथम्येन पठनादेव केवलाद् हेतो: तस्य अभ्यर्हितत्वम् अन्यवेदेभ्य: पूर्वमस्ति इति एव नास्ति। अन्यानि अपि कारणानि सन्ति। तैत्तिरीयसंहितायां प्रतिपाा-दितमस्ति यद् यज्ञस्य अंगानां दाढर्यम् ऋचा एव संभवति। यज्ञेषु यत्किमपि साम्ना यजुषा क्रियते तच्छिथिलमेव।

४. यद्वै यज्ञस्येति तैत्तिरीयश्रुतेरर्थ:-

यद्वै यज्ञस्य साम्ना यजुषा क्रियते शिथिलं तद्यदृचा तद् दृढम्

अस्मिन् वाक्ये स्पष्टमेव प्रतिपादितम् ऋग्वेदस्य महत्वम्। एतावन्मात्रं प्रमाण-मृगवेदस्य अभ्यर्हितत्वाय न भवति, अपितु सर्ववेदगतानि ब्राह्मणनि स्वप्रपतिपादिते अर्थे विश्वासोत्पादनाय अपि 'तदेतदृचाभ्युक्तम्' अर्थात् एतद्धि ऋचापि प्रतिपादितम् इति उदाहरन्ति। यजुर्वेदगतेषु मंत्रकाण्डेष्वपि तत्तत्स्थले अध्वर्युणा प्रयोज्या ऋग्वेदमंत्रा बाहुल्येन पठयन्ते। सामवेदे तु सर्वे मंत्रा: ऋगाश्रिता: सन्त्येव। छान्दोग्योपनिषदि साम्नाम् ऋगाश्रितत्वम् इत्थं प्रतिपादितम्-

''ऋच्यध्यूढं साम गीयते''

अथर्ववेदे अपि ऋग्वेदमंत्रा: बाहुल्येन पठयन्ते। अत: सर्वै: वेदैरपि ऋच: प्रामाण्येन उपस्थाप्यमानत्वात् पूज्यत्वाच्च ऋग्वेदस्य अभ्यर्हितत्वं प्रमाणितं भवति।

५. ऋग्वेदं भगवोऽध्येमि इति उपनिषद: वाक्यस्यार्थ:-

छान्दोग्योपनिषद: अध्येतार: ऋग्वेदस्य प्राथम्यम् एवं कथयन्ति-

'ऋग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेदमाथर्वणं चतुर्थम्'

अत्र देवर्षि: नारद: सनत्कुमारं प्रति अध्ययनक्रमं वर्णयति।

६. ऋग्वेदो यजुर्वेद: इति उपनिषद: वाक्यस्यार्थ:-

मुण्डकोपनिषदि अपि ऋचां प्राथम्यं प्रतिपादितम्-

'ऋग्वेदो यजुर्वेद: सामवेदोऽथर्ववेद:'

७. ऋग्यजु: सामाथर्वाणश्चेति उपनिषदो वाक्यस्यार्थ:-

नृसिंहपूर्वतापिन्युपनिषदि क्रमेण अध्ययनम् एवं स्वीकृतम्-

'ऋग्यजु: सामाथर्वाणश्चत्वारो वेदा: सांगा: सशाखाश्चत्वार: पादा भवन्ति'

तथा च सर्वत्रैव ऋच: एव प्राथम्येन पूज्यत्वेन च पठितत्वाद् ऋग्वेदस्य अभ्यर्हितत-

वम्। अभ्यर्हितस्य आदौ व्याख्यानमुचितम्। न हि यजुषः प्राथम्येन व्याख्यानं भवितव्यम्। इति पूर्वपक्षः।

५. यज्ञानुष्ठानार्थत्वाद् यजुर्वेदस्य एव आदौ व्याख्यानमिति उत्तरपक्षः-

ये खलु ऋचः पूर्वं व्याख्यानं प्रकर्तव्यमासीदिति कथयन्ति, तान्प्रति एषः उत्तरपक्षः-

अस्तु सर्वत्र वेदाध्ययन-पारायण-ब्रह्मयज्ञ-जपादिषु ऋग्वेदस्य एव प्राथम्यं प्रतिपाादितमस्ति। मंत्राणामर्थज्ञानं यज्ञानुष्ठानदृष्टया एव भवति। अर्थात् यादृशं यज्ञानुष्ठानं भवति तादृशम् एव मन्त्रार्थज्ञानं कर्तव्यं भवति। एतावता मंत्रार्थज्ञानात् पूर्वं यज्ञानुष्ठानप्रक्रियायाः ज्ञानम् आवश्यकं भवति। जैमिनिना उक्तम्-

''आम्नायस्य क्रियार्थत्वात्''

लगधाचार्येण अपि उक्तम्-

''वेदा हि यज्ञार्थमभिप्रवृत्ताः'' (वेदांगज्योतिषम् श्लो. ३)

अतः ऋचः पूर्वं यद्यजुषे व्याख्यानं कृतं तदुचितमेव। यजुर्वेदस्य एव आदौ व्याख्याने प्रमाणानि-

(क) ''ऋचां त्व'' इति मंत्रः-

ऋगपि यजुर्वेदस्य प्राधान्यं प्रतिपादयति-

ऋचां त्वः पोषमास्ते पुपुष्वान् गायत्रं त्वो गायति शक्वरीषु।

ब्रह्मा त्वो वदति जातविद्यां यज्ञस्य मात्रां वि मीमित उ त्वः।।

अस्मिन् मंत्रे चत्वारः पादाः सन्ति। तेषां पादानां पृथक्-पृथग्व्याख्यानेन अर्थः प्रकाशितो भविष्यति।

(ग) ''ऋचां त्व'' इति मंत्रस्य प्रथमपादस्य व्याख्यानम्-

अस्य पादस्य व्याख्यानावसरे निरुक्तकारणे कथितम्-

''ऋचामेकः पोषमास्ते पुपुष्वान् होतर्गर्चनी''

अत्र मंत्रे प्रयुक्तः त्वशब्दः एकशब्दस्य पर्यायः अस्ति। होत्रादयः षोडशर्त्विजो भवन्ति। तेषु चत्वारो महर्त्विजः। होता, उद्गाता, ब्रह्मा, अध्वर्युश्चेति। तेषां मध्ये एको होता यज्ञकाले स्वकीयवेदगतानाम् ऋचां पोषं यथाविधिकर्मणि प्रयोगं पुपुष्वान् बह्वीर्ऋचः पुष्यन् शंसन्नास्ते।

अयमर्थः - होतृनामकः एकः ऋत्विक् स्वकीयवेदगतानाम् ऋचां पुष्टिं करोति। भिन्नभिन्नस्थलेषु अभिहितानाम् ऋचां समूहम् एकत्र सम्पाद्य एतावच्छस्त्रमिति निश्चिनोति।

ऋक्शब्द: अर्चनीतिशब्दाभिप्रायं प्रकटयति। ऋचा एव देवविशेष:, क्रियाविशेष:, तत्साधनविशेषो वा अर्च्यते प्रशस्यते। होता ऋग्वेदी भवति। ऋक्शंसनकर्म होतरि विनियुक्तम्। उक्तं च-

''यदृचैव हौत्रं क्रियत'' इति। (ऐ.ब्रा.५.५.८)

(ii) ''ऋचां त्व'' इति मंत्रस्य द्वितीयपादस्य व्याख्यानम्-

एक: उक्तादन्य: उद्गाता गायत्रशब्दाभिधेयं स्तोत्रं साम, शक्वरीशब्दाभिधेयासु ऋक्षु, 'गायति' इत्येतत्सामगानकर्म उद्गातरि नियुक्तम्। उक्तं च-

'साम्नोद्गीथमि ' ति (ऐ.ब्रा. ५.५.८)

(iii) ''ऋचां त्व'' इति मंत्रस्य तृतीयपादस्य व्याख्यानम्

एक: अपरो ब्रह्मानाम ऋत्विक् भृशमुत्पन्ने प्राश्चित्तादौ कर्तव्ये कर्मणि वेदयित्रीं वाचं वदति। निरुक्ते उक्तम्-

'ब्रह्मा सर्वविद्य: सर्वं वेदितुमर्हति' (नि.१.३)

अयमर्थ: - ब्रह्मा त्रयीविद्यासंयुक्तो भवति, असौ सर्वमेव वेदितुम् अर्हति, अत: अयं ब्रह्मा भवति। ऐतरेयब्राह्मणे उक्तम्-

'अथ केन ब्रह्मत्वं क्रियते इति? त्रय्या विद्यया' (ऐ.ब्रा. ५.५.८)

'एष एव यज्ञस्तस्य मनश्च वाक्च वर्तनी तयोरन्यतरां मनसा संस्करोति ब्रह्मा, वाचा होताध्वर्युरुद्गातान्यतराम्' (छा.उ.4.16.1-2)

छान्दोग्योपनिषद: अस्मिन् वाक्ये ब्राह्मणो महत्वं प्रतिपादितमस्ति। संपूर्णे यज्ञे प्रमादो न भवेदिति मनसा अनुसंधेयम्। वाचा च ऋग्यजु: साममंत्रा: पठनीया:। यज्ञस्य द्वौ मार्गौ भवत:-मनो वाणी च। होता-उद्गाता-अध्वर्युश्चेति त्रयो मिलित्वा वाग्रुपं यज्ञमार्गं संस्कुर्वन्ति। एको ब्रह्मा मनोरूपं यज्ञमार्गं संस्करोति। तस्मादस्य वैशिष्टयम् अस्ति।

(iv)''ऋचां त्व'' इति मंत्रस्य चतुर्थपादस्य व्याख्यानम्-

चतुर्थपादस्य व्याख्याने निरुक्तकारो यास्क: कथयति-

'यज्ञस्य मात्रां विमिमीत एकोऽध्वर्यु:।

अध्वर्युरध्वरयुरध्वरं युनक्त्यध्वरस्य नेताध्वरं कामयत इति वा''।

अयमर्थ:-मीयते निर्मीयते इति मात्रा, तां यां कांचिदितिकर्तव्यतां निर्मिमीते, करोति इत्यर्थ:। यज्ञस्वरूपनिष्पादकत्वं च अध्वर्यो: नामनिर्वचनाद् एव अवगम्यते। अध्वरशब्दे पृषोदरादित्वाद् अन्त्यलोपे अध्वरयुरेव अध्वर्यु: इत्युच्यते। अध्वरं यज्ञं युनक्ति सर्वांगस-

वननेन संयोजयतीत्यध्वरयु:। स: अध्वरस्य नेता, अध्वरम् अन्तं प्रापयति। 'अध्वरं कामयते' इत्यत्र 'यु:' इत्ययं कामनार्थ:।

निरुक्ते उक्तम्-

'अध्वर इति यज्ञनाम। ध्वरतिर्हिंसाकर्मा तत्प्रतिषेध:'।। (नि. १.३)

ध्वरधातुर्हिंसार्थक:। ध्वर्यन्ते बध्यन्ते अस्मिन्निति ध्वर:, तत्प्रतिषेध: अध्वर:। अहिंस्रो हि यज्ञ:।

(ख) यजुर्वेदस्य यागनिष्पादकत्वद्योतक यास्कनिर्वचनम्-

एतदेव अभिप्रेत्य अध्वर्युवेदस्य यागनिष्पादकत्वद्योतकं निर्वचनं यास्को दर्शयति-

'मंत्रा मननात्, छंदांसि छादनात्, स्तोम: स्तवनात्, यजुर्यजते:'

यजुषा हि विशेषेण इज्यते। सर्वत्र याज्यान्ते वषट्कारविधानात् यजुर्वेदो यज्ञस्याधारो भित्तिरूप:, ऋक्सामादयस्तु तदाश्रिता: चित्ररूपा:। अतो यज्ञक्रियासु यजुर्वेदस्य एव प्राधान्यम्। अथवा यजुर्वेदेन यज्ञशरीरं निर्मीयते, तत्र ऋग्वेदेन कृतं कर्म कटककुंडलादि-वदाभरणजातम्, तेषु च सामवेदगानानि मणिमुक्तादिवच्छोभाधायकानि इति कथ्यते। एवं याज्ञिकदृष्टया यजुर्वेदस्य अभ्यर्हितत्वम् अस्ति।

यजुर्वेदे गद्यात्मका: अनियतपादा: याज्ञिकमंत्रा: सन्ति। यजुर्वेदेन यज्ञशरीरं निर्मीयते। एवं सति अध्वर्युसंबन्धिनि यजुर्वेदे निष्पन्नं यज्ञशरीरम् उपजीव्य तदपेक्षितौ स्तोत्रशस्त्ररूपो अवयवौ इतरेण वेदद्वयेन (ऋग्वेदेन, सामवेदेन) पूर्येते इति उपजीव्यस्य यजुर्वेदस्य प्रथमतो व्याख्यानं युक्तम्। 'ऋच्यध्यूढं साम गीयते' इति छान्दोग्योपनिषदि (छा.3.1.6.1) उक्तमस्ति। तस्मात् सामवेदस्य आदौ व्याख्यानस्य प्रश्न एव नास्ति। अथर्ववेदे अपि ऋगाश्रितत्वम् अस्त्येव इति अथर्ववेदस्य आदौ व्याख्यानं नोचितम्।

तस्मात् चतुर्वेदभाष्कर्त्रा सायणाचार्येण वेदभाष्यक्रमे ऋग्भाष्यात् पूर्वं यजुर्वेदस्य भाष्यं कृतं, न तत्र कापि विप्रतिपत्ति: इति सिद्धम्।

१.0 सूर्यसूक्तस्य

रुत्सूक्तस्य सम्यक् अध्ययनं कृतम्। अस्मिन् पाठे भवन्त: ऋग्वेदस्य सूर्यसूक्तो-क्तमंत्राणां, तत्रोपवर्णितानां विषयाणांच अध्ययनं करिष्यन्ति।

भगवती श्रुतिपरंपरा भारते वर्षेऽस्मिन् चिरकालात् प्रवर्तते। यास्केन तु चिरात् शनै: शनैर्विलुप्यमानां वेदार्थज्ञानानुशीलनपरम्परां पुन: प्रतिष्ठापनार्थं वेदार्थचिन्तनं प्रति वेदाध्यायिन: प्रेरिता:। 'ऋक्' इति शब्दस्य निर्वचनम् ऋक् अर्चनी, अर्च्यतेऽनया सा अर्चनी। अर्चनीत्युपमार्थमृक्छब्द आचष्टे। अर्च्यते प्रशस्यतेऽनया देवविशेष:

क्रियाविशेषस्तत्साधनविशेषो वेत्यृक्छब्दव्युत्पत्तिरिति। आश्विनशास्त्रे सौर्य क्रतौ अस्य पाठस्य विनियोगः वर्तते। रश्मयः जगत्प्रसिद्धं सूर्यमुद्वहन्ति अर्थात् रश्मयः तमग्निसदृशं सूर्यम् ऊर्ध्वसदृश एव नयन्ति इत्याशयः।

'सूर्य' इति शब्दस्य निर्वचारावसरे यास्काचार्यः कथयति-सूर्यः सरतेर्वा, सुवतेर्वा अर्थात् सरति अंतरिक्षे इति सूर्यः यद्वा सुवति कर्माणि लोकं प्रेरयति इति सूर्यः। स्वीर्यते प्रेर्यते वायुनेति वा सूर्यः। भगवती श्रुतिर्वदति-

उदुत्यं जातवेदसं देवं वहन्ति केतवः। दृशे विश्वाय सूर्यम्।।

उद्वहन्ति त्यं जातोवेद ऋग्वेदो ज्ञानं धनं वा यस्मात्तम्, रश्मयः केतवः समस्तानां भूतानां दर्शनाय उद्वहन्ति।

सूर्यसूक्तस्य परिचयः-

ऋग्वेदस्य शाकलशाखायाः प्रथममण्डलस्य पंचाशत्सूक्तरूपेण सूर्यसूक्तस्य पाठः विद्यते। अस्य ऋषिः प्रस्कणवः, सूर्यदेवत्यम्। आदौ नवमन्त्रेषु गायत्र्यः छन्दः, अन्ते चतुर्षु मन्त्रेषु अनुष्टुभ इत्युक्तम्। उदुत्यं सप्तोना सौर्यं नवाद्या गायत्र्य इति। आश्विनशस्त्रे सौर्ये क्रतावुदुत्यमित्यादयो नवर्चः शंसनीयाः अर्थात् आश्विनशस्त्रे सौर्ये क्रतौ अस्य विनियोगः वर्तते। केतवो रश्मयः तं जगतप्रसिद्धं सूर्यमुद्वहन्ति। कीदृशं सूर्यम्? जातवेदसम्, जातो वेद ऋग्वेदो ज्ञानं धनं वा यस्मात्तम्, 'ऋग्वेदोऽनेरजायत' इति श्रुतेः। यास्काचार्यैः निरुक्ते जातवेदशब्दस्य निर्वचनं कृतम् - जातवेदाः कस्मात्? जातानि वेद, जातानि वैनं विदुः, जाते जाते विद्यत इति वा? जातवित्तो वा जातधनः, जातविद्यो जातप्रज्ञानः, यत्तज्जातः पशून् विन्दतेति तज्जातवेदसो जातवेदस्त्वम्। देवो दानाद् द्योतनाद्वा। तं देवं दातारं द्युस्थानं वा विश्वस्य दर्शनाय, जगतः प्रकाशनाय, जगत्कर्तृकदर्शनाय च उर्ध्वं नयन्ति अर्थात् रश्मयः तमग्निसदृशं सूर्यम् ऊर्ध्वसदृश एव नयन्ति। किमर्थम्? कृत्स्नस्य जगतः सूर्यं द्रष्टुम्। षड् ऐश्वर्यसम्पन्नं परमात्मानं केतवो भगवद्यशःख्यापका आचार्या भक्त्या उद्वहन्ति हृदयेनोच्चैर्महत्या भक्त्या धारयन्ति। कीदृशं तम्? जातवेदसम्, जाता वेदा यस्मात्तम्, वेदं दानादिगुणयुक्तम्। विश्वकर्तृकभगवद्दर्शनाय भगवान् सर्वसुलभो भवति। भगवती श्रुतिः कथयति-

अदृश्रमस्य केतवो विरश्मयो जनाँ२।। अनु। भ्राजन्तो अग्नयो यथा।

अस्य प्रत्यक्चैतन्यभिन्नस्य सूर्यवत् स्वप्रकाशस्य परमात्मनो ज्ञानविज्ञानलक्षणकेतवो ज्ञानहेतवो रश्मयो सर्वजनानुगता व्यापकास्तथा दृश्यन्ते, यथा ज्वलंतोऽग्नयो जनानुगता दृश्यन्ते।

सूर्यः सर्वेषां प्राणिनामवलोकनाय आकाशे वर्तमानः सन् - ''देवो याति भुवनानि

पश्यन्'' चैरः रात्रेः गमनानन्तरं पलायन्ते तद्वत् नक्षत्राणि सर्वाणि सूर्यं समागच्छन्ति भगवान् सूर्यः सर्वं जगत् स्वप्रकाशेन प्रकाशति अतः सूर्यस्य महत्वमुत्कृष्टं वर्तते। सर्वं जगत् उदयं प्राप्ते सति सूर्यस्य स्वे स्वे कर्मणि प्रवृत्तं भवति यथा सूर्यः सर्वस्य प्रेरकः। देवाः मनुष्याः यक्षा रक्षांसि सर्वे जानन्ति यद् अस्माकं सम्मुखे एव सूर्य उदितो जातः। सूर्यः सर्वस्य शोधकः वर्तते - ''येना पावक चक्षसा'' अर्थात् हे शोधक! त्वं दर्शनेन भुरण्यन्तमनुपश्यसि तथा अयमहोरात्रं विभजसि। सः विचक्षणः वर्तते। आकाशे गच्छन्नपि सूर्यस्य रथं न पतततिं देसस्येदृशी महत्ता विद्यते। सूर्यः पुण्यशीलान् जनान् वैकुंठमपि गमयति। सः यजमानानां हृदयगतमन्यद्वा व्याधिं विनाशयति।

सूर्योपासकाः जना सूर्यमधिगच्छन्ति तस्मिन्नेव संगता जायन्ते। मित्राणां रक्षकः शत्रूणां विनाशकश्च सूर्यः। उपद्रवकारिणां प्राणिनां रक्षसां वा विनाशको भक्तानां रक्षकश्च सूर्यो वर्तते इति।

सूर्यसूक्तस्य महत्वं दार्शनिकविचारधाराश्च-

सूर्यः सौरमंडलीयदेवेषु दृश्यमानो देवः, स जगतश्चक्षुषस्तथा प्रकाशरूपः स्थावर जंगम संसारस्य आत्मा वर्तते। अयं सर्वेषां प्राणिनां पदार्थानां च नेत्रवत्प्रकाशकः। सूर्य एव सर्वेषां सत्कर्मणामसत्कर्मणां च निरीक्षकः एकस्मिन्नेव दिने सूर्यः त्रिलोकीं भ्रमति प्रकाशयति च। विश्वानि प्रकाश्य सूर्यो जगतां च चक्षुः प्रकाशकः नेत्ररूपं वा। असौ सूर्यः द्यावापृथिवी दिवं च पृथिवीं च अन्तरिक्षं च स्वकीयेन तेजसा आसमन्तात् अप्रासीत अपूरयत। उदेति हि सूर्ये मृतप्रायं सर्वं जगत् पुनश्चेतनायुक्तं सदुपलभ्यते। सूर्यः एव सर्वेषां सत्कर्मणामसत्कर्मणां च निरीक्षकः-

''आ कृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च।

हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन्।।

सूर्यः सर्वोत्पादकः परमेश्वरः कृष्णेन तमसा-रजसा रजोगुणेन ताभ्यामुपलक्षितेन सत्वेन च वर्तमानो मोक्षप्राप्त्यर्हंमर्त्यं संसारजीवसमूहं यथायोग्यं व्यवस्थापयन् ज्ञानमयेन रथेनेव भूतजातानि पश्यन् सर्वत्र प्राप्नोति हिरण्येन हिरण्मयेन सविता रथेन। कृष्णेन रजसा रात्रिलक्षणेन सह आवर्तमानः पुनर्भ्रमणं कुर्वन् सूर्यदेवः दीप्यमानां दानादिगुणयुक्ताम् उषसं पश्चादभ्येति प्रादुर्भावादनन्तरं तामभिलक्ष्य गच्छति। एवंविधं भद्रं कल्याणं सूर्यं प्रति, भद्राय कल्याणरूपाय कर्मफलाय स्तुम इति। अपि च अस्ताचलगामिनः सूर्यस्य महत्वं व्याचष्टे यत् सर्वकर्मप्रवर्तनमध्ये एवासौ स्वकिरणान् संहरति, रात्रिश्च सर्वस्मै आच्छादनमंध्कार रूपं प्रसारयति। ईदृशं स्वातन्त्र्यं महिमा च सूर्यव्यतिरिक्तस्य न कस्यापि वर्तते। हविषां भोगश्च सूर्यदेवस्याग्निरूपत्वेन प्रख्यात एव। सर्वस्य प्रेरकः सवितेति।

द्यौ: नभस: उपस्थे उपस्थाने मध्ये रूपं सर्वस्य निरूपकं प्रकाशकं तेज: कृणुते करोति प्रदर्शयतीति।

सूर्य: आरोहणावरोहणात्मकं यजमानानुग्रहार्थकं ऋतज्योतिर्गमनं अन्तर्यजने प्रसिद्धम्। सवितादेव: सर्वलोकप्रेरकज्योति: स्वरूपी भवति। सूर्यं वेति उत्तमं ज्योति:स्थानसूर्याख्यं प्राप्नोति। प्रथमं तु यजमानस्योद्धाराय उदित: सविता तस्मै लोकत्रयसंबन्धिनि स्थानत्रये प्रकाशं दत्त्वा तत्र सर्वां बाधां निराकृत्य उत्तमं पदं प्राप्नोति। सूर्य: सर्वस्य शुद्धकर्ता वर्तते। सूर्योपासका: जना: मृत्युं तीर्त्वा स्वर्गं गमयन्ति।

तरणिर्विश्वदर्शतो ज्योतिष्कृदसि सूर्य।

विश्वमाभासि रोचनम्।। (ऋकसूर्यसूक्ते)

हे सूर्योपाधिक अन्तर्यामिन्! त्वं सूर्यचन्द्रादीनां कर्तासि, 'येन सूर्यस्तपति तेजसेद्ध:' (तै.ब्रा.) त्वं तरणिरसि जलतरणोपायरूपा तरणिर्नौका विश्वदर्शत:, विश्वं दर्शतं दर्शनीयं यस्मात् स:, स: त्वत्सत्तास्फूर्तिभ्यामेव जगत् सत्तास्फूर्तिमद् भूत्वा दर्शनयोग्यो भवति। त्वमेव विश्वमाभासि प्रकाशयसि। कीदृशं विश्वम्? रोचनम्, सूर्यचन्द्रादिभिर्दीप्यमानम्। उक्तं च गीतायाम्-

यदादित्यगतं तेजो जगद्भासयतेऽखिलम्।

यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धिमामकम्।।

सूर्यसूक्ते भगवती श्रुति: कथयति यत्-

''येना पावकचक्षसा भुरण्यंतं जनाँ अनु।

त्वं वरुण पश्यसि।''

हे पावक! येन चक्षषा दर्शनेन त्वं भुरण्यन्तमनुपस्यसि तेनैव चक्षसा ज्ञानेन जनानस्मानपि मुख्यत: पश्य अत्र सगुणब्रह्मप्राप्तिदृष्ट्या त्वरितगामिखवदात्मानं कृत्वा परमेश्वरलोकं साधको गच्छति। निर्गुणब्रह्मदृष्ट्या तु क्षिप्रतया देहाद्युपाधिबाधेन नित्यप्राप्तपरमेश्वराभिव्यक्तिरेव विवक्षिता।

ऋग्वेदस्य सूर्यसूक्ते सूर्यस्य महिमा बहु वर्तते। यथा-

''उद्वयं तमसस्परि ज्योतिष्पश्यन्त उत्तरं।

देवं देवत्रा सूर्यमगन्मज्योतिरुत्तमम्।।''

मन्त्रेऽस्मिन् परमेश्वरोपासका: स्वानुभवं प्रकाशयन्त: प्राहु: तमसोऽज्ञानतत्कार्यात्मकात् प्रपंचात् परि उपरि विद्यमानं ब्रह्मात्मकं स्वर्गम् उदगन्म ब्रह्मभावं प्राप्त:। उत्कृष्टतरं

सूर्यं देवं द्योतनात्मकं सूर्यमात्मानं पश्यन्तः सन्त उत्तमं ज्योतिब्रह्मरूपमुद्गन्म प्राप्तः।

अस्याः सूर्यदेवतायाः महाभाग्यात् बहुनामधेयानि ऋग्वेदस्य सूर्यसूक्ते समुपलभ्यन्ते। नानासूर्य इति पदेन, सप्ताऽऽदित्या इति वाक्यांशेन च सूर्यदेवताया विविधरूपता समर्थिता। सूर्यदेवस्य परमैश्वर्यंच प्रत्यक्षमेव वर्तते। अस्मिन् सूक्ते सूर्यदेवतायाः ऐश्वर्यं स्पष्टतया प्रतिपादितमस्ति।

सूर्यसूक्तोक्तमंत्राणां प्रतिपाद्यविषयाः (मूलपदपाठव्याख्यासहिताः)

१. उदुत्यं जातवेदसम् इति प्रथममन्त्रस्य पाठः-

उदुत्यं जातवेदसं देवं वहन्ति केतवः। दृशे विश्वाय सूर्यम्।।१।।

पदपाठः-

उत्।ऊम्। इति । त्यम् । जातऽवेदसम्। देवम् । वहन्ति। केतवः । दृशे। विश्वाय । सूर्यम्।

व्याख्या-

त्यम् - तं प्रकाशेन प्रसिद्धं देवम् - देदीप्यमानं सूर्यम्, केतवः - रश्मयः - उद् - उपरि आकाशे वा वहन्ति - प्रापयन्ति कीदृशं देवं - जातवेदसम् - जातानाम् प्राणिनाम् - वेदितारम् - जातप्रज्ञं वा। केतवः किमर्थमुद्वहन्ति - विश्वाय - सर्वस्मै दृशे अवलोकनाय उद्वहन्ति। रश्मयः देवं सूर्यम् - सर्वेषां प्राणिनां संदर्शनाय आकाशे उद्वहन्ति - यथा सूर्यः सर्वं भूतं जातमवलोकयतु - अथवा सर्वे प्राणिनः सूर्यमवलोकयन्तु एतदर्थमुद्वहन्ति इत्यर्थः।

२ . अप त्ये तायव इति द्वितीयमन्त्रस्य पाठः-

अप त्ये तायवो यथा नक्षत्रा यन्त्यक्तुभिः

सूराय विश्वचक्षसे।।२।।

पदपाठः-

अप। त्ये । तायवः । यथा। नक्षत्रा । यन्ति।

अक्तुऽभिः । सूराय । विश्वऽचक्षसे ।।2।।

व्याख्या-

अयम् - एते, त्ये-ते, प्रसिद्धाः नक्षत्राः = नक्षत्राणि तायवः - चैराः यथा - इव अक्तुभिः - रात्रिभिः, सह अपर्यान्त - अप्रगच्छन्ति देवं सूर्यमादित्यमागमने सूराय -

सूर्यागमनं दृष्ट्वा, विश्वचक्षसे, सर्वं जगदवलोकनाय नक्षत्राणि सूर्यं प्राप्नुवन्ति - यथा चैराः रात्रिगमनानन्तरं पलायन्ते - तद्वत् रात्र्या सह सर्वाणि नक्षत्राणि - सूर्यं समागच्छन्ति - यद्वा ये यज्ञप्रभृतिशुभकर्मकर्तारः सन्ति ते मरणानन्तरं स्वर्गं गच्छन्ति त एव आकाशे यत्र तत्र सर्वत्र स्वपुण्यप्रभावेण प्रकाशयनित तथैव नक्षत्राणि, सूर्योदये सति ते सूर्यं समागच्छन्तीत्यर्थः।

३. अदृश्रमस्य केतव इति तृतीयमन्त्रस्य पाठः।

अदृश्रमस्य केतवो विरश्मयो जनाँ अनु।

भ्राजन्तो अग्नयो यथा।।३।।

पदपाठः-

अदृश्रम् । अस्य । केतवः । वि । रश्मयः । जनान्।

अनु । भ्राजन्तः। अग्नयः । यथा ।।3।।

व्याख्या-

अस्य - भगवतः सूर्यस्य केतवः - प्रज्ञापकाः रश्मयः - दीप्तयः - अदृश्रम् - जनान् सर्वान् अनुक्रमेण प्रेक्षन्ते। यथा येन प्रकारेण भ्राजन्त प्रदीप्यमानाः - अग्नयः। यथा अग्नयः देदीप्यमानाः सर्वं पश्यनित तद्वत् सूर्योऽपि उदयं प्राप्ते सति निखिलं जगत् प्रकाशयति।

४.तरणिर्विश्वदर्शत इति चतुर्थमंत्रस्य पाठः-

तरणिर्विश्वदर्शतो ज्योतिष्कृदसि सूर्य।

विश्वमा भासि रोचनम्।।४।।

पदपाठः-

तरणिः । विश्वऽदर्शतः। ज्योतिःकृत्। असि। सूर्य। विश्वम्। आ। भासि। रोचनम्।।4।।

व्याख्या-

हे सूर्य! भगवन् आदित्य! त्वं तरणिः महतोऽध्वनो गन्तासि विश्वदर्शतः विश्वैः निखिलैः प्राणिभिः जनैः दर्शनीयः ज्योतिष्कृत् - ज्योतिः - प्रकाशः कृत - जनयिता उत्पादकः असि - वर्तते। विश्वं सर्वं भुवनम् आभासि-सर्वतो भावेन प्रकाशयसि। त्वं रोचनं रोचमानं देदीप्यमानसर्वजगदवलोकयसि। हे सूर्य! अन्तर्यामितया सर्वस्य प्रेरकप-रमात्मन तरणिः संसाराब्धेस्तरकोऽसि यस्मात् त्वं विश्वदर्शतः विश्वैः सर्वैः मुमुक्षुभिः द्रष्टव्यः। ''चक्षोः सूर्योऽअजायत'' ईदृशस्त्वं चिद्रूपतया विश्वं सर्वं दृश्यं जातं रोचनं

रोचमानं दीप्यमानं यथा भवति तथा भाति।

५. प्रत्यड्. देवानामिति पंचममन्त्रस्य पाठः-

प्रत्यड्. देवानां विशः प्रत्यड्.ङु.देषि मानुषान्।

प्रत्यड्.विश्वं स्वर्दृशे।।५।।

पदपाठः-

प्रत्यड्. । देवानाम् । विशः । प्रत्यड्. । उद् । एषि । मानुषान् । प्रत्यड्. । विश्वम् । स्वः । दृशे।।5।।

व्याख्या-

हे सूर्य! आदित्य! देवानां देदीप्यमानानाम् इन्द्रदिदेवानां प्रत्यड्. उदयं प्राप्नोषि अभिमुख एव उदेति देवाः आगच्छन्ति-यथा सूर्य अस्माकं सम्मुख एव उदेति उदयं प्राप्नोति-एवं मानुषान् मनुष्यान् प्रत्यड्. उदेति उदयं प्राप्नोति। यथा मनुष्याः अपि एतादृशमवगच्छन्ति-यथा सूर्य अस्माकं सम्मुख एव उदयं प्राप्नोति। विश्वं सर्वं स्वः स्वर्गलोकं विशः निवासिनः प्रत्यड्. उदेषि सर्वे स्वर्गवासिनः सायन्ते। यथा अस्माकं सम्मुख एव उदयं प्राप्नोति। एतादृशी भगवतः सूर्यस्य महिमा विद्यते।

६. येना पावकचक्षसे 'इति षष्ठमन्त्रस्य पाठः-

येना पावक चक्षसा भुरण्यन्तं जनाँ अनु।

त्वं वरुण पश्यसि।।६।।

पदपाठः-

येन । पावक । चक्षसा । भुरण्यन्तम् । जनान् । अनु । त्वम् । वरुण । पश्यसि।।6।।

व्याख्या-

हे पावक! सर्वेषां शुद्धकर्तः! वरुणात्मकसूर्यदेव! येन चक्षसा येन पूर्णया दृष्ट्या जनान् प्राणिनः अनुपश्यसि अनुक्रमेण अवलोकयसि प्रकाशयसि। कीदृशं मुख्यन्तम् - धारयन्तं पोषयन्तं वा जनान् पश्यसि वरुणशब्देन अत्र आदित्य एव स्तुतः यथा - ''मित्रश्च वरुणश्च धाता चार्यमा च'' (तै.आ) सर्वाणि आदित्यनामानि।

७. 'वि द्यामेषिरजस्पृथ्वहा' इति सप्तममन्त्रस्य पाठः-

वि द्यामेषि रजस्पृथ्वहा मिमानो अक्तुभिः।

पश्यंजन्मानि सूर्य।।७।।

पदपाठः-

वि । द्याम् । एषि। रजः । पृथु। अहा। मिमानः। अक्तुऽभिः। पश्यन्। जन्मानि। सूर्य।।7।।

व्याख्या-

हे सूर्य! वि - विशेषप्रकारेण, द्याम् - द्युलोकम्, एषि-प्रकाशयितुं गच्छसि। विस्तीर्णं रजः विस्तृतम् अहा - अहानि लोक - समूहम् अक्तुभिः रात्रिभिः सह मिमानः उत्पादयन् - आदित्याधीनत्वात् - अहोत्ररात्रविभागः यथा जन्मानि प्राणिजातानि प्राणिसमूहानि पश्यन् अवलोकयन् प्रकाशयन् सन् सूर्यः गच्छति।

८. सप्त त्वा हरितो रथे इति अष्टममन्त्रस्य पाठः-

सप्त त्वा हरितो रथे वहन्ति देव सूर्य।

शोचिष्केशं विचक्षण।।८।।

पदपाठः-

सप्त । त्वा । हरितः । रथे। वहन्ति। देव। सूर्य। शोचिःऽकेशम्। विऽचक्षण।।8।।

व्याख्या-

हे सूर्य! देदीप्यमान भगवन् सूर्य! सप्त - सप्तसंख्याकः, हरितः - अश्वाः, त्वा - त्वां, सूर्यरथे स्यन्दने वहन्ति - उद्वहन्ति रथारूढं सूर्यम्, अश्वाः विश्वं दर्शनाय वहन्ति। कीदृशम् - शोचिकेशम्, शोचींषि - तेजांसि - एव केशा इव दृश्यते यस्मिन् अश्वाः। कीदृशः देवः सूर्यः - विचक्षणः - सर्वस्य प्रकाशयिता - प्रकाशकः। ईदृशं सूर्यं विश्वदर्शनाय अश्वाः वहन्ति।

९. 'अयुक्त सप्त शुन्ध्युवः' इति नवममन्त्रस्य पाठः-

अयुक्त सप्त शुन्ध्युवः सूरो रथस्य नप्त्यः।

ताभिर्याति स्वयुक्तिभिः।।९।।

पदपाठः-

अयुक्त। सप्त। शुन्ध्युवः। सूरः रथस्य। नप्त्यः। ताभिः। याति। स्वयुक्तिऽभिः।।9।।

व्याख्या-

सूरः-सर्वस्य प्रेरकः सूर्यः शुन्ध्युवः - विशुद्धाः, सप्त-सप्तसङ्ख्याकाः रथस्य अश्वाः सन्ति। कीदृशो रथः? नत्यः - न पातयितव्यः आकाशे गच्छन् सन्

नहि पतति-एतादृशो रथोऽस्ति। तस्मिन् रथे सप्त अश्वाः अयुक्तः - नियुक्तः। एवं भूताभिस्ताभिरश्वैः स्वयुक्तिभिः स्वकीये रथे योजयते। एतादृशेन रथेन याति।

१०. 'उद्वयं तमसस्परि' इति दशममन्त्रस्य पाठः-

उद्वयं तमसस्परि ज्योतिष्पश्यन्त उत्तरम्।

देवं देवत्रा सूर्यमगन्मज्योतिरुत्तमम्।।१०।।

पदपाठः -

उत् । वयम् । तमसः । परि । ज्योतिः । पश्यन्तः। उत्ऽतरम् । देवम् । देवऽत्रा । सूर्यम्। अगन्म। ज्योतिः। उत्ऽतमम् ।।10।।

व्याख्या -

वयम् - यजमानाः तमसस्परि रात्रेरुद्धवं वत्र्तमानं तमसः पापात् - मनुष्यलोकात् वा उपरि वत्र्तमानं वैकुंठलोकं पश्यन्तः - अवलोकयन्तः - अगन्म प्राप्नुयाम अथवा उपरि वत्र्तमानं सूर्यं - भगवन्तं सूर्यम् अगन्म-प्राप्नुयाम्। ज्योतिरुत्तमम् - तेजस्विनम् - उत्तमम् - उत्कृष्टतमम्। देवत्रा - देवेष मध्ये देवं दानादिगुणयुक्तम् सूर्यं पश्यतः स्तुतिभिर्होमादिभिश्चोपासीना सन्तः, उत्कृष्टतमं ज्योतिः सूर्यरूपमगन्म। यथा उपासते तथैव भवति। इति वचनात् सूर्योपासकाः सूर्यमेव गच्छन्ति तेजयुक्ताः भवनित अत एव उक्तमस्ति ''सूर्यमगन्मज्योतिरुत्तमम्''।

११. ''उद्यन्नद्य मित्रमह'' इति एकादशमन्त्रस्य पाठः-

उद्यन्नद्यं मित्रमह आरोहन्नुत्तरां दिवम्।

हृद्रोगं मम सूर्य हरिमाणं च नाशय।।११।।

पदपाठः-

उत्ऽयन्। अद्य। मित्रऽमहः। आऽरोहन्। उत्ऽतराम्। दिवम्। हृतऽरोगम्। मम । सूर्य। हरिमाणम्। च । नाशय।।1।।

व्याख्या-

हे सूर्य! सर्वप्रेरक! मित्रमहः - सर्वेषामनुकूलदीप्तियुक्तः, अद्य 7 अस्मिन् काले उद्यन् - उदयं गच्छन्, उत्तराम् - उत्कृष्टं, दिवं - द्युलोकम्, आरोहन् - अभिमुख्येन प्राप्नुवन् दिवमुत्कर्षेण प्राप्नुवन्। हे सूर्यः! मम अस्माकं यजमानानां हृद्रोगं - हृदयगतव्याधिं शरीरगतं रोगं, हरिमाणम् आहरणीयम् - दूरीकरणीयं वर्तते तथा बाह्यरोगमपि विनाशय, हृद्गतं बाह्यंच सर्वरोगं विनाशय। उभयविधात् सर्वविधात् रोगात् रक्षतु।।

१२ .'शुकेषु मे हरिमाणम्' इति द्वादशमन्त्रस्य पाठः-

शुकेषु मे हरिमाणं रोपणाकासु दध्मसि।

अथो हारिद्रवेषु मे हरिमाणं न दध्मसि।।१२।।

पदपाठः-

शुकेषु। मे। हरिमाणम्। रोपणाकासु। दध्मसि। अथो। इति। हरिद्रवेषु। मे। हरिमाणम्। नि । दध्मसि।।12।।

व्याख्या-

मे-मदीयं, हरिमाणं - शरीरगतं हरिवर्णं शुकेषु तादृशं वर्णं कामयमानेषु पक्षिषु तथा रोपणाकासु - शारिकासु पक्षिविशेषेषु दध्मसि स्थापयामः। अथापि च हारिद्रवेषु - हरितद्रु-मेषु तादृशवर्णवत्सु मे - मदीयम् हरिमाणम् - हरितवर्णं निश्चयेन दध्मसि स्थापयामः।

१३. 'उदगादयमादित्यो' इति त्रयोदशमन्त्रस्य पाठः-

उदगादयमादित्यो विश्वेन सहसा सह।

द्विषन्तं मह्यं रन्धयन्मो अह द्विषते रधम्।।१३।।

पदपाठः-

उत्। आगात्। अयम्। आदित्यः। विश्वेन। सह। द्विषन्तम्। मह्यम्। रन्धयन्। मो। इति। अहम्। द्विषते। रधम्।।13।।

व्याख्या-

अयमिति आकाशे दृश्यमानः सूर्यः 7 रसानादत्ते इति आदित्यः, सूर्यो विश्वेन सर्वेण सहसा सह - बलेन सह उद्गात - उदयं प्राप्तवान् - किं कुर्वन् मह्यम् - मदीयं द्विषतम् - उप्रदवकारिणं रन्धयन् - हिंसन् हिंसां कुर्वन्। अहं द्विषते - द्विषकारिणे जनाय मो - मैव रधं - हिंसां करोमि। सूर्य एव अस्माकं रोगं विनाशयतु अहं स्वस्थो भवेयम्।।

उषसूत्तं

उषो वाजेन वाजिनि प्रचेताः

स्तोम् जुषस्व गृणतो मघोनि।

पुराणी देवि युवतिः पुरन्धि

रनुव्रतं चरसि विश्ववारे।।१।।

पदपाठः- उषः। वाजेंना वाजिनि। प्रऽचेताः। स्तोमम् जुषस्व। गृणतः।। मघोनि। पुराणी।

देवि। युवतिः। पुरम् ऽधिः। अनु। व्रतम् चरसि। विश्ववारे।।

अन्वयः- वाजेन वाजिनि मघोनि उषः प्रचेताः गृणतः स्तोम् जुषस्व। विश्ववारे देवि पुराणी युवतिः पुरंधिः व्रतम् अनुचरसि।

व्याख्या- वाजेन वाजिनि अन्नेनान्नवति। मघोनि धनवति। हे उषः प्रचेताः प्रकृष्टज्ञान-वती सती त्वं गृणतः त्वं स्तोत्रं कुर्वतः स्तोतुः स्तोम् स्तोत्रं जुषस्व सेवस्व। यद्वा वाजेन हविर्लक्षणेनान्नेन सह स्तोम् जुषस्व इति सम्बन्धः। विश्ववारे विश्वैः सर्वैः वरणीये हे उषः देवि पुराणी पुरातनी। युवतिः इत्युपमा। तद्वत् शोभमाना। पुरंधिः पुरु बहुधीः स्तोत्रलक्षणं कर्म यस्याः सा बहुस्तोत्रवती। पुरंधर्बहुधीः इति यास्कः, पुरन्धिः शोभमाना वा। एवं-विधगुणोपेता त्वम् अनुव्रतं यज्ञकर्माभिलक्ष्य चरसि यष्टव्यतया वर्तसे।।

सरलार्थः- अन्नद्वारा अन्नवति धनवति हे उषे! प्रकृष्टज्ञानसम्पन्ना भवती स्तूयमानस्य जनस्य प्रार्थनां स्वीकरोतु। हे सर्वैः इष्यमाणे देवि उषे! पुरातनी युवतिः इव नानाप्रकारैः स्तूयमाना भवती इम् यज्ञं लक्षीकृत्य विचरणं करोतु।

उषो देवमर्त्या वि भाहि

चन्द्ररंथा सूनृता ईरयन्ती।

आ त्वां वहन्तु सुयमा अश्वा

हिरण्यवर्णा पृथुपाजसो ये।।२।।

पदपाठः- उषः। देवि। अमर्त्या। वि। भाहि। चन्द्रऽरंथा। सूनृता। ईरयन्ती।। आ। त्व। वहन्तु।

सुऽयमासः। अश्वाः। हिरण्यवर्णाम् पृथुऽपाजसः। ये।।

अन्वयः- उषः देवि अमर्या चन्द्ररथा सूनृता ईरयन्ती वि भाहि। पृथुपाजसः सुयमासः ये अश्वाः हिरणवर्णी त्वा आ वहन्तु।।

व्याख्या- हे उषो देवि अमर्त्या मरणधर्मरहिता चन्द्ररथा सुवर्णमयरथोपेता सूनृता प्रियसत्यरूपा वाचः ईरयन्ती उच्चारयन्ती। तादृशी त्वं वि भाहि सूर्यकिरणसम्बन्धात् विशेषेण दीप्यस्व, पृथुपाजसः प्रभूतबलयुत्ता अरुणवर्णा ये अश्वा विद्यन्ते सुयमासः सुष्टु नियन्तुं शक्या रथो योजितास्तेऽश्वाः हिरण्यवर्णा त्वा त्वाम् आ वहन्तु।।

सरलार्थः- हे देवि उषे! मरणधर्मरहिता सुवर्णमयरथयुत्ता सत्यं प्रियां वाणी च उच्चारयन्ती भवती विशेषरूपेण प्रकाशिता भवतु। प्रभूतवलयुत्ताः सुनियन्त्रिताः भवत्याः ये अश्वाः ते स्वर्णिमवर्णयुत्तां भवन्तीम् अत्र आनयन्तु।

उषः प्रतीची भुवनानि विश्वो

र्ध्वा तिष्ठस्यमृतस्य केतुः।

समानमर्थं चरणीयमाना

चक्रमिव नव्यूस्या ववृत्स्व।।३।।

पदपाठः- उषः। प्रतीची। भुवनानि। विश्वा। ऊर्ध्वां। तिष्ठसि। अमृतस्य। केतुः।। समानम्।

अर्थम् चरणीयमाना। चक्रम्ऽईव। नव्यसि। आ। ववृत्स्व।।

अन्वयः- उषः विश्वा भुवनानि प्रतीची अमृतस्य केतुः ऊर्ध्व तिष्ठसि, नव्यसि समानं चरणीयमाना चक्रमिव आ ववृत्स्व।

व्याख्या- हे उषः देवि सर्वाणि भुवनानि प्रतीची। प्रति आभिमुख्येनाञ्चति प्राप्नोतीति प्रतीची। अमृतस्य मरणधर्मरहितस्य सूर्यस्य केतुः प्रज्ञापयित्री त्वम् ऊर्ध्वा नमस्युन्नता तिष्ठसि। नव्यसि पुनः पुनर्जायमानतया नवतरे हे उषो देवि, अर्थम् अर्यते गम्यतेऽस्मिन्नित्यर्थो मार्गः। समानम् एकमार्गमुदयात् प्राचीनकाललक्षणं चरणीयमाना चरितुमिच्छन्ती त्वम् आ ववृत्स्व पुनस्तस्मिन् मार्गे आवृत्ता भव। तत्र दृष्टान्तः। चक्रमिव। यथा नभसि चरितुः सूर्यस्य रथाङ्गं पुनः पुनरावर्तते तद्वत्।।

सरलार्थः- हे देवि उषे! समस्तस्य लोकस्य पुरस्तात् आगच्छन्ती मरणधर्मरहितस्य सूर्यस्य आगमनवार्ता ज्ञापयन्ती भवती आकाशमध्ये तिष्ठति। हे सर्वदा नवीना तिष्ठन्ति, एकस्मिन् एव मार्गे विचरणं कुर्वन्ती भवती चक्रवत् वारं वारम् आगच्छतु।

अव स्यूमेव चिन्नती मघो

न्युषा याति स्वसंरस्य पत्नी

स्वर्जनन्ती सुभगा सुदंसा

आन्ताद्दिवः पप्रथ आ पृथिव्याः।।४।।

पदपाठः- अव स्यूमऽइव। चिन्नती। मघोनी उपा। याति। स्वसंरस्य। पत्नी।। स्वः।

जनन्ती।

सुऽभगा। सुऽहंसा:। आ। अन्तात्। दिव:। प्रपथे। आ। पृथिव्या:।।

अन्वय:- स्वसरस्य पत्नी मघोनी उषा स्यूम इव अव चिन्वती याति, स्व: जनन्ती सुभगा सुदंसा दिव: आ अन्तात् पृथिव्या: पप्रथे।

व्याख्या- येयम् उषा स्यूमेव वस्त्रमिव विस्तृतं तम: अवचिन्वती अवचयमपक्षयं प्रापयन्ती मघोनी धनवती स्वसरस्य सुष्टुवस्यति क्षिपति तम इति स्वसरा सूर्यो वासरो वा। तस्य पत्नी सती याति गच्छति। स्व: स्वकीयं तेज: जनन्ती जनयन्ती सुभगा सुधना सौभाग्ययुत्ता वा सुदंसा शोभनाग्निहोत्रकर्मा सेयमुषा दिव: द्युलोकस्य आ अन्तात् पृथिव्या: च आ अन्तात् अवसानात् पप्रथे प्रथते प्रकाशते इत्यर्थ:।

सरलार्थ:- सूर्यस्य भार्या, धनयुत्ता उषा देवी वस्त्रमिव विस्तृतम् अन्धकारं नाशयन्ती गमनं करोति। स्वतेज: उत्पादयन्ती सुन्दरी धनयुत्ता सुन्दराग्निहोत्रादियज्ञानुष्ठानं कारयन्ती उषादेवी द्युलोकस्य पृथिवीलोकस्य च अन्तं यावत् स्वप्रकाशेन अन्धकारं नाशयति।

अच्छा वो देवीमुषसं विभूतीं

प्र वो भरध्वं नमसा सुवृत्तिम् ।

ऊर्ध्वं मधुधा दिवि पाजो अश्रे

त्प्र रोचूना रुरुचे रण्वसंदृक् ।।५।।

पदपाठ:- अच्छं। व:। देवीम् उषसम् विऽभूतीम् प्रा व:। भरध्वम् नमसा। सुऽवृत्तिम् ।।

ऊर्ध्वम् मधुधा। दिवि पाज:। अश्रेत्। प्र। रोचना। रुरुचे। रण्वसंदृक् ।।

अन्वय:- व: अच्छ विभातीम् उषसं देवीं व: नमसा सुवृत्तिं प्रभरध्वम् मधुधा दिवि ऊर्ध्वं पाज: अश्रेत रण्वसंदृक् रोचना प्ररुरुचे।

व्याख्या- हे स्तोतार: व: युष्मान् अच्छ अभिलक्ष्य विभातीं शोभमानाम् उषसं देवीं प्रति व: युष्माकं सम्बन्धिना नमसा नमस्कारेण सह सुवृत्तिं शोभनां स्तुतिं प्रभरध्वं यूयं कुरुत। मधुधा मधुराणि स्तुतिलक्षणानि वाक्यानि दधतीति। मधु: सोम:। तं धारयतीति वा। यद्वा। मधुधादित्यधात्री। यद्वा। अवग्रहाभावादव्युत्पन्नावयवम् अखण्डमिदं पदम्, उषो नाम सेयमुषा दिवि नभसि ऊर्ध्वं पाज: ऊर्ध्वाभिमुखं पाजस्तेज: अश्रेत् श्रयति तथा रोचना रोचनशीला रण्वसंदृक् रमणीयदर्शनोषा: प्र रुरुचे प्रकर्षेण यद्वा रोचना लोकान् प्ररुरुचे प्रकर्षेण स्वतेजसा दीपयति।

सरलार्थ:- (हे स्तोतासमूह) यूष्मान् लक्ष्यीकृत्य प्रकाश्यमानाम् उषादेवीं प्रति यूयं यूष्माकं नमनयुत्तां सुन्दरस्तुतिं समर्पयन्तु। मधु धारयन्ती उषा देवी द्युलोके ऊर्ध्वं प्रति स्वप्रकाशं प्रसारयति। रमणदर्शनयुत्ता उषा देवी जनान् अत्यधिकं प्रकाशयति।

ऋतावरी दिवो अर्कैरबो

ध्या रेवती रोदसी चित्रर्मस्थात्।

आयतीमग्न उषसं विभातीं

वाममेषि द्रविणं भिक्षमाण:।।६।।

पदपाठ:- ऋतऽवरी। दिव:। अर्कै:। अबोधि। आ। रेवती रोदसी इति चित्रम् अस्थात्।।

आऽयतीम् अग्ने। उषसम् विऽभूतीम् वामम् एपि। द्रविणम् भिक्षमाण:।।

अन्वय:- ऋतावरी दिव: अर्कै: अबोधि। रेवती रोदसी। चित्रम् अस्थात्। अग्ने! आयतीं विभातीम् उषसं भिक्षमाण: वाम् द्रविणम् एषि।।

व्याख्या- ऋतावरी सत्यवती येयमुषा दिव: द्युलोकात् अर्कै: तेजोभि: अबोधि सर्वैर्जायते। तत: रेवती धनवती येयं रोदसी द्यावापृथिव्यौ चित्रं नानाविधरूपयुत्तं यथा भवति तथा अस्थात् सर्वतो व्याप्य तिष्ठति। हे अग्ने आयतीं त्वदभिमुखमागच्छन्तीं विभाती भासमानाम् उषसम् उषेदेवीं भिक्षमाण: हवींषि याचमानस्त्वं वाम् वरणीयं द्रविणम् अग्निहोत्रादिलक्षणं धनम् एषि प्राप्नोषि।

सरलार्थ:- सत्यवती उषा द्युलोकात् प्रसारितेन तेजसा ज्ञायते। धनवती उषादेवी द्युलोकं पृथिवीलोकं च विवधै: प्रकारै: व्याप्य तिष्ठति। हे अग्निदेव भवत: सम्मुखं प्रति आगच्छन्त्या: उषादेव्या: । याचमान: वरणयोग्यं धनं प्राप्नोति।

ऋतस्य बुध्न उपसमिषण्यन

वृषा मही रोदसी आ विवेश।

मही मित्रस्य वरुणस्य माया

चन्द्रेव भानुं वि दधे पुरुत्रा।।७।।

पदपाठ:- वृषा ऋतस्य बुध्ने। उषसाम् इषण्यन् वृषा। मही इति। रोदसी इति। आ। विवेश।।

मुही। मित्रस्य वरुणस्य। मया। चन्द्राऽईव। भानुम् विऽधे। पुरुत्रा।।

अन्वय:- वृषा ऋतस्य बुध्ने उषसाम् इषण्यन् मही रोदसी आ विवेश। मित्रस्य वरुणस्य मही माया चन्द्रा इव भानुं पुरुत्रा विदधे।

व्याख्या- वृषा वृष्टिद्वारा अपां प्रेरक आदित्य: ऋतस्य अग्निहोत्रादिककर्मकरणे सत्यभूतस्याह्न: बुध्ने मूले उषसामिषण्यन् प्रेरणं कुर्वन् मही महत्यौ रोदसी द्यावापृथिव्यौ आ विवेश स्वतेजोभि: सर्वत: प्रविष्टवान यद्वा वृषा वर्षितेषण्यन् सर्वतो गच्छन्नुषसां सम्बन्धी रश्मिसमूहो रोदसी द्यावापृथिव्यौ विष्टवानिति योजनीयम् तत: मही महती मित्रस्य वरुणस्य मित्रावरुणयो: माया प्रभारूपा सती चन्द्रेव सुवर्णानीव भानुं स्वप्रभां पुरुत्रा बहुषु देशेषु विदधे विदधाति सर्वत्र प्रसारयति।

सरलार्थ:- वृष्टिद्वारा जलस्य प्रेरक: सूर्य: प्राकृतिकनियमानुसारं दिनस्यादौ उषां प्रेरयित्वा द्युलोके पृथिवीलोके च व्याप्त: जात:। मित्राणां वरुणदेवतानां च महती प्रभास्वरूपिणी उषा स्वर्णिमकान्ति: इव सूर्यं बहुषु स्थानेषु प्रसारितं करोति।

उषस्स्वरूपम्

सम्पूर्णे ऋग्वेदे प्राय: विंशत्यां सूक्ते उषस्-देव्या: स्तुति: विहिता। प्रकाशर्थकात् वस्-धातो: उषस्-शब्दो निष्पद्यते। तस्मात् उषस्-शब्दस्य अर्थो भवति प्रकाशमाना देवी इति। उषा देवी जरामरणरहिता इति ऋषिभि: वर्णिता। तस्या: स्वरूपम् अविनाशि वर्तते, परन्तु बहुत्र स्थलेषु द्युलोकस्य दुहितृत्वेन अस्या: वर्णना प्राप्यते। उषा देवी हि सुजाता अर्थात् तस्या: जन्म उच्चवंशे अभवत्। सम्पूर्णवैदिकसाहित्ये उषस्-देव्या: यत् मनोहरं स्वरूपं वर्णितं, तादृशं स्वरूपं तु न अन्यस्या: कस्याश्चित् देव्या: वर्तते। प्रात:कालस्य अधिष्ठात्रीदेवीरूपेण उषा चित्रिता। सूर्योदयात् किञ्चित् प्राक् य: समय: वर्तते, स एव उषस्-देव्या: आगमनसमय इत्युच्यते। अग्ने: अपि उषस्-देव्या: प्रेमित्वेन वर्णना प्राप्यते। अन्नद्वारा अन्नवती तथा धनवती हि उषा देवी। सर्वैरेव ज्ञायमाना इयं पुरातनी युवति: इव भाति, विविधोपायेन स्तूयमाना एषा यज्ञम् उद्दिश्य विचरति। सुवर्णमये रथे आरूढा इयं सदा प्रियं तथा सत्यम् एव भाषते। प्रभूतबलयुत्ता: सुष्टुतया नियन्त्रिता: स्वर्णिमरङ्गविशिष्टा: तस्या: अश्वा: तां यज्ञस्थलं प्रापयन्ति।

निखिलमनुष्याणां सम्मुखं गन्त्री मरणधर्मरहिता सूर्यागमनविषयकज्ञानदायिका इयं देवी आकाशे तिष्ठति। प्रत्यहम् एकवारम् एव उदयकारणात् इयं सदैव नवीना एव तिष्ठति। समाने एव मार्गे विचरन्ती इयं चक्रवत् पौन:पुन्येन आगच्छति। सूर्यस्य पत्नी प्रचुरधनयुत्ता उषा देवी अन्धकारं नाशयन्ती विचरति। स्वस्या: तेजसम् उत्पादयन्ती सुन्दरधनविशिष्टा इयम् अग्निहोत्रम् आचरति। उषा देवी प्रत्यहं द्युलोकस्य अन्त: यावत्

प्रकाशिता भवति। यज्ञे सोमस्य धारिका इयं उषा देवी द्युलोकस्य उपरि स्वस्याः तेजसः प्रसारं करोति। रमणीयदर्शनयुत्ता इयम् उषा देवी सम्पूर्णस्य जगतः प्रकाशं करोति। सत्यवती इयं देवी स्वस्याः तेजःप्रभावात् अस्मिन् जगति ख्याता। धनयुत्ता इयं विविध-प्रकारेण द्युलोकं पृथिवीलोकं च व्याप्य स्थिता। उषा देवी अस्मिन् जगति वृष्टिमाध्यमेन जलं प्रापयति। मित्रस्य वरुणस्य च प्रभास्वरूपा अथवा शक्तिस्वरूपा उषा देवी सूर्यम् अनेकस्थाने प्रसारितं करोति।

उषस्सूक्तस्य सारः

ऋग्वेदीयसमाजः पुरुषप्रधानः आसीत्। तत्र मन्त्राणाम् अधिष्ठातृरूपेण पुरुषदेवतायाः समधिकं प्राधान्यं परिलक्ष्यते। केषुचित् सूक्तेषु स्त्रीदेवतानाम् अपि स्तुतयः लभ्यन्ते परन्तु तासां स्तुतीनां संख्याः पुरुषापेक्षया न्यूनाः। कर्मवैचित्र्यानुसारं हि स्त्रीदेवताः पुरुषसमकक्षतां न भजन्ते। ताः अन्येषां देवानां कन्या, जाया, जननी वा भवन्ति। यद्यपि तासां स्वकीया महिमा विद्यते तथापि पुरुषदेवतानां समीपे तासां महिमा म्लायते यथा चन्द्रस्य पुरस्तात् अन्येषां नक्षत्राणाम् समासेन वत्तुं शक्यते वैदिकपुरुषतान्त्रिकसमाजस्य नारीपुरुषसम्बन्धस्य चित्रं देवसमाजोपरि सम्यक् प्रतिफलितम्।

ऋग्वेदे यत्र देवीनां स्तुतयः विद्यन्ते तत्र एकः विषयः दृष्टिम् आकर्षयति तद्धि, ऋषीणां कवित्वभावना, सौन्दर्यचेतना च। प्राकृतिकरूपमाधुर्यम् एव सौन्दर्यभावनायाः प्रधानः उत्सः। न प्रकृतेः रुद्ररूपेषु परन्तु कोमल-मधुर-रसमयेषु रूपेषु एव नारीणां चिरन्तनं रूपं परिलक्षितम् ऋषिभिः। तदर्थम् एव प्रवाहिता स्रोतस्विनी, शस्यश्यामला पृथिवी, आलोकमयी उषा, अन्धकाररूपिणी रात्री, पवित्रतास्वरूपिणी सरस्वती च एताः सर्वाः ऋषिकल्पनायां देवीरूपेण ख्याताः। तासां रूपवर्णनायाम् ऋषीणाम् अलौकिक-कविभावनायाः सौन्दर्यभावनायाः सहृदयभावनायाः च परिचयः प्राप्यते।

एतादृशी एका देवी उषा। ऋग्वेदीयदेवीषु सा अन्यतमा। ऋग्वेदस्य पञ्चममण्डलस्य अशीतितम् सूत्तम् उषस्सूत्तम् अत्र सत्यश्रवा ऋषिः, उषा देवता, त्रिष्टुप् छन्दः। अन्यासां देवीनाम् अपेक्षया तस्याः एव स्तुतिः अधिकसंख्यकसूत्तैः कृता। स्वर्गदुहिता उषा द्यु-लोकस्य अधिष्ठात्री देवी। प्रभाते सूर्योदयस्य पूर्वमूहूर्ते पूर्वगगने या मनोरमा अरुणवर्णीया आलोकच्छटा दिशः रञ्जयति सा हि अस्माकम् उषादेवी। उषोदये रात्रेः अन्धकारः शनैः अपसरति, पक्षीणां कूजनं रात्रेः निस्तब्धतां दूरीकरोति। उषायाः एनं महिमानं लक्षीकृत्य कविः अस्याः वन्दनां करोति। सा हि दिवो दुहिता (५.८०.५-६)। इति।।

ऋग्वेदे स्तूयमाना उषा ऋषिकल्पनायां रूपलावण्यवती काचित् तरुणी। सा दीप्तिमती(भास्वती), शुक्लवसना युवती(युवतिः शुक्रवासाः)। तस्याः वक्षस्थलम् अनावृतं, दर्शनाय सा सर्वदा स्वकीयं शरीरं प्रकाशयति(१.१२३.११)। सूर्यदेवः

तस्या: प्रणयी। मर्त्यलोकेषु कश्चिद् युवा यथा कामपि कन्यकाम् अनुसरति तथैव सूर्य: अपि उषादेव्या: पश्चाद् गच्छति। तथाहि आम्नातम् सूर्यो देवीमुषसं रोचमानां मर्यो न योषामभ्येति पश्चात्।। (१.१२५.२)। इति।

उषा पुन: अश्विनीकुमारद्वयस्य सखी। उषाया: पश्चात् सूर्यस्य आविर्भावं परिलक्ष्य केचन कथयन्ति यत् सा सूर्यदेवस्य जननी। उषाया: देवीसत्ता सुस्पष्टा ऋग्वेदमन्त्रेषु। सा ऋतावरी, सत्यवती, सुनृतानां नेत्री च। सा रोगस्य नाशकारिणी, जगतां सुखकारिणी, विचित्रगतिमती। सा यजमानेभ्य: धनं प्रददाति। प्रदीप्ते रथे आरूढा सा विश्वं व्याप्नोति। तस्या आगमनेन जीवजगति प्राणानां स्फुरणं भवति। नर्तकी यथा रात्रे: अन्धकार दूरीकुर्वन् आविर्भवति तथैव आलोकमयी उषा रात्र्यन्धकारं नाशयति दिशश्च प्रकाशयति। तथाहि आम्नातम् अधि पेशांसि वपते नृतुरिव। (१.९२.४)।

द्य सा निद्राया: जीवजगत् जागरयति। सा प्राणदायिनी मुक्तिदायिनी। सूर्यस्य आगमनवार्ता तया एव उद्घोष्यते। सा एव पृथिव्या: पूर्ति विदधाति। उषाया: गतिं परिलक्ष्य एव कालस्य गति:, सा चिरतरुणी अनवद्या च। अत: तस्या: स्तुतिपरायणा: सर्वे देवा: इति शम्।

सूक्तमिदम् ऋग्वेदस्य तृतीयस्य मण्डलस्य एकषष्टितमम्। अस्य सूक्तस्य वामदेवऋषि: उषादेवता त्रिष्टुप् छन्दश्च। अत्र भगवतीम् उषादेवी लक्षीकृत्य प्रार्थना विधीयते। तत्र आदिमे मन्त्रे प्रार्थना विधीयते यत् सर्वै: इष्यमाणा स्तूयमाना च देवी उषा आयोज्यमानं यज्ञं लक्षीकृत्य विचरतु इति। द्वितीये मन्त्रे प्रार्थ्यते यत् नानागुणयुत्ता उषा देवी प्रकाशिता भूत्वा तस्य अश्वानां रथम् आरुह्य यज्ञस्थलम् आगच्छतु इति। तृतीये मन्त्रे प्रार्थ्यते आकाशमध्यस्थिता भगवती उषा वारं वारं चक्रवत् आगच्छतु इति। चतुर्थे मन्त्रे कथम् उषादेवी स्वप्रकाशेन द्युलोकस्य पृथ्वीलोकस्य च अन्धकारं नाशयति इति वर्णितम् अस्ति। पञ्चमे मन्त्रे जनै: स्तूयमाना मधुधारयन्ती उषादेवी कथं जनान् कथम् अत्यधिकं प्रसारयति इति वर्णितम् अस्ति। षष्ठे मन्त्रे उषादेवी कथं ज्ञायते कथं द्युलोकं पृथ्वीलोकं च व्याप्य तिष्ठति इत्यादिकं वर्णितमस्ति। सप्तमे मन्त्रे कथं सूर्यदेव: द्युलोके पृथ्वीलोके च व्याप्त: भवति कथं च उषादेवी सूर्यं सर्वत्र प्रसारयति इत्यादिकं वर्णितमस्ति।

हिरण्यगर्भसूत्तम्

ऋषिभि: तपसा दिव्यचक्षुर्भ्यां यद् ज्ञानं लब्धं य: शब्दराशि: अधिगत:, स वेद:। इन्द्रियाणां वैकल्यवशात् इन्द्रियजन्यज्ञाने भ्रमप्रमादादिकं सम्भवति परन्तु इन्द्रियातीतं ज्ञानं न केनापि दुष्टेन इन्द्रियेण भवति। अत: तद् ज्ञानं भ्रमप्रमादादिदोषवर्जितमेव भवति। अत एव वैदिकज्ञानम् अद्यापि भ्रमरहितं वर्तते। इदमेव आश्चर्यं यत् कथं ते ऋषय: पुरा इदं ज्ञानं

लब्धवन्तः। स्यादेतत् चतुषु भेदेषु भिन्नो वेदः ऋग्वेदः यजुर्वेदः सामवेदः अथर्ववेदश्चेति। तेषु ऋग्वेदे देवतास्तुतिः वर्तते। तस्यैव अंशभूतमिदं हिरण्यगर्भसूत्तम् अत्र उपादीयते।

ऋग्वेदीयदेवतास्वरूपाणाम् अध्ययनकाले स्पष्टमेव ज्ञायते यत् ऋग्वेदे एकस्याः एव परमसत्तायाः स्तुतिः विविधनाम्ना अक्रियत। एतत् किमर्थं भवति इति चेत् वत्तुं शक्यते यत् सर्वेषां देवानां गुणसाम्यात् हिरण्यगर्भस्य स्वरूपमपि अस्य तत्त्वस्य अपवादभूतं नास्ति। बहुयुगेभ्यः पूर्वं सम्पूर्णा सृष्टिः एकेन महता जलसमूहेन व्याप्ता आसीत् तस्मात् देवतास्वरूपः तथा बीजभूतः हिरण्यगर्भः नूतनसृष्ट्यर्थं आविर्बभूव। हिरण्यगर्भ एव प्रजापतिः इति नाम्ना विख्यातः। वैदिकाः ऋषयः स्वस्य उपास्यदेवं सदैव अपूजयन्। ते सर्वकार्यसिद्ध्यर्थं स्वोपास्यदेवम् आह्वयन्ति। ते प्रजापतिम् आह्वयन्तः वदन्ति हे सत्यधर्मन् प्रजापते, त्वं पृथिवीं तथा द्युलोकं च उत्पादितवान्, आनन्दकारिणं चन्द्रमसं समस्तजलसमूहं च उत्पादितवान्, अतः अस्मान् मा पीडया हे प्रजापते, अन्यः कश्चित् एनं समग्रम् उत्पन्नं पदार्थं न व्याप्तवान्। वयं याम् इच्छाम् आधारीकृत्य हविः ददामः सा इच्छा पूरिता भवेत्। एवमेव आसीत् प्रजापतेः तथा हिरण्यगर्भस्य पूजनीयता। तद्विषयकम् एव एतत् सूत्तम् अस्य सूत्तस्य हिरण्यगर्भः प्राजापत्य ऋषिः, त्रिष्टुप् छन्दः, प्रजापतिर्देवता। ऋग्वेदीयम् इदं सूक्तं दशममण्डले अन्तर्भवति। अस्मिन् दश ऋचः सन्ति। अतः दशर्चमिदं सूक्तम्।

ज्ञानार्थकाद्विद्-धातोः वेद इति शब्दो निष्पद्यते। आद्युदात्तो वेदशब्दो ग्रंथवाची किंवा ज्ञानवाची, अंतोदात्तश्च वेदशब्दो कुशमुष्टिवाचीति शास्त्रेषूक्तमिति। ग्रंथवाचकेन वेदशब्देन चतसृणां मंत्रसंहितानां ऋग्यजुस्सामाथर्वसंज्ञकानां बोधो जायते। अलौकिक-सामर्थ्य-शालिभिः ऋषिभिः दिव्यया प्रतिभया मन्त्राणां दर्शनं कृतम्। तदुक्तमपि - **युगान्तेऽन्तर्हितान् वेदान् सेतिहासान् महर्षयः। लेभिरे तपसा पूर्वमनुज्ञाता स्वयम्भुवा।। तथा च अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा। आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः।** इत्यादिभिः श्रौतस्मार्तचवचनैरिदं सुस्पष्टं भवति यद्वेदः परमात्मनोऽन्तःकरणे सदा सूक्ष्मभावेन तिष्ठति। यदा सः परमात्मा जगदिदं स्त्रष्टुं प्रयत्नशीलो भवति तदा प्रथमं स्वान्तः विद्यमानैः ऋगादिवेदैरेव सृष्टिमारभते। तदुक्तमपि श्रुतौ-

ऋग्भ्यो जातां सर्वशो मूर्तिमाहुरन्या गतिर्याजुषी हैव शश्वत्।

सर्वं तेजः सामरूपं हि शश्रवत् सर्वं हीदं ब्रह्मणा हेव सृष्टम्।।

ऋचं वाचं प्रपद्ये मनो यजुः प्रपद्ये सामप्राणं प्रपद्ये।।

सैषा त्रय्येव विद्या तपति।

अत्र सर्वासां मूर्त्तीनां ऋग्जन्यत्वमुक्तम्, तत्र गतिरूपत्वं यजुषः, साम्नः ते-

जोरूपत्वमिति। ऋग्वेदस्य च वाग्रूपत्वं प्रतिपादितम्। वाचो ब्रह्मरूपत्वमप्युक्तम्। यथा-वाग्वै। ब्रह्म तस्यै वाचः सत्यमेव ब्रह्म। ता वा एता सत्यमेव व्याहृतयो भवन्ति (श.प.ब्रा.-२/१/४/१०) इति। अत एवोक्तं यदि वै प्रजापतेः परमस्ति वागेव तत् (श.प.ब्रा-५/१/३/११) इति। सा च वाक् वर्णत्रयविशिष्टा अकारोकारमकाररूपा प्रणवात्मके अक्षरब्रह्माणि सर्वदा सर्वकालेषु तिष्ठति। तयैव वाचा सः परमात्मा सर्वमिदं जगत्सृजति। तदुक्तमैतरेयेण-**वाचा वै वेदाः संधीयन्ते। वाचा च्छन्दांसि। वाचा मित्राणि संदधति। वाचा सर्वाणि भूतान्यथो वागेवेदं सर्वमिति।** (ऐ.आ.-३/१/६)

अर्थाद् परमात्मा ऋग्भावेन जगतो मूत्तिम्, यजुर्भावेन मन-स्वरूपां गतिम्, सामभावेन च रयिरूपं प्राणं व्यवस्थापयित्वा जगतो निर्माणं करोति। अत एव भगवता मनुना-व-दशब्देभ्य एवादौ पृथक् संस्थाश्च निर्ममे इत्युक्तम्।

तस्य ब्रह्मणो अपरपर्यायस्य शब्दराशिरूपस्य ओंकारपदाभिज्ञेयस्य वेदस्य साक्षात्कारः साक्षात्कृतधर्मभिर्महर्षिभिः कृतः। वेदमन्त्राणां दर्शनं तैः कृतं तस्मादेव एते ऋषय इत्युच्यन्ते। ऋषिर्दर्शनात् इति निरुक्तकारैरुक्तम्। तथ्यमिदं 'युगान्तेऽन्तर्हितानि' ति स्मृतिवाक्यैः पूर्वमुपस्थापितम्। स च वेदः पूर्वमेक एवासीत्, कालान्तरे भगवता वेदव्यासेन शिष्याणामुपदेशाय सुखग्रहणाय च वेदानां विभाजनं कृतमिति श्रूयते। तदुक्तमपि-वेदं तावदेकमतिमहत्वादुरध्येयं सन्तं तेषामल्पायुषामल्पग्रहणशक्तिकानां सुखग्रहणाय व्यासेनानेकशाखाभेदेन समाम्रातवन्तः। (निरुक्ते - 1/6/20 टिप्पण्याम्-2) यद्यपि अयं वेदविभागस्तु वेदमन्त्रेष्वप्युद्धृतमेव वर्तते। यथा-तस्माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे च्छन्दांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत इति मंत्रवर्णात् ऋग्यजुस्साम्नां च्छन्दसां च विभाजनं पूर्वमेव व्यासात्पूर्वं उत्पत्ति एव जातमासीदिति स्पष्टमवगम्यते। परमत्र चिन्त्यते यद्वेदशब्देन ब्रह्मणो बोधो भवति। तच्च ब्रह्म वेदगुप्तमित्याख्यातं प्रकाशानन्देन वेदांतसिद्धांतमुक्तावल्लयाम्। यथा-

यत्तत्वं वेदगुप्तं परमसुखतमं नित्यमुक्तस्वभावम्

सत्यं सूक्ष्मात्सुसूक्ष्मं महादिदममृतं मुक्तमात्रैकगम्यम्।

यस्यांशे लेशमात्रं जगदिदमखिलं भ्रान्तिमात्रैकदेहं

प्रत्यग्ज्योतिः स्वरूपं शिवमिदमधुना कथ्यते युक्तितोऽत्र।। (श्लोक-२४)

अस्य समस्तविकाससङ्घस्योत्पादकस्य ब्रह्मणः यन्मूलस्वरूपमस्ति तस्य वर्णनं ग्रंथात्मकेषु ऋगादिवेदेषु विद्यते। तस्मादृगादीनामध्ययनेन तत्तत्वस्य प्राप्तिर्भवतीत्युच्यते। तदुक्तमपि - ऋचो अक्षरे परमे व्योमन् यस्मिन्देवा अधिविश्वे निषेदुः। अर्थादृगपलक्षित-सर्ववेदसम्बधन्धिनि अक्षरे प्रणवरूपे ओंकारे परमे व्योम्नि विविध-मस्मिंछब्दजातमोतमिति

व्योम तस्मिन्नुत्कृष्टे स्थाने विश्वदेवा निवसन्ति। प्रणवस्य सर्ववेदसारत्वमुक्तं श्रुतौ - तान्वेदानव्रतपत्तेभ्योऽभितप्तेभ्यस्त्रयो वर्णा अजायन्ताकार उकारो मकार इति तानेकधा समभरत्तरदेतदो३मिति। (तै.ब्रा.पा-३ २) अत्र प्रणवस्य सर्वमन्त्रात्मकत्वात् मन्त्रेषु च सर्वदेवानां निवासात् ब्रह्माधिष्ठानत्वाद्वा सकलवाक्षु श्रेष्ठत्वं प्रतिपादितम्। न हि प्रणवादधिकं किंचिन्मंत्रजातमस्ति, त्रिकालातीतस्य ब्रह्मण: प्रतिपादकत्वात्। यच्चान्यर्त्तिकालातीतं तदप्योंकार एव। तस्मादोंकारोच्चारणेनारभ्यते वेदाभ्यास:। तस्याधीतवेदस्यार्थज्ञानमपि भवत्यपेक्षितम्, अर्थज्ञानाभावे न तस्य सम्यक्प्रयोगो भवति। तस्मान्निरुक्ते मन्त्रार्थज्ञानस्य प्रशंसाम् अर्थज्ञानहितस्य च निन्दां प्रकाशयता भगवता यास्केनोक्तम्-

स्थाणुरयं भारहार: किलाभूत् अधीत्य वेदं न विजानाति योऽर्थम्।

योऽर्थज्ञ इत्सकलं भद्रमश्नुते नाकमेति ज्ञानविधूतपाप्मा।।

अर्थात् वेदे पठयमानानामृचां सम्यगर्थबोधोऽपि नितरामपेक्षितो वर्तते तज्ज्ञानाभावे वेदमंत्राणां सम्यगुपयोगो न विधातुं शक्यते। अतस्तादृशा: पाठका: स्थाणुरिव भारवाहका एवोक्ता:। ये पुनरर्थज्ञास्ते अर्थज्ञानेन पापान् विधूय स्वर्गमाप्नुवन्ति। तेषामेव विषये प्रोवाच भगवान् मनु: वेदशास्त्रार्थतत्वज्ञ इति। तादृशा: अर्थज्ञानवन्तो वैदिका इह लोके तिष्ठन्नपि ब्रह्मभूयाय कल्पते इति। तेनेदं स्पष्टं भवति यद्यो हि मानवो वेदस्यार्थज्ञानेन सहाध्ययनं करोति स एव शब्दब्रह्मणि निष्णाततामवाप्य परब्रह्म अधिगन्तुं प्रभवति। वस्तुत: स्थूलेन सूक्ष्मतत्वस्य ज्ञानं क्रियते, कस्यचिदपि तत्वस्य सूक्ष्मं निरूपणं कर्तुं प्रथमं स्थूलस्यान्वेषणं भवत्यावश्यकम्। तद्धि स्थूलमेव सामान्यभाषयां तूलमित्युच्यते। तेनेदं फलितं यद्वेदो द्विविधस्तूलवेद: मूलवेदश्च। अतोऽधुना हिरण्यगर्भसूक्तस्यार्थज्ञानेन तूलवेदेन मूलस्य निरूपणं विधीयते।

हिरण्यगर्भसूक्तस्य परिचयो महत्वंच-

ऋग्वेदस्य दशमे मण्डले एकनवत्यधिकैकशतानि (191) सूक्तानि सन्ति। अस्मिन् मण्डलेऽनेकविधानि दार्शनिकसूक्तानि समुपलब्धानि सन्ति। तेष्वेकविंशत्युत्तरशततमं (121) सूक्तमिदं हिरण्यगर्भसूक्तमस्ति। अत्र दश ऋच: सन्ति। अस्य सूक्तस्य हिरण्यगर्भो ऋषि:, 'क' संज्ञकप्रजापतिर्देवता त्रिष्टुप्च्छंदश्चास्ति। सूक्तशब्दस्यार्थो भवति स्तुतिप्रधानानाम् ऋचां समुदाय:। सा च स्तुति: चतुर्विधा प्रोक्ता-नाम्ना रूपेण कर्मणा बंधुभिश्च। सर्वेषु वेदेषु या: काश्चन ऋच: सन्ति, ता सर्वा अपि त्रिविधा एव भवन्ति। तद्यथा-परोक्षकृता:, प्रत्यक्षकृता:, आध्यात्मिक्यश्च। तत्र परोक्षकृता: प्रथमादिभि-र्विभक्तिभि: सर्वैरपि सुबंतपदै: आख्यातस्य प्रथमपुरुषैश्च विज्ञायन्ते। प्रत्यक्षकृता: आख्यातस्य मध्यमपुरुषै: त्वमिति चैतेन सर्वनाम्ना ज्ञायन्ते। आध्यात्मिक्य: उत्तमपुरुषयोगा: अहतिमत्येतेन सर्वनाम्ना ख्याता: सन्ति।

प्रस्तुतेऽस्मिन् सूक्ते स्तुतस्य देवस्य नाम हिरण्यगर्भः प्रजापतिरिति जगद्बीज-पुरुषोऽस्ति। योऽयं प्रजापतिरत्र हिरण्मयाण्डरूपेण वर्णितः स एव पुरुषसूक्ते विराडुपाधिध्ारकः ततो विराडजायत विराजो अधिपूरुषः इतिमंत्रेण वर्णित इति प्रतीयते। अस्य विराट्पुरुषस्य विषयेऽपि तत्र पुरुष एवेदं सर्वम्, स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः इत्यादिकमुक्तमस्ति। तेन सामंजस्यस्थापनविधिना एवं वक्तुं शक्यते यत् पुरुषसूक्ते यो विराडस्ति स एवात्र प्राकृतिकेनाण्डविशेषेणोक्तः। अर्थान्नासदीयसूक्तोक्तान्मूलपुरुषात् हिरण्यगर्भात्मकः जगद्बीजपुरुषः समुत्पन्न इति कथनं युक्तियुक्त एव। तस्मादेवादि-पुरुषादिदं समस्तं प्रपंचं समुद्भूतमिति।

हिरण्यगर्भसूक्तस्य दार्शनिकं महत्वम्।

विदन्त्येव भवन्तो यद्वेदेषु ऋग्वेदस्य स्थानमतिमहत्वपूर्णमस्ति। ऋग्वेदे दशमण्डलानि सन्ति। दशमे मण्डले दार्शनिकविचारधारया संवलितानां सूक्तानां सङ्.ग्रहो विद्यते। भा-रतवर्षे साम्प्रतं यावन्त्यपि दर्शनान्युपलभ्यन्ते यानि च दर्शनानि भारतभुवि मान्यताप्राप्तानि सन्ति तेषु द्वादशदर्शनानामेव प्राधान्यमस्ति। द्वादशदर्शनेष्वपि षड्दर्शनानि आस्तिकानि षट्च नास्तिकानि उक्तानि। सांख्य-योग-न्याय-वैशेषिक-पूर्वमीमांसा-उत्तरमीमांसा चैतान्यास्तिकदर्शनान्युक्तानि। नास्तिकदर्शनेषु जैन-बौद्ध-चार्वाक इति त्रीणि दर्शनानि प्रमुखानि, तत्रापि बौद्धदर्शनस्य चत्वारो विभागाः सौत्रान्तिक-बैभाषिक-माध्यमिक-यो-गाचार इति नामभिर्विख्याताः सन्ति। तत्र यानि दर्शनानि वैदिकविचारधाराम् अङ्.गीकुर्वन्ति ईश्वरसत्तायांच श्रद्धां निदधति तानि आस्तिकानि, यानि च वेदं विरुद्ध्येश्वरस्य सत्तां नाङ्.गीकुर्वन्ति तानि नास्तिकान्युक्तानि। वेदानां विषये भगवतो मनोरिदं कथनमस्ति यत् भूतं भव्यं भविष्यच्च सर्वं वेदात् प्रसिद्ध्यति। अर्थात् वेद इति शब्दोच्चारणमात्रेणैव जगदुत्पाकदस्य परब्रह्मपरमात्मनो बोधो जायते। अत एव श्रुतिषु ब्रह्मणो द्विविधस्वरूपम-ुपपादयता प्रकाशितं यत्-

द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परंच यत्।

शब्दब्रह्मणि निष्णातः परब्रह्माधिगच्छति।। (मैत्रायण्याम्)

अत्र श्रुतिवचने शब्दब्रह्मपरब्रह्मरूपे द्वे ब्रह्मणी प्रोक्ते स्तः। शब्दब्रह्मणि यो निष्णातो भवति स एव परब्रह्म ज्ञातुं समर्थो भवतीत्युक्तम्। शब्दब्रह्मत्वेनात्र वेद एव बुध्यते, वेदेषु मन्त्राः सन्ति, मंत्रेषु च विचारार्थविषयाः प्रस्तुताः सन्ति। मननात् त्रायते इति मन्त्रः एतादृशी परिभाषा मंत्रशब्दस्य श्रूयते। मन्त्राणां मननं त्रिविधं भवति आधिदैविकम् आधिभौतिकम् आध्यात्मिकंच। अत एव मंत्रा अपि त्रिविधाः प्रोक्ताः परोक्षकृताः, प्रत्यक्षकृताः, आध्या-त्मिक्यश्च इति। मन्त्राणां प्रयोगेण त्रिविधदोषाणां नाशो भवति। तस्मादेव कारणादुत्त-रमीमांसाबोधकेषु उपनिषत्सु पाठान्ते त्रिवारं शान्तिः। शान्तिः। शान्तिः। इति पठयते।

तेनाधिभौतिकाधिदैविकाध्यात्मिकानां त्रिविधदोषाणां शमनं भवतीत्युच्यते। सर्वेष्वपि भारतीयदर्शनेषु सुष्टिप्रक्रियामारभ्यैव चिंतनमारभते। तच्चिन्तपरत्वात् हिरण्यगर्भसूक्तस्य दार्शनिकत्वं सुतरां सिद्ध्यति।

हिरण्यगर्भस्योत्पत्तिवर्णनम्-

नासदीयसूक्ते यस्य ब्रह्मणो वर्णनमुपलभ्यते स: निरुपाधिलक्षण: प्रलयावस्थायां सूक्ष्मभावेनावस्थित: बाह्यकरणागोचरत्वात्, अव्यक्तो व्यक्तिरवयव: तद्रहितत्वात्, नित्य: सनातनत्वाच्चासीदिति उच्यते। तदुक्तम्मनुना-

योऽसावतीन्द्रियग्राह्य: सूक्ष्मोऽव्यक्त: सनातन:।

सर्वभूतमयोऽचिन्त्य: स एव स्वयमुद्बभौ।। (मनु-1/7)

अर्थाद्जगत्कारणत्वं च ब्रह्मलक्षणम्। अत एव ब्रह्मसूत्रे भगवता व्यासेन अथातो ब्रह्मजिज्ञासा इति सूत्रानन्तरं ब्रह्मलक्षणप्रतिपादनाय जन्माद्यस्य यत: इति द्वितीयं सूत्रं प्रणीतम्। द्वितीयेन सूत्रेण सोपाधिकब्रह्मणो लक्षणं प्रतिपाद्यते। तथा च श्रुति:- यतो वा इमानि भूतानि जायन्ते। येन जातानि जीवन्ति। यत्प्रयन्त्यभिसंविशन्ति। तद्विजिज्ञासस्व। तद्ब्रह्म। (तै.उ.-3/1/1) इत्यनया श्रुत्या समस्तप्रपंचस्योत्पादकत्वात् सर्वकारणत्वाच्च प्रपंचकारणरूपं ब्रह्म निरूपितम्। यतो नैकमेव ब्रह्म कृत्स्नस्य जगतो निमित्तमुपादानंच प्रतिपादयितुं शक्नोति। तत्र सत्यम् ज्ञानमनन्तं ब्रह्म (तै.उ.2/1/1) इत्यनया श्रुत्या सत्यपदेन निरुपाधिकसत्तायोगि ब्रह्माड। वस्तुत: बृंहणाद्ब्रह्म इत्यनया परिभाषया सततम-द्यमनशीलत्वब्रह्मलक्षणस्वीकारे निरुपाधिकतया सोपाधिकलक्षणस्यानन्तप्रपंचस्याविर्भा-वकारणात् सत्यम्, ज्ञानस्वरूपमनन्तं ब्रह्म सर्वभूतोत्पादकत्वेन निमित्तकारणत्वमुपपाद्यते। तस्मात्तद्ब्रह्म निर्विशेषतया सविशेषतत्त्वानाम्, निराकारतया साकारतत्त्वानांचोत्पादकतया चतुर्विधं स्वरूपं धत्ते। तच्च चतुर्विधत्वं ब्रह्मण: चतुष्पात्स्वरूपमुपवर्णयति। तस्मादुच्य-ते-चतुष्टयं वा इदम् सर्वम् (शां.आ-1/2, कौ.ब्रा.2/1) इति। वेदेष्वपि-त्रिपादूर्ध्वमुदैत्-पुरुष: पादोस्योहाभवत्पुन:। ततो विष्वड्.व्यक्रामत् साशनानशने अभि इति। मन्त्रेणानेन पादत्रयमादाय पुरुष: ऊर्ध्वम् अस्मादज्ञानसंसाराद्वहिर्भूत: अत्रत्यैर्गुणदोषैरस्पृष्ट: उत्कर्षेण स्थितवान्। अस्यैक: पाद: पुनरिह मायायाम् अभवत्। सृष्टिसंहाराभ्यां पुन: पुनरागच्छति। अर्थात् मायायामागत्यानन्तरं विष्वड्. देवमनुष्यतिर्यगादिरूपेण विविध: सन् व्यक्रामत् व्याप्तवान् इत्याह सायण:। अनेन मंत्रबलेन चतुष्पाद्ब्रह्मण: स्वरूपमस्माकं समक्षमाग-च्छति। योऽयं पुरुष: (ब्रह्म) पादत्रयमादाय ऊर्ध्वं तिष्ठति तस्य च पुरुषस्य त्रिविधत्वं प्रतिपादयन्नाह भगवान् श्रीकृष्ण:-

द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च।

क्षर: सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते।।

उत्तम: पुरुषस्त्वन्य: परमात्मेत्युदाहृत:।

यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वर:।। (गीता-१५/१६-१७)

तस्य चतुष्पाद्ब्रह्मण: पुर: इति प्रथम: पाद:। तदुक्तं श्रुतौ-इमे वै लोका पूरयमेव पुरुषो योऽयं पवते सोऽस्यां पुरि शेते तस्मात्पुरुष: (श.प.ब्रा-13/6/2/1) इति। अर्थादिदं समस्तं विश्वं क्षररूप: पुर् इत्युच्यते। तस्मिन् पुरि यस्तिष्ठति स: पुरुष:। पुरुषो द्वितीय: पाद उक्त:। पुरुष: त्रिविध: क्षराक्षराव्ययसंज्ञक:। क्षर: सर्वभूतमयो जीवशरीरविशेषो वर्तते, अक्षर: कूटस्थ उक्त:, स जीवशरीरेषु वैश्रवानराग्निरूपेण प्रविश्य जीवनपर्यन्तं तिष्ठति। तदुक्तमुपनिषदि-यथोर्णनाभि: सृजने गृह्णने च यथा पृथिव्यामोषधय: संभवन्ति। यथा सत: पुरुशात्केशलोमानि तथाऽक्षरात्सम्भवतीह विश्वम्।। (मुंडके-1/1/7) अत्र त्रिभिर्दृष्टान्तै: परमात्मैवास्य संपूर्णस्य जडचेतनात्मकस्य विश्वस्य निमित्तकारण: उपादानकारणश्चास्ति इत्यस्य प्रकाशनं कृतं ऋषिणा। तत्र प्रथमे दृष्टान्ते-ऊर्णनाभिर्यथा स्वोदरस्थं तंतु बहिर्निष्कास्य पुन: गृह्णाति तद्वत्, द्वितीये-पृथिव्यां यथा वृक्षवनस्पत्यौषध्यश्च स्वत एवोत्पद्य पुनस्तस्यामेव विलीयन्ते तद्वत्, तृतीये-जीवशरीरे यथा जीवितास्थायां केशलोमादयो स्वत एवोद्भवन्ति विस्तारंचाप्नुवन्ति एवमेव तस्मादक्षरपुरुषात् जगदिदं स्वमेव समुत्पद्य विकासमवाप्य च पुनस्तस्मिन्नेव विलीनं भवतीति। अव्यय: त्रिषु लोकेषु व्याप्त: परमात्मरूप ईश्वर: प्रोक्त:। तदुक्तं गोपथश्रुतौ-सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु। वचनेषु च सर्वेषु यन्न व्येति तदव्ययम्। (गो.ब्रा.-1/1/26) इति। सा चाव्ययो गीतायां परमात्मेरूतुदाहृत: इत्युक्त्या परमपुरुष एवोक्त:। तस्य चाव्ययस्य क्षराक्षराच्चातीतत्वप्रतिपादनं कृतं भगवता श्रीकृष्णेन। यथा-यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तम:। अतोऽस्मि लोके वेदे च प्रथित: पुरुषोत्तम:। (गीता-१५/१८) इति। अस्यैवाव्ययपुरुषस्य परमधाम इति विष्णो: परमपदत्वेन वेदेषु वर्णितमस्ति। यथा-तद्विष्णो: परमं पदं साद पश्यन्ति सूरय:। दिवीव चक्षुराततम्।। (ऋ.1/22/20) सूरय: पदेनात्र विद्वांस: सूर्याश्चोभावर्थौ गृह्येते। तेन विष्णो: तत् परमं पदं सूर्या: सप्त दिशो नानासूर्या:। देवा आदित्या ये सप्त।। (ऋ0 9/114/3) सप्त दिक्षु विद्यमाना: सूर्या:, वेदांतपारगा: विद्वांसश्च सदा चक्षुरिव सूर्यमिव आततं व्याप्तं दिवि द्युलोके पश्यन्ति इत्यर्थो गम्यते। यज्ञादिषु ये यजमाना: भवन्ति तेऽपि यज्ञमाध्यमेन तत्स्थानं प्राप्तुं कामयन्ते। तदुक्तं वेदे-ता वां वास्तून्युश्मसि गमध्यै यत्र गावो भूरि शृङ्गा अयास:। अत्राह तदुरुगायस्य वृष्ण: परमं पदमव भाति भूरि। (ऋ.1/154/6) इति। अर्थात् यत्र बहून्नता: रश्मयोप्ोता: सूर्यकिरणा: तिष्ठन्ति तस्मिन् कामानां वर्षितु: भगवतो विष्णो: परमधाम्नि आवां पत्नीयजमानौ निवसितुं कामयावहे इति। अर्थात् परमपुरुषत्वेन वर्णितादेतस्मात्पुरुषादपि

यः परो वर्तते सः परात्परसंज्ञकः पुरुषः ब्रह्मणः तृतीयः पादो वर्तते। तदुक्तमपि श्रुतौ-यथा नद्यः स्यंदमानाः समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय। तथा विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम्।। (मुण्डके-3/2/8) इति। यस्य विषये वेदेष्वेवमुक्तं यत् - तदेवाग्निस्तदादित्यस्तद्वायुस्तदु चन्द्रमाः। तदेव शुक्रं तद्ब्रह्म ता आपः स प्रजापतिः। न तस्य प्रतिमा अस्ति यस्य नाम महद्यशः। हिरण्यगर्भ इत्येष मा मा हिंसीदित्येषा यस्मान्न जात इत्येषः।। (शु.य.सं-32/1-3) इति। अस्मात्परात्परपुरुषादपि सूक्ष्मतमो ब्रह्म अप्रज्ञातालक्षणाप्रतर्क्याविज्ञेयस्वरूपः निर्विशेषनाम्ना प्रथितः सर्वमायाध्यक्षः हिरण्यगर्भस्य परात्परस्योत्पादको वर्तते। तस्य न कापि विशेषता क्विचदुपलभ्यते। निरित्युपसर्गस्य लक्षणं भगवता यास्केनोक्तम् - अति सु इत्यभिपूजितार्थे। निर्दुरित्येतयोः प्रातिलोम्यम्। अर्थादतिधनस्य विलोमो भवति निर्धन इति। तेन धनविहीनो निर्धनः प्रख्यातः। तद्वदेव विशेषताभी रहितो निर्विशेष इति सिध्यति। इन्द्रादयोऽपि यस्यान्तं न विदुः शब्दवारिधेः इत्युक्तिबलाद्यस्य स्वरूपं न कोऽपि जानाति स नासदीयसूक्तोक्तः परब्रह्मविशेषो वर्तते।

उपर्युक्तेन विवेचनेनेदं स्पष्टं भवति यन्निर्विशेषात्परात्पररूपस्य हिरण्यगर्भस्य प्रादुर्भावः, परात्परपुरुषात् अव्ययः समभवत् 'न व्ययः अव्ययः' इति समासविधने-नाव्ययस्याक्षय्यत्वं सुसिद्धं भवति। स चाव्ययः महाविष्णुरित्युच्यते। स एवास्माकं कृते परब्रह्मास्ति। अत एव गीतायां परमात्मेत्युदाहृतः इत्यवादि श्रीकृष्णः। यथा लोके इदं प्रसिद्धमस्ति यदस्माकं शरीरे कोटिपरिमिताः जीवाः स्थूलसूक्ष्माः सन्ति। आङ्. ग्लभाषायां सेल्स (Cells) इत्युच्यन्ते। तेषां जीवानां कृते अस्माकं शरीरात्नर्गतमात्मैव परमात्मरूपोऽस्ति यतो यावदस्माकं शरीरं तिष्ठति तावदेव तेषां संस्थितिर्भवति श-रीरे विनष्टे सति तेषां विनाशस्तु स्वाभाविकमेव भवति। तथैवास्माकं कृते त्वव्ययः परमात्मा, यतो ह्यव्ययात्मके परमात्मनि वयं जीवाः सूक्ष्मभावेन वसामः। एतेन विवेचनेनेदं स्पष्टं भवति यत्प्रलयावस्थायां यद्ब्रह्म आसीत् तत्सत्स्वरूपो निर्विशेष इति। तस्मान्निर्विशेषादयमव्ययरूपो हिरण्यगर्भः समभवत्। हिरण्यगर्भरूपादादि-पुरुषादिदं जगदुत्पन्नमिति। तदुक्तम्मनुना-

आसीदिदं तमोभूतमप्रज्ञातमलक्षणम्।

अप्रतर्क्यमविज्ञेयं प्रसुप्तमिव सर्वतः।। (मनु-1/5)

ततः स्वयम्भूर्भगवानव्यक्तो व्यंजयन्निदम्।

महाभूतादि वृत्तौजाः प्रादुरासीत्तमोनुदः।। (मनु-1/6)

सोऽभिध्याय शरीरात्स्वात्सिसृक्षुर्विविधाः प्रजाः।

अप एव ससार्जादौ तासु बीजमवासृजत्।।

तदंडमभवद्धैमं सहस्रांशुसमप्रभम्।

तस्मिंजज्ञे स्वयं ब्रह्मा सर्वलोकपितामहः।। (मनु-1/8,9)

अर्थात् प्रलयावस्थायामिदं जगत् तमोभूतं तमसि लीनमासीत्। तदुक्तं नासदीय सूक्ते-तम आसीत्तमसा गूढमग्रे इति। तदानीम् प्रकृतिरपि ब्रह्मात्मना आसीदिति। प्रलयावसानानन्तरं परमात्मा स्वेच्छया शरीरपरिग्रहं करोतीति स्वयम्भूः। स एव ब्रह्मेत्यपरपर्यायेण ज्ञायते, अत एव स्वयम्भूः ब्रह्मेत्युच्यते। स स्वयम्भूः परमात्मा नानाविधाः प्रजाः सिसृक्षुः अभिध्यानमात्रेण आपो जायन्ताम् इत्युक्तवा आप एव ससर्ज। अपां सुष्टिश्चेयं महदहंकारतन्मात्रक्रमेण ज्ञातव्या। एतस्य तथ्यस्य निरूपणं नासदीये यथा-प्रकेतं सलिलम् सवमा इदम् इत्युक्त्या कृतं यत्समस्तमिदं जगत्तदानीं जलमयमासीदिति। तास्वप्सु शक्तिरूपं बीजमारोपितवान्। तद्बीजं परमेश्वरेच्छया हैम-मण्डमभवत्। तस्मिन्नण्डे हिरण्यगर्भः सर्वलोकानां पितामहो जातवान्। स च हिरण्यगर्भः तेनैव ब्रह्मणा समुत्पादितः तस्मात्सोऽपि सर्वत्र ब्रह्मेति कीर्त्यते। तस्मादेव हिरण्यगर्भात् आकाशादिक्रमेण सृष्टिरुत्पन्ना। तथा चोक्तं तैत्तिरीयोपनिषदि-तस्माद्वा एतस्मादात्मनः सकाशादाकाशः सम्भूतः। आकाशाद्वायुः। वायोरग्निः। अग्नेरापः। अद्भ्यः पृथिवी (तै.उ.-2/1/1) इति। तदेवोक्तम्मनुना-'महाभूतादि वृत्तौजाः प्रादुरासीत्तमोनुदः' इति। तस्मादेवादिपुरुषात् समस्तस्यास्य स्थावरजङ्गमात्मकस्य संसारस्योत्पत्तिर्जाता। अत इदं विश्वं ब्रह्मात्मकमस्ति इत्यपि केचिदाहुः। यथा लोके मानवानां पुत्राः मानवाः, पशूनां संततयः पशवः, वृक्षाणां संततयो वृक्षाः, लतानां लता एव भवन्ति तथैव ब्रह्मणः सकाशात् समुत्पन्ना ब्रह्मात्मका एव सन्ति नास्त्यत्र कस्यचिल्लेशतोऽपि संदेहस्यावसरः। अतोऽधुना सर्वं खल्विदं ब्रह्म इति विचार्यते।

सर्वं खल्विदं ब्रह्म-

समस्तमिदं जगत् एकस्यैव परमात्मनो विस्तारोऽस्तीति सर्वैरपि दार्शनिकैराचार्यैः, जगतत्वचिन्तकैः स्वीक्रियते। तैत्तिरीयोपनिषदः-तत्सृष्ट्वा तदेवानुप्राविशत् इति कथनेन चापि सः परमात्मा एतच्चराचरं सृष्ट्वा तस्मिन् स्वयं प्रविश्य च जगच्चक्रमिदं संचालयति इत्यवगम्यते। स एकः सन् बहुरूपो भवति। तदुक्तमपि यास्केन-महाभाग्याद्देवताया एक एव आत्मा बहुधा स्तूयते इति। अर्थादात्मैव सर्वं स्थावरजङ्गममिति, अत ऐतदात्म्यमिदं सर्वम् इति जोघुष्यते उपनिषद्भिः। सर्वेषामेव देवानां चराचरात्मकजीवानांच्चात्मरूपत्वात्, आत्मनश्चादिपुरुषत्वात्समस्तविश्वस्य ब्रह्ममयत्वस्य कल्पना कृतमस्माकमृषिभिः। तद्ब्रह्म सत्यमस्ति, ज्ञानरूपमस्ति अनंतचास्ति तस्मादुक्तं सत्यं ज्ञानमनन्तं ब्रह्मेति। तस्यानन्तरूपस्य ब्रह्मणो वैकारिकी सृष्टिरियमनन्तरूपास्ति। यद्यपि पुरुषसूक्तानुसारं सृष्टिरियमेकपदी पादोस्येहाभवत्पुनः इति मंत्रबलाज्ज्ञायते। तस्यामेकपदीसृष्टौ एतावद-

ानन्त्यमस्तीति ज्ञात्वा परसृष्टिषु कियदानन्त्यमिति विचारः स्वयमेवोत्पद्यते। अत्र पुनरिदं चिन्त्यते यत् किमर्थमेतज्ज्ञानं प्राप्तव्यम् ? विचारो वा करणीयः ? इति। तदुच्यते यदस्मिन् संसारे पुरुषार्थचतुष्टयस्य सिद्धिस्सर्वेषां मानवानां भवति लक्ष्यम्। तत्रान्तिमः पुरुषार्थो मोक्षः, यतो मोक्षादेवास्माद्भवसागरान्निवृत्तिर्भवति, अविद्यानिवृत्तिरेव मोक्षो भवति, तदर्थं ब्रह्मजिज्ञासा क्रियते। अत इदानीं ब्रह्मविज्ञानस्यावश्यकता निरूप्यते।

ब्रह्मविज्ञानस्यावश्यकता-

असारे खल्वस्मिन् संसारे सर्व एव मनुष्यास्त्रिविधा दृश्यन्ते सारग्राहिणो भारवाहिनो जिज्ञासवश्च। तत्र सारग्राहिणो द्विविधाः ऋषयो मुनयश्च, ऋषयो मन्त्रद्रष्टारः, मुनयो दर्शनादिशास्त्रप्रवक्तारश्च। भारवाहिनोऽपि द्विविधाः पंडितम्मन्याः, मूर्खमानिनश्च। पण्डितंमन्याः निरतिशयपक्षपातिनः स्वस्वबुद्ध्यनुसारेण तत्तन्महर्षिमुन्युक्तमर्थं प्रत्याकर्षयन्तः सारासारार्थसंकीर्णानेकमतवादानाडम्बरयन्तः परस्परविरोधबीजमावपन्तः कण्टकतृणान्युत्पाद्य जगत्पथमाकुलयन्ति। अथैते जिज्ञासमानाश्चापि द्विविधाः ज्ञानबलदुर्विदग्धाः धृष्टचरिताः वितण्डावादिनः समाजे खलूपहासप्रधाना भवन्ति, परे तु विनीताः शिक्षितार्थे सयुक्तिके विश्वासमुपयान्ति। ये विनीतास्तेषामेव कृते सर्वशास्त्रोपदेशो भवति। कथनस्य तात्पर्यमिदमस्ति यदद्यत्वे भूतलेऽस्मिन् वंचकानामाधिक्यमस्ति तेषां दृष्टावेतानि शास्त्राणि निष्प्रयोजकानि मृतानि च सन्ति। यदि केचनात्र विश्वासमुत्पादयन्ति चेत्तत्राप्याशङ्.कार जागर्ति यन्नाशाय विश्वसन्त्युत विकासायेति। यतः सर्वे वंचकाः सर्वत्र केवलं धनप्राप्तिमेवाभिलषन्ति। धनप्राप्तये ते किमपि कर्तुं प्रवृत्ता भवन्ति, मातरं पितरं स्वसारं दुहितारं पुत्रं बंधुं सखायं जायां स्वात्मानमपि विक्रेतुं तत्परा भवन्ति का कथा शास्त्राणाम् ? अस्माकं समाजे वंजकाः धूर्ताः चैराः स्वेच्छाचारिणो नासन् न चाग्रे भवेयुस्तदर्थमुपनिषत्सु प्रोक्तमपि ऋषिभिः। यथा-न मे स्तेनो जनपदे न कदर्यो न मद्यपो नानाहिताग्निर्नाविद्वान्न स्वैरी स्वैरिणी कुतः। (छान्दो. 5/11/5) अनेन श्रौतवाक्येनोपर्युक्तैः स्तेनादिभिर्विरहितस्य राष्ट्रस्य प्रमाणमुपलभ्यते। तदानीमेतादृशस्य भयस्य आवश्यकतैव नासीत् परमद्यत्वे तच्चिंतनमावश्यकं भवति। अतो संस्कृतानुरागिभिः सावधानैर्भाव्यम्।

एतादृशैर्वंचकैः धनप्रमादपालकैः स्वात्मानमभिगोपयितुं संसारबंधमुन्मूलयितुंच ब्रह्मविज्ञानस्यापेक्षा भवति। यतो ब्रह्मात्मैकत्वविज्ञानेन मिथ्यारूपस्य सकारणस्य बंधस्य निवृत्तिरुक्ता। तस्मादिदमेवैकं शास्त्ररूपं शस्त्रं येन संसारसागरपथि समागतानां दुष्टानां समूलविनाशो भवितुमर्हति, संसारसागरात्पारमपि गन्तुं शक्यत इति। तमेव विदित्वाति मृत्युमेति नान्यः पंथा विद्यतेऽयनाय (शु.य.सं 31/18) इत्यत्र मृत्युशब्देनाविद्याभिधीयते। तस्याश्चाविद्याया निवृत्तिसाधनं ज्ञानमेवेह प्रत्यक्षं शस्त्रम्। अत एवोक्तमुपनिषदि-विज्ञानमानन्दं ब्रह्म (बृ. 3/9/28) इत्यादिशोधकवाक्यावसेयनिर्विशेषचिन्मात्रस्वरूपब्रह्मात्मै-

कत्वविज्ञानं शास्त्रसम्मतं तेनैव च बंधनिवृत्तिरपि सिध्यति। तदुक्तमपि श्रीरामानुजाचार्येण श्रीभाष्ये-अनादिनिधनाविच्छिन्नसंप्रदायासम्भाव्यमानदोषगंधानवकाशशास्त्रजन्यनिर्विशेष-नित्य-शुद्ध-मुक्त-बुद्ध-स्वप्रकाश-चिन्मात्र-ब्रह्मात्मभावावबोधेन सम्भाव्यमानदोषसावकाशप्रत्यक्षादिसिद्ध-विविधविकल्परूपबंधनिवृत्तिर्युक्तैव इति। यावज्जीवाः बंधनान्मुक्ता न भविष्यन्ति तावत् तेषामन्तःकरणे ब्रह्मज्ञानावाप्तेर्भावस्योदयो न भविष्यतीति तस्मात्सर्वप्रयत्नेन बंधमुक्तिरावश्यकी। एतदर्थं च सर्वविधप्रयासेन मानवानामन्तःकरणे विद्यमानानां सांसारिकशत्रूणां काम-क्रोध-लोभ-मोह-मदप्रभृतीनां समूलविनाशः करणीयो भविष्यति। अत एवास्माकं परंपरायामाशीर्वादमंत्रेषु मन्त्रार्थाः सफलाः संतु पूर्णाः संतु मनोरथाः। शत्रूणां बुद्धिनाशोऽस्तु मित्राणामुदयस्तव।। इत्युच्यते। अत्र शत्रूणां बुद्धिनाश इति कथनेन शरीराभ्यन्तर्गतविद्यमानानां काम-क्रोध-लोभ-मोह-मदप्रभृतीनां बुद्धिनाशः स्यादिति काम्यते, मित्राणामुदय इत्यनेन च धर्मार्थकाममोक्षाणां पुरुषार्थचतुष्टयानामुदयो भवेदिति कामना क्रियते। एतत्समस्तं ज्ञानविज्ञानविषयं सम्यज्ज्ञातुं ब्रह्मविज्ञानस्यावश्यकता सदा सर्वत्र भवत्येव।

हिरण्यगर्भसूक्तस्य परिचयो महत्वंच-

विश्वस्याद्यो ग्रंथः भारतीयधर्मस्य च कमनीयकल्पद्रुमः, आर्यसंस्कृत्याः प्राणभूता इमे वेदा एव सन्ति। ते च वेदाः स्वरूपभेदार्त्तिविधाः संहिताभेदाच्च चत्वारः सन्ति। वेदेषु मुख्यरूपेण यागानुष्ठानादीनां वर्णनानि सन्ति। यागानामेकविंशतिसंस्थाः प्रोक्ताः-सप्त पाकयज्ञसंस्थाः सप्त हविर्यागसंस्थाः, सप्त च सोमयागसंस्थास्तेषु यागेषु सर्वप्राचीनोऽयं यागः सृष्टिनिर्माणात्मकः। स्रुष्ट्युत्पादकयागानां वर्णने प्रस्तुतान्यनेकानि ऋग्वैदिकसूक्तानि अस्माकं समक्षं सन्त्युपस्थितानि। तेषामध्ययनेन तत्तद्विशिष्टविषयाणामवबोधो जायते। तादृशेषु सूक्तेषु हिरण्यगर्भसूक्तस्य महत्वपूर्णं स्थानमस्ति। अतोधुना तस्याध्ययनमारभ्यते।

ऋग्वेदस्य दशमे मण्डले एकनवत्युत्तरशतं (191) सूक्तानि सन्ति। अस्मिन् मण्डलेऽनेकविधानि दार्शनिकसूक्तानि समुपलब्धानि सन्ति। तेष्वेकविंशत्युत्तरशततमं (121) सूक्तमिदं हिरण्यगर्भसूक्तमस्ति। अत्र दश ऋचः सन्ति। अस्य सूक्तस्य हिरण्यगर्भो ऋषिः, 'क' संज्ञकप्रजापतिर्देवता त्रिष्टुप्छन्दश्चास्ति।

प्रस्तुतेऽस्मिन् सूक्ते स्तुतस्य देवस्य नाम हिरण्यगर्भः प्रजापतिः जगद्बीजपुरुषोऽस्ति। योऽयं प्रजापतिरत्र हिरण्यमयाण्डरूपेण वर्णितः स एव पुरुषसूक्ते विराडुपाधिधारकः ततो विराडजायत विराजो अधिपूरुषः इत्यनेन मंत्रेण वर्णित इति प्रतीयते। अस्य विराट्पुरुषस्य विषयेऽपि तत्र पुरुष एवेदं सर्वम्, स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः इत्र्यादिकमुक्तमस्ति। तेन सामंजस्यस्थापनविधिना एवं वक्तुं शक्यते यत् पुरुषसूक्ते यो

विराडस्ति स एवात्र प्राकृतिकेनाण्डविशेषेणोक्तः। अर्थान्नासदीयसूक्तोक्तान्मूलपुरुषात् हिरण्यगर्भात्मकः जगद्बीजपुरुषः समुत्पन्न इति कथनं युक्तियुक्त एव। तस्मादेवादि-पुरुषादिदं समस्तं प्रपंचं समुद्भूतमिति सर्वैरनुज्ञायत एव। तस्येतिवृत्तानामध्ययनाय सूक्तोक्तमंत्राणामध्ययनमनिवार्यम्, फलतो हिरण्यगर्भसूक्तस्य पाठ आरभ्यते।

हिरण्यगर्भसूक्तोक्तमन्त्राणां पाठः।

१. हिरण्यगर्भः समवर्तताग्रे इति प्रथममन्त्रस्य पाठः।

हिरण्यगर्भः सवमर्तताग्रे भूतस्य जातः पतिरेक आसीत्।

स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम।।

पदपाठः

हिरण्यगर्भः।सम्। अवर्तत। अग्रे। भूतस्य

जातः।पतिः।एकः।आसीत्।

सः । दाधार। पृथिवीम्। द्याम् । उत । इमाम्।

कस्मै । देवाय। हविषा विधेम।।

अन्वयः हिरण्यगर्भः अग्रे समवर्तत। जातः भूतस्य एक पतिः आसीत्। सः पृथिवीम् उत इमाम् द्याम् दाधार। कस्मै देवाय हविषा विधेम।

व्याख्या

हिरण्यगर्भः जगद्बीजभूतः प्रजापतिः हिरण्मयाण्डगर्भभूतः अग्रे सर्वप्रपंचोत्पत्तेः प्राक् समवर्तत मायाध्यक्षात्सिसृजोः परामत्मनः सकाशाद् समजायत स जातः उत्पन्नः सन् भूतस्य समस्तविकारजातस्य ब्रह्माण्डादेः सर्वस्य जगतः एकः अद्वितीयः पतिः ईश्वर आसीत्। सः परमात्मा पृथिवीं (निघण्टौ पृथिव्या अंतरिक्षनामसु पठितत्वात् पृथिवीति शब्देनान्तररिक्षस्य बोधो जायते) अन्तरिक्षं द्यां द्युलोकं उतापि च इमां पुरो दृश्यमानां भूमिं दाधार धारयति। कस्मै 'प्रजापतिर्वै कः' क-संज्ञकायास्मै सुखस्वरूपाय देवाय दानादिगुणविशिष्टाय हविषा पुरोडाशेन विधेम परिचरेम इत्यर्थः।

२. य आत्मदा बलदा इति द्वितीयमन्त्रपाठः।

य आत्मदा बलदा यस्य विश्व उपासते प्रशिषं यस्य देवाः।

यस्य च्छायामृतं यस्य मृत्युः कस्मै देवाय हविषा विधेम।।

पदपाठः

यः। आत्मऽदाः । बलऽदाः । यस्य । विश्वे।

उपऽआसते । प्रऽशिषम् । यस्य । देवाः।

यस्य । छाया। अमृतम्। यस्य। मृत्युः।

कस्मै । देवाय। हविषा। विधेम।।

अन्वयः यः आत्मदाः, बलदाः, यस्य प्रशिषम् विश्वे उपासते, यस्य देवाः। अमृतम् यस्य छाया, मृत्युः यस्य। कस्मै देवाय हविषा विधेम

व्याख्या

यो हिरण्यगर्भः प्रजापतिः आत्मदाः आत्मानमर्थाज्जीवनस्य दाता अस्ति, यश्च बलदाः बलस्य दाता अस्ति, यस्य परमात्मनः प्रशिषं प्रशासनं विश्वे सर्वे प्राणिनः चराचरात्मकाः जीवाः, यस्य प्रशासनंच पुनः देवाः सर्वसामर्थ्यशालिनः देदीप्यमानाः देवाः प्रार्थयन्ते सेवन्ते, अमृतं दिव्यलोकः मृत्युश्च यमलोको यस्य प्रजापतेः छायेव वशवर्ति भवति कस्मै देवाय तस्मै सुखस्वरूपाय 'क' संज्ञकाय प्रजापतये देवाय द्योतमानाय हविषा पुरोडाशादिद्रव्यैः विधेम पूजयेम इत्यर्थः।

३. यः प्राणतो निमिषतो इति तृतीयमन्त्रस्य पाठः।

यः प्राणतो निमिषतो महित्वैक इद्राजा जगतो बभूव।

य ईशे अस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम।।

पदपाठः

यः । प्राणतः । निऽमिषतः। महिऽत्वा।

एकः। इत्। राजा।जगतः।बभूव।

यः। ईशे। अस्य । द्विऽपदः । चतुऽपदः।

कस्मै । देवाय । हविषा । विधेम।।

अन्वयः

यः एकः इत् महित्वा प्राणतः निमिषतः जगतः राजा बभूव। यः अस्य द्विपदः चतुष्पदः ईशे। कस्मै देवाय हविषा विधेम।

व्याख्या

यो हिरण्यगर्भः एकलः सन् अद्वितीय एव महित्वा स्वकीयेन उद्घूर्णमाहात्म्येन प्राणतः श्वासोच्छवासं गृह्णतः निमिषतः अक्षिपक्ष्मचलनं कुर्वतः जगतः जङ्गमस्य प्राणिमात्रस्य

राजा प्रभुः बभूव भवति, यश्च प्रजापतिः अस्य विद्यमानस्य द्विपदो पादद्वययुक्तस्य मनुष्यादेः, चतुष्पदः पादचतुष्टयोपेतस्य गवाश्वादेः ईशे स्वामी भवति, कस्मै देवाय तस्मै सुखस्वरूपाय 'क' संज्ञकाय प्रजापतये देवाय द्योतमानाय हविषा पुरोडाशादिद्रव्यैः विधेम पूजयेम इत्यर्थः।

४. यस्येमे हिमवन्तो महित्वा इति चतुर्थमंत्रस्य पाठः।

यस्येमे हिमवन्तो महित्वा यस्य समुद्रं रसया सहाहुः।

यस्येमाः प्रदिशो यस्य बाहू कस्मै देवाय हविषा विधेम।।

पदपाठः

यस्य । इमे । हिमऽवन्तः। महिऽत्वा।

यस्य । समुद्रम्। रसया। सह। आहुः।

यस्य। इमाः। प्रऽदिशः। यस्य। बाहू। इति।

कस्मै।देवाय।हविषा।विधेम।।

अन्वयः

इमे हिमवन्तः यस्य महित्वा आहुः, रसया सह समुद्रम् यस्य, इमाः प्रदिशः यस्य, बाहू यस्य, कस्मै देवाय हविषा विधेम।

व्याख्या

इमे दृश्यमानाः हिमवन्तो हिमा अस्मिन् सन्तीति हिमवान्, बहुवचने हिमवन्तः तादृशाः सर्वे पर्वताः हिमालयादयो यस्य प्रजापतेः महित्वा माहात्म्यमैश्वर्यं वा कथयन्ति तथा रसया सह रसो जलं तद्वती रसा नदी रसादिभिर्नदीभिः सह सर्वे समुद्राः यस्य माहात्म्यं गायन्ति, यस्य चेमाः प्रदिशः प्राच्यारम्भा आग्रेय्याद्याः कोणदिशश्च बाहवो भुजारूपेण प्रसृताः प्रतिष्ठिताश्च सन्ति, कस्मै देवाय तस्मै सुखस्वरूपाय 'क' संज्ञकाय प्रजापतये देवाय द्योतमानाय हविषा पुरोडाशादिद्रव्यैः विधेम पूजयेम इत्यर्थः।

५. येन द्यौरुग्रा पृथिवी च दृढा इति पंचममंत्रस्य पाठः।

येन द्यौरुग्रा पृथिवी च दृढा येन स्वः स्तभितं येन नाकः।

यो अंतरिक्षे रजसो विमानः कस्मै देवाय हविषा विधेम।।

पदपाठः

येन।द्यौः।उग्रा। पृथिवी । च । दृढा।

येन । स्व१रिति स्वः। स्तभितम्। येन। नाकः।

यः । अंतरिक्षे। रजसः । विमानः।

कस्मै।देवाय। हविषा। विधेम।।

अन्वयः

येन द्यौः उग्रा पृथिवी च दृढा, येन स्वः स्तभितम्, येन नाकः, यः अंतरिक्षे रजसः विमानः, कस्मै देवाय हविषा विधेम।

व्याख्या

येन हिरण्यगर्भात्मकेन प्रजापतिना द्यौरन्तरिक्षम् उग्रा ऊर्ध्वमुत्थाप्य स्थापितं पृथिवी भूमिश्च दृढा स्थिरीकृता, येन च परमात्मना स्वः स्वर्गलोकम् उपरि तथा स्तब्धं कृतं यथा अधो न पतति, नाकः सूर्यो येन अंतरिक्षे स्तभितः, यश्चान्तरिक्षे रजसः उदकस्य विमानो निर्माता अस्ति कस्मै देवाय तस्मै सुखस्वरूपाय 'क' संज्ञकाय प्रजापतये देवाय द्योतमानाय हविषा पुरोडाशादिद्रव्यैः विधेम पूजयेम इत्यर्थः।

६. यं क्रन्दसी अवसा तस्तभाने इति षष्ठमन्त्रस्य पाठः।

यं क्रन्दसी अवसा तस्तभाने अभ्यैक्षेतां मनसा रेजमाने।

यत्राधिसूर उदितो विभाति कस्मै देवाय हविषा विधेम।।

पदपाठः

यम्। क्रन्दसी इति। अवसा। तस्तभाने इति।

अभि।ऐक्षेताम्। मनसा रेजमाने इति।

यत्र। अधि। सूरः। उत्ऽइतः। विऽभाति।

कस्मै। देवाय। हविषा। विधेम।।

अन्वयः

अवसा तस्तभाने रेजमाने क्रन्दसी यम् मनसा अभ्यैक्षेताम्, यत्र अधि सूरः उदितः विभाति, कस्मै देवाय हविषा विधेम।

व्याख्या

अवसा जगत्संरक्षणाय निर्माणाय च तस्तभाने स्थिरीकृते रेजमाने देदीप्यमाने क्रन्दसी द्यावापृथिव्यौ यं हिरण्यगर्भं प्रजापतिं मनसा बुद्धया अभ्यैक्षेतां अभिपश्येतां यत्राधि यस्मिन् आधारभूते प्रजापतौ सूरः सूर्यः उदितः उदयं प्राप्य विभाति प्रकाशते कस्मै देवाय तस्मै

सुखस्वरूपाय 'क' संज्ञकाय प्रजापतये देवाय द्योतमानाय हविषा पुरोडाशादिद्रव्यैः विधेम पूजयेम इत्यर्थः।

७. आपो ह य्दबृहतीर्विश्वमायन् इति सप्तममन्त्रस्य पाठः।

आपो ह यद्बृहतीर्विश्वमायन्गर्भं दधाना जनयन्तीरग्निम्।

ततो देवानां समवर्ततासुरेकः कस्मै देवाय हविषा विधेम।।

पदपाठः

आपः।ह।यत्। बृहतीः।विश्वम्।आयन्।

गर्भम्। दधानाः। जनयन्तीः।अग्निम्।

ततः। देवानाम्। सम्। अवर्तत। असुः।एकः।

कस्मै।देवाय। हविषा।विधेम।।

अन्वयः

यत् गर्भम् दधानाः अग्निम् जनयन्तीः बृहतीः आपः ह विश्वम् आयन्, ततः देवानाम् एकः असुः समवर्तत। कस्मै देवाय हविषा विधेम।

व्याख्या

यत् यदा गर्भं जगद्रूपगर्भं दधानाः धारयन्त्यः अग्निम् अग्निमुपलक्षितं सर्वमपि वियदादिभूतजातं जनयन्तीः उत्पादयन्त्यः बृहतीः बृहत्यो महत्यः आपः आपो देवीः ह प्रसिद्धं विश्वं सर्वम् चराचरात्मकं जगत् आयन् व्याप्नुवन् ततस्ताभ्योऽद्यभः सकाशात्, देवानाम् इन्द्रादीनाम् एको विशिष्टः असुः हिरण्यगर्भरूपः प्राणः समवर्तत समुत्पन्नः। कस्मै देवाय तस्मै सुखस्वरूपाय 'क' संज्ञकाय प्रजापतये देवाय द्योतमानाय हविषा पुरोडाशादिद्रव्यैः विधेम पूजयेम इत्यर्थः।

८. यश्चिदापो महिना पर्यपश्यत् इति अष्टममन्त्रस्य पाठः।

यश्चिदापो महिना पर्यपश्यद्दक्षं दधाना जनयन्तीर्यज्ञम्।

यो देवेष्वधि देव एक आसीत्कस्मै देवाय हविषा विधेम।।

पदपाठः

यः। चित्।आपः।महिना।परिऽअपश्यत्।

दक्षम्। दधानाः।जनयन्तीः।यज्ञम्।

यः।देवेषु।अधि।देवः।एकः।आसीत्।

कस्मै ।देवाय ।हविषा ।विधेम ।।

अन्वय:

य: चित् यज्ञम् जनयन्ती: दक्षम् दधाना: आप: महिला पर्यपश्यत् य: देवेष्वधि एक: देव: आसीत् कस्मै देवाय हविषा विधेम।

व्याख्या

य: परमात्मा चित् एव यज्ञम् यज्ञोपलक्षितं संपूर्णं जगत् जनयन्ती: उत्पादयन्त्य: दक्षम् सामर्थ्यशालिनं विष्णुम्, दधाना: धारयन्त्य:, आप: जलानि, महिला स्वमाहात्म्येन पर्यपश्यत् परितो दृष्टवान् य: परमात्मा, देवेष्वधि तदानीं विद्यमानेषु सर्वेष्वपि देवेषु अत्यधिक ऐश्वर्यवान् एक: अद्वितीय: सन् सर्वाधिष्ठातृत्वेन देव: द्योतमानस्वभाव आसीत् भवति, कस्मै देवाय तस्मै सुखस्वरूपाय 'क' संज्ञकाय प्रजापतये देवाय द्योतमानाय हविषा पुरोडाशादिद्रव्यै: विधेम पूजयेम इत्यर्थ:।

९. मा नो हिंसीज्जनिता य: इति नवममन्त्रस्य पाठ:।

मा नो हिंसीज्जनिता य: पृथिव्या यो वा दिवं सत्यधर्मा जजान।

यश्चापश्चन्द्रा बृहतीर्जजान कस्मै देवाय हविषा विधेम।।

पदपाठ:

मा। न:। हिंसीत् जनिता। य: । पृथिव्या:।

य: । वा। दिवम् । सत्यऽधर्मा। जजान।

य: । च । अप: । चन्द्रा:। बृहती: । जजान।

कस्मै। देवाय। हविषा। विधेम।

अन्वय:

न: मा हिंसीत् य: पृथिव्या: जनिता, य: वा सत्यधर्मा दिवमृ जजान य: च चन्द्रा: बृहती: अप: जजान कस्मै देवाय हविषा विधेम।

व्याख्या

स: प्रजापति: नो अस्मान् मा हिंसीत् मा बाधताम् य: परमात्मा पृथिव्या: भूमे: जनिता जनयिता य: प्रजापति: वा उत सत्यधर्मा सत्यनियमानां धारकोस्ति दिवम् यो हिरण्यगर्भ: द्युलोकं जजान जनयामास य: परमात्मा च पुन: चन्द्रा: आनंददायकं उज्ज्वलं प्रकाशमानं बृहती: महत्यो अप: जलम् जजान उत्पादयमास, कस्मै देवाय तस्मै सुखस्वरूपाय 'क' संज्ञकाय प्रजापतये देवाय द्योतमानाय हविषा पुरोडाशादिद्रव्यै: विधेम पूजयेम इत्यर्थ:।

१ ० .प्रजापते न त्वदेतान्यन्य: इति दशममन्त्रस्य पाठ:।

प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परि ता बभूव।

यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणाम्।

पदपाठ:

प्रजापते।न। त्वत्।एतानि।अन्य:।

विश्वा।जातानि।परि।ता।बभूव।

यत्।कामा:।ते।जुहुम:।तत्।न:।अस्तु।

वयम्।स्याम।पतय:।रयीणाम्।।

अन्वय:

प्रजापते! त्वत् अन्य: न एतानि विश्वा जातानि ता परिबभूव। यत् कामा: ते जुहुम: तत् न: अस्तु वयम् रयीणाम् पतय: स्याम्।

व्याख्या

प्रजापते! हे हिरन्यगर्भरूपप्रजापते! त्वत् त्वद्भिन्न: अन्य: अपर: न नैव कश्चित् एतानि इदानीं वर्तमानानि विश्वा विश्वानि जातानि भूतजातानि प्रथमविकाभांजि ता तानि परिबभूव परिगृह्णानि व्याप्नोति। यत् यत्किन्चित् फलम् कामा: कामयमाना वयं यजमान: ते तुभ्यं जुहुम: हवींषि प्रयच्छाम: तत् तत्फलम् न: अस्माकम् अस्तु भवतु वयं यज्ञकर्तारो यजमाना: रयीणाम् सर्वविधधनानामैश्वर्यानांच पतय: स्वामिन: स्याम भवेम इत्यर्थ:।

विषयसंग्रह:

विश्वस्मिन् वेद: सांग: अस्माकं भारतीयानां प्रतिष्ठाधायको भवति। भारतीय-मान्यतानुसारं वेद: सृष्टिप्रपंचस्य प्राथमिकी वाणी वर्तते। 'मंत्रब्राह्मणयोर्वेदनामधेयम्' इति कात्यायनपरिभाषया मंत्रो ब्राह्मणमिति द्वौ भागौ वेदस्य वर्तेते। जैमिनिना ऋचो लक्षणमेवमुक्तम् 'यत्रार्थवशेन पादव्यवस्था'' इति। अस्मिन् पाठयांशे वेदानां परिचय:, सायणभाष्यस्य परिचय:, सायणाचार्यस्य परिचय: इत्यादीनां विषयाणां संक्षिप्तस्वरूपं निरूपितम्। मंगलाचरणस्य परंपरा अतिप्राचीना वर्तते सायणाचार्येण अपि ऋग्वेदभ-ाष्यभूमिकायाम् आदौ मंगलमाचरितम्। तदनन्तरम् ऋग्वेदस्य एव आदौ व्याख्यानम् उचितम् अभ्यर्हितत्वादिति पूर्वपक्ष: सायणेन वर्णित:। वेदा यज्ञार्थमेव प्रवृत्ता:, अत: यज्ञानुष्ठानार्थत्वाद् यजुर्वेदस्य एव आदौ व्याख्यानम् उचितम् इति सायणेन उत्तरपक्ष:

स्थापितः।ऋग्वेदस्य शाकलशाखयाः प्रथममण्डलस्य पंचाशदुत्तरैकशतसूक्तरूपेण सूर्यसूक्तस्य पाठः विद्यते। अस्य ऋषिः प्रस्कण्वः, सूर्यदेवत्यम्। आदौ नवगायत्र्यः छन्दः अन्ते चतस्रोऽनुष्टुभ इत्युक्तम्। आश्विनशास्त्रे सौर्ये क्रतौ अस्य विनियोगः वर्तते। रश्मयः जगत्प्रसिद्धं अग्निसदृशसूर्यमुद्वहन्ति। सूर्यः सर्वेषां प्राणिनामवलोकनाय आकाशे वर्तमानः सन् ''देवो याति भुवनानि पश्यन्'' परिभ्रमति। सूर्यनारायणः सर्वं जगत्स्वप्रकाशेन प्रकाशयति अतः सूर्यस्य महत्वमुत्कृष्टतरं वर्तते। सर्वं जगदुदयं प्राप्ते सति सूर्यस्य स्वे-स्वे कर्मणि प्रवृत्तं भवति। यतस्तु सूर्यः सर्वस्य प्रेरकः। सूर्यः सर्वस्य शुद्धकत्र्ता वर्तते ''येना पावक चक्षसा'' इति। अस्मिन् पाठे ऋग्वेदस्य सूर्यसूक्तस्याध्यात्मिकम् सामाजिकंचाध्ययनं भवता कृतम्। अग्रिमे पाठे भवान् ऋग्वेदस्य विष्णुसूक्तस्याध्ययनं करिष्यति। सूक्तेऽस्मिन् दश ऋचः सन्ति। प्रथमायामृचि प्रलयावसानानन्तरं हिरण्यगर्भस्योत्पत्तिः तस्य च सर्वाधारकत्वं प्रतिपादितम्। तेनैव परमात्मना सर्वमिदं जगतृ संसृज्य तत्संचालनाय विविधाः नियमाः विनिर्मिताः। तन्निर्मितानां नियमानां पालनं सर्वेऽपि मानवाः (चराचारात्मकाः जीवाः) देवाश्च कुर्वन्ति। स च हिरण्यगर्भः निर्विशेषब्रह्मसकाशात्समुद्भूतः तत्प्रतिपादनक्रमे चतुष्पाद् ब्रह्मणो निरूपणं विहितम्। 'त्रिपादूर्ध्वमुदैत्पुरुषः पादोस्येहाभवत्पुनः' मंत्रबलाद्ब्रह्मणः पुर-पुरुष-परात्पर-निर्विशेषस्वरूपस्य वर्णनं प्रस्तुतम्। हिरण्यगर्भोत्पत्तिप्रसंगे मनूक्तसृष्टिक्रमस्य वेदांतोक्तसृष्टिक्रमस्य च संक्षिप्तवर्णनं कृतम्। ब्रह्मणः सर्वव्यापकत्वमपि तथैव प्रदर्शितं यथा वेदांतदर्शनमुपदिशति। एवमुक्तप्रकारेण हिरण्यगर्भसूक्तस्य दार्शनिकं विवेचनं यथायथप्रमाणैः प्रस्तुतम्। अस्याध्ययनेन अत्रत्यं समस्तमपि दार्शनिकबीजपरकं रहस्यं स्फुटं भविष्यति। कस्यापि पाठस्य कथमध्ययनं करणीयं येन तत्रत्यं विज्ञानं प्रस्फुटं स्यादिति धिया प्रस्तुतोऽयं पाठः जिज्ञासूनां अन्वेषकानां च कृते महदुपादेयो भविष्यतीत्यहं प्रत्याशासे। सूक्तमिदं ऋग्वेदसंहितायाः दशममण्डलातृ सड्.गृहीतमस्ति। सूक्तेस्मिन् दश ऋचः सन्ति। प्रलयावस्थायां ब्रह्मणो हृदि सिसृक्षा जागृता एकोऽहं बहु स्यां प्रजायेय इति। जगदिदं स्रष्टुं स मायाध्यक्षः तपोऽतप्यत। तस्य तपोबलात् सर्वप्रथमं हिरण्यमयाण्डः समुद्भूतः, तस्मिन् हिरण्यमयाडे यः पुरुषः समुद्भूतः स एवास्य सूक्तस्य प्रथममायामृचि हिरण्यगर्भात्मना स्तुतः। स एव पुरुषः समस्तस्यास्य चराचरस्य स्वामी आसीत्। तेनैव सर्वमिदं प्रपंचं समुत्पादितम्। तेनैव पृथिव्या अंतरिक्षस्य द्युलोकस्य च धारणं कृतम्। सोऽपि प्रजापतेः सकाशात् समुद्भूतत्वात् प्रजापतिरेवोक्तः। श्रुतौ प्रजापतिर्वै कः इत्युक्तम्। तस्मादयं 'क' इत्यनेनात्र संम्बोधितोस्ति। सर्वासां ऋचामन्ते कस्मै देवाय हविषा विधेम इति वाक्यं प्रयुक्तमस्ति। अस्य सूक्तस्याध्ययनेन प्रजापतेः मूलस्वरूपस्य ज्ञानं भवति। यस्मान्मायाध्यक्षादस्माकं संस्थितिस्तस्य ज्ञानमस्माभिरवश्यमेव कर्तव्यमिति धिया अस्य सूक्तस्याध्ययनमावश्यकम्।

१.८ अभ्यास प्रश्न

१. हिरण्यगर्भसूक्तस्य सारं लिखत।

२. हिरण्यगर्भस्य महिम्न: वर्णनं कर्तव्यम्।

३. हिरण्यगर्भ: समवर्रताग्रे... इत्यादिमन्त्रं व्याख्यात।

४. मा नो हिंसीज्जनिता... इत्यादिमन्त्रं व्याख्यात।

५. य: प्राणतो निमिषतो... इत्यादिमन्त्रं व्याख्यात।

६. हिरण्यगर्भस्य स्वरूपं लिखत।

७. हिरण्यगर्भसू कस्मै इति शब्दस्य विषये लघुप्रबन्धं लिखत।

८. मा नो हिंसीज्जनिता... इति मन्त्रं व्याख्यात।

९. यश्चिदापो महिना .... इति मन्त्रं व्याख्यात।

१०. यं कन्द्रसी अवसा तस्तभाने --- इति मन्त्रं व्याख्यात।

११. य आत्मदा बलदा...इति मन्त्रं व्याख्यात।

१.९ संदर्भ ग्रंथ

- वैदिक सूक्तावली, डॉ. रामदेव साहू, श्याम प्रकाशन, जयपुर, 2006.
- ऋक् सूक्तावलि - डॉ. विश्वनाथ शर्मा, अभिषेक प्रकाशन, जयपुर, 1195.
- वैदिक सूक्त मुक्तावली - डॉ. श्रीकृष्ण ोझा, अभिषेक प्रकाशन, 2005.
- वैदिक साहित्य और संस्कृति -वाचस्पति गैरोला, चौखम्भा प्रकाशन नई दिल्ली, 2003.

❖❖❖

अध्याय : १

यजुर्वेदभाष्ये

१.० उद्देश्यानि

अस्य पाठस्य अध्ययनेन भवान् -

रुद्रदेवस्य तथा शिवस्य रूपं ज्ञातुं शक्ष्यति।

शुक्लयजुर्वेदस्य रुद्राध्यायं सस्वरं पठितुं शक्ष्यति।

रुद्राध्याये स्थितानां मन्त्राणाम् अर्थं ज्ञातुं शक्ष्यति।

वैदिकमन्त्रव्याख्यानस्य पद्धतिं ज्ञातुं शक्ष्यति।

रुद्रस्य माहात्म्यं ज्ञातुं शक्ष्यति।

स्वयमेव मन्त्रस्य व्याख्यानं कर्तुं समर्थो भवेत्।

स्वयमेव मन्त्रस्य अन्वयं कर्तुं समर्थो भवेत्।

स्वयमेव मन्त्रे स्थितव्याकरणानि ज्ञातुं समर्थो भवेत्।

१.१ प्रस्तावना

यजुर्वेदभाष्ये लिखितमस्ति- तत्रादौ ब्रह्मपरम्परया प्राप्तं वेदं मन्दमतीन् मनुष्यान् विचिन्त्य तत्कृपया चतुर्धा व्यस्य ऋग्यजुःसामाथर्वख्यांश्चतुरो वेदान् पैल-वैशम्पायन-जैमिनी-सुमन्तुभ्यः क्रमादुपदिदेश। इत्यनेन वचनेन यजुस्संहिताया आचार्यः वैशम्पायनऋषिरस्ति। शुक्लं कृष्णमिति द्वेधा यजुश्च समुदाहृतम्। शुक्लं वाजसनं ज्ञेयं कृष्णं तु तैत्तिरीयकम्। इत्यनेन यजुर्वेदः द्विधा विभक्तः शुक्लः कृष्णश्च। चरणव्यूहपरिशिष्टे लिखितमस्ति यजुर्वेदस्य चतुर्विंशतिभेदाः भवन्ति तेष्वादौ दशशुक्लयजुर्वेदस्य, अवशिष्टाः चतुर्दशः कृष्णयजुर्वेदस्य च शाखास्सन्ति। अत्र शुक्लयजुर्वेदस्य दशशाखाः वर्णितास्सन्ति- काण्वाः, माध्यन्दिनाः, जाबालाः, शापेयाः, श्वेताः, श्वेततराः, ताम्रायणीयाः, पौर्णवत्साः, आवटिकाः परमावटिकाश्च। आसु शाखासु कण्वः माध्यन्दिनीया चेति प्रसिद्धे शाखे स्तः। अन्याषामनुपलब्धता दृश्यते।अत्र शुक्लयजुस्संहितायाः काण्वशाखामाध्यन्दिन- शाखयोश्चोपरि विचार्येते।

२.० माध्यन्दिसंहितायाः स्वरूपम्

मध्यन्दिने प्रोक्तत्वादियं शाखा माध्यन्दिनीया शाखा ख्यापितास्ति। शुक्लयाजुष् सम्प्रदाये माध्यन्दिनीया अतिप्रसिद्धा प्रतिष्ठिता च शाखा विद्यते। वाजसनेयिशाखासु महत्त्वपूर्णा संहिता विद्यते माध्यन्दिनीया संहिता। अस्यां संहितायां चत्वारिंशदध्यायास्सन्ति। माध्यन्दिनसंहिताया अपर नाम वाजसनेयीसंहिता अप्यस्ति। माध्यन्दिनशाखायाः प्रसारः भारतवर्षस्योत्तरे प्रान्ते प्रायशः दृश्यते। अस्याः शाखायाः सम्पादनं (1849-52) एकोनपञ्चाशदुत्तराष्टादशशततमात् द्विपञ्चाशदुत्त-राष्टादशशततमस्य ई. मध्ये बेबरमहोदयेन कृतम्। शुक्लयजुर्वेदस्य प्रतिनिधित्वङ्करोति-आदित्यसम्प्रदायः। अस्याः संहिताया उपदेशः सूर्येण वाजिस्वरूपिणो भूत्वा मध्यन्दिने याज्ञवल्क्यः प्राप्तवान्। मैकडानलमहोदयस्य विचारो विद्यते- वाजसनेयीसंहितायां शुद्धयज्ञसंबंधिताः मन्त्राः प्राप्यन्ते। अस्यां संहितायां विविधानि सूक्तानि प्राप्यन्ते। येषु सूक्तेषु पुरुषसूक्तं शिवसंकल्पसूक्तादयश्च प्रमुखास्सन्ति। पञ्चदशवाजसनेयिसंहिताषु माध्यन्दिनीया संहिता महत्त्वपूर्णा अस्ति।

२.२ काण्वसंहितायाः स्वरूपम्

काण्वसंहिता अपि चत्वारिंशदध्यायात्मिका विद्यते। अस्यां संहितायां चत्वारो दशकास्सन्ति। सर्वेषु दशकेषु दश-दश अध्यायास्सन्ति। चतुषु दशकेषु चत्वारिंशदध्यायास्सन्ति। अस्यां संहितायाम् अष्टाविंशत्युत्तरत्रिशतमनुवाकाः षडशीत्युत्तरद्विसहस्राणि मन्त्राश्च सन्ति। अधोलिखितायाः तालिकायाः माध्यमेन सुखदं ज्ञातुं शक्यते-

प्रथमो दशकः तृतीयो दशकः

अध्यायाः	अनुवाकाः	मन्त्राः	अध्यायाः	अनुवाकाः	मन्त्राः
योगः =	111	501	योगः = 97	554	

द्वितीयो दशकः चतुर्थो दशकः

अध्यायाः	अनुवाकाः	मन्त्राः	अध्यायाः	अनुवाकाः	मन्त्राः
योगः =	76	672	योगः = 44	359	

सम्प्रति काण्वशाखायाः संहिताब्राह्मणञ्चप्राप्येते।

ऋषिपरिचयः-

अविदित्वा ऋषिं छन्दो दैवतं योगमेव च।

योऽध्यापयेद् जपेद् वापि पापीयाञ्जायते तु सः।।

इत्यनेन श्लोकेन ऋष्यादीनां ज्ञानमावश्यकमस्ति। ऋषयो मन्त्रद्रष्ट्रारः इति प्रसिद्धेन

वाक्येन सर्वेषां मन्त्राणां द्रष्टारः ऋषयस्सन्ति। सर्वासु संहितासु मन्त्राः प्राप्यन्ते। अर्थात् सर्वासां संहितानां मन्त्राणाञ्च ज्ञानं तावत्पूर्णं न भवति यावत् ऋषीणां ज्ञानं न स्यात्। अत्रास्मिन् प्रकरणे ऋषीणां परिचयः कुर्मः। शुक्लयजुर्वेदसंहितायाः द्विधा विभजनं पूर्वोत्तम्। उभयोः द्रष्टाऋषी याज्ञवल्क्यकण्वौ स्तः। अत्रानयो ऋष्यो परिचयः कुर्मः।

याज्ञवल्क्यऋषेः परिचयः

पुराणानामनुसारेण शुक्लयजुर्वेदस्य प्रवर्तका ऋषय आसन याज्ञवल्क्यमहोदयाः। विष्णुपुराणे (3.5.3) अस्य ऋषेः नाम ब्रह्मरातसुत अपि आसीत्। भागवतमहापुराणानुसारेण (12.6.64) याज्ञवल्क्यं देवरातसुतमपि कथ्यते। ऐतरेयब्राह्मणानुसारेण (06.13) विश्वामित्रस्य शिष्येष्वेको आचार्यः देवरात आसीत् यस्य संज्ञा शुनः शेप अभवत्। अन्येषु पुराणेषु याज्ञवल्क्यं विश्वामित्रकुलीनं मन्यते। याज्ञवल्क्यस्य गुरोर्नाम वैशम्पायन आसीत्। याज्ञवल्क्यस्य पुत्रस्य नाम कात्यायनः पौत्रस्य च नाम वररुचिरासीत्। बृहदारण्यकोपनिषदनुसारेण याज्ञवल्क्यस्यापर नाम वाजसनेय आसीत्। अस्य उपनिषदः भाष्यभूमिकायां भगवत्पादाः शङ्कराचार्याः वदन्ति यज्ञस्य वत्ता यज्ञवल्क अस्ति। तस्य पुत्रस्य नाम याज्ञवल्क्यो अभवत्। शतपथब्राह्मणस्यानुसारेण (14.9.4.33) याज्ञवल्क्यं उद्दालकआरुणेः शिष्यमासीदित्युत्तमस्ति।याज्ञवल्क्यस्य पञ्चदशशिष्या आसन् पुराणेष्वेतान् सर्वान् शिष्यान् वाजिनः कथ्यन्ते।

कण्वऋषेः परिचयः

पुराणेष्वनुसारैः बौधायनशाखायाः प्रवर्तकाः बौधायनस्य पुत्रा आसन् कण्वमहोदया। कण्वस्य गुरुर्नाम याज्ञवल्क्य आसीत्। शुक्लयजुर्वेदस्याध्ययनं याज्ञवल्क्येन गुरुणा एव कृतम्। अनन्तरमादित्यसम्प्रदायान्तर्गत काण्वशाखायाः प्रवर्तनं कृतवान्। काण्वीयाः जनाः मन्त्रपाठः ऋग्वेदीयानां जनानामनुसारेण कुर्वन्ति। यथा- यत्र काण्वाः पुरुषः उच्चरन्ति तत्र माध्यन्दिनीयाः पुरुखः इति उच्चारणं कुर्वन्ति। वैदिकसाहित्यस्येतिहासः इत्यस्मिन् ग्रन्थे कण्वऋषेः प्रकरणे प्राप्यते राहुकरजीमहोदयानुसारेण कण्वऋषेः वंशवृक्षाणामवलोकनमीत्थं प्राप्यते

२.४ माध्यन्दिनसंहितायाः प्रतिपाद्यः

माध्यन्दिनसंहिता चत्वारिंशदध्यायेषु प्राप्यते। प्रथमद्वयोरध्याययोः दर्शपौर्णमासयज्ञसंबंधिनः मन्त्राः प्राप्यन्ते। तृतीयेऽध्याये अग्निहोत्रस्य चातुर्मासस्य च मन्त्राः प्राप्यन्ते। चतुर्थाध्यायतः अष्टमाध्यायपर्यन्तं सोमयागानां वर्णनमस्ति। नवमदशमाध्याययोः वाजपेयराजसूययागादिविषयकाः तत्संबंधीमन्त्राश्च सन्ति। एकादशाध्यायतः अष्टादशाध्यायपर्यन्तम् अग्निचयनादिप्रकरणस्य वर्णनमस्ति। एकोनविंशाध्यायतः एकविंशाध्यायपर्यन्तं सौत्रामणियज्ञस्य विधानमस्ति। द्वाविंशाध्यायतः पञ्चविंशाध्यायपर्यन्तम्

अश्वमेधयज्ञस्य विधानं वर्णितमस्ति। षड्विंशाध्यायत: एकोनत्रिंशं यावत् खिलमन्त्राणां प्रयोग: दृश्यते। त्रिंशत्तमेऽध्याये पुरुषमेधस्य वर्णनमस्ति। एकत्रिंशत्तमेऽध्याये पुरुषसूक्तम्स्ति। द्वात्रिंशदध्यायत: त्रयस्त्रिंशदध्यायं यावत् सर्वमेधयज्ञस्य वर्णनमस्ति। चतुस्त्रिंशत्तमेऽध्याये शिवसङ्कल्पसूक्तमस्ति। पञ्चत्रिंशत्तमेऽध्याये पितृमेधस्य वर्णनमस्ति। षट्त्रिंशदध्यायारभ्य एकोनचत्वारिंशदध्यायपर्यन्तं प्रवर्ग्यागस्य वर्णनमस्ति। चत्वारिंशत्तमेऽध्याये ईशावास्योपनिषद् विद्यते। अनेन चत्वारिंशदध्यायेषु विषया: वर्णितास्सन्ति।

माध्यन्दिनसंहिताया: भाष्यकारा:

माध्यन्दिनसंहिताया: नैके भाष्यकारास्सन्ति। शौनक-उव्वट-गौरधर-महीधरादय: भाष्यकारा: माध्यन्दिनसंहिताया: भाष्यकारास्सन्ति।

१ शौनक:

माध्यन्दिनसंहिताया: भाष्यं कुर्वन् आचार्या उव्वटमहोदया: एकत्रिंशत्तमेऽध्याये शौनकमहोदयस्य भाष्यस्योल्लेख: कुर्वन्ति। उव्वटमहोदयानुसारेण शौनकेन पुरुषसूक्तस्य विनियोग: मोक्षेऽस्तीति लिखित:। तत्रैव एवमनुमीयते शौनकस्य भाष्ये वेदान्तस्य स्वरूपं दृश्यते।

२ उव्वट:

माध्यन्दिनसंहिताया उपरि उव्वटमहोदयस्य भाष्यमतीव उत्कृष्टमस्ति। स्वकीये विषये भाष्यस्यान्ते सूचयन्ति आचार्या:

आनन्दपुरवास्तव्यवज्रटाख्यस्य सूनुना।

उव्वटेन कृतं भाष्यं पदवाक्यै: सुनिश्चितै:।

भाष्यादीश्च पुरस्कृत्य अवन्त्यामुवटो वसन्।

मन्त्राणां कृतवान् भाष्यं महीं भोजे प्रशासति।

इत्यनुसारेण उव्वटाचार्य: आनन्दपुरनिवासिन: आचार्यवज्रटमहोदयस्य पुत्र आसन्। अवन्त्यां निवसन् राजाभोजस्यकाले भाष्यस्यास्य रचना कृतवान्। उव्वटमहोदया: काश्मीरीब्राह्मण आसीत्। सुधासागरीटीकाया अनुसारेण उव्वटमहोदया: मम्मटस्यानुज आसीत्। मम्मटस्य पितु: नाम जैयट आसीत्। अत: सुधासागरीटीकाकारस्य भीमसेनस्य मतमत्र पुष्टं न भवति।

उव्वटभाष्यस्य पाठद्वयमुपलभ्यते। प्रथम काश्या: पाठ: यस्मिन् पुरुषसूक्तोपरि उव्वटमहोदयानां स्वकीयं भाष्यमस्ति, द्वितीय: महाराष्ट्रस्य पाठ: यस्मिन् पुरुषसूक्तस्योपरि

शौनकीयभाष्यमस्ति। उव्वटमहोदयस्यान्यारचना: ऋक्प्रातिशाख्यभाष्यम्, यजु:प्रातिशाख्यभाष्यम्, ऋक्सर्वानुक्रमणीभाष्यं वेदार्थदीपिका वा सन्ति। परञ्चास्मिन् विषये निश्चितरूपेण किञ्चित् वक्तुं न शक्यते।

३ गौरधर:

आचार्या: गौरधरमहोदया: भाष्यमस्ति ऋजुभाष्यम्। अस्योल्लेख: स्तुतिकुसुमाञ्जले: प्रणेता जगद्धरेण कृतम्। काश्मीरस्यासीत् जगद्धरमहोदया:। अस्य काल: (1352) द्विपञ्चाशदुत्तरत्रयोदशशतं निर्धारितमस्ति। जगद्धरस्य पितु: नाम रत्नधर:, पितामहस्य नाम गौरधर आसीत्। गौरधरमहोदयस्य काल: अनुमानत: त्रयोदश शताब्द्यां निर्धार्यते। प्रो. कुन्दनलालशर्ममहोदया: लिखन्ति गौरधरनाम्ना वाजयसनेयी-संहिताया: कतिपयानामध्यायानां भाष्यं ''बड़ौदा'' स्थले सुरक्षितमस्ति।

४ महीधर:

आचार्या: महीधरमहोदया: काश्या: ब्राह्मण आसीत्। मन्त्रमहोदधिग्रन्थस्य रचनाकाल: (1645) पञ्चचत्वारिंशदुत्तरषोडशशततम: लिखित:। महीधरमहोदयस्य काल: षोडशशताब्द्या: उत्तरार्द्ध सुनिश्चितमस्ति। वाजसनेयीसंहिताया: भाष्यस्य मङ्गलश्लोके स्पष्टमस्तीदं भाष्यम् उव्वट: माधवश्च भाष्यानामाधारोपरि विरचितमस्ति। वाजसनेयीसंहितायां (13/45) महीधरेण माधवभाष्यमुद्धृतमस्ति। डॉ. स्वरूपस्य मतमस्ति महीधरस्योद्धरणं वेङ्कटमाधवस्यास्ति। पं. भगवद्दत्तमहोदयानां मतमस्ति इदमुद्धरणं सायणमाधवयौ: स्त:।।

५ हलायुध:

सायणस्य पूर्ववर्तिन आसन् हलायुधमहोदया:। अस्य महोदयस्य भाष्यस्यनाम ब्राह्मणसर्वस्वमस्ति। अस्य भाष्यस्यारम्भे हलायुध: स्वकीये विषये किञ्चित् प्राप्नोति येनैवं प्रतिभाति हलायुधमहोदया: बङ्गालप्रान्तस्यान्तिमोहिन्दू राज्ञ: लक्ष्मणसेनमहोदयस्य सभायां धर्माधिकारी आसन्। बाल्यकालादेव राजपण्डिता: आसन् इमे आचार्या:। यथा-

बाल्ये ख्यापितराजपण्डितपद: श्वेतांशुबिम्बोज्ज्वल:।

च्छत्रोसित्तमहामहन्तकपदं दत्वा नवे यौवने।

यस्मै यौवनशेषयोग्यमखिलक्ष्मापालनारायण:।

श्रीमाँल्लक्ष्मणसेनदेवनृपतिर्धर्माधिकारं ददौ।।

परञ्च लक्ष्मणसेनमहोदयस्य राज्यकालस्य विषये विद्वत्सु वैमत्यमस्ति तथापि श्रीधरकृत् सदुत्तिकर्णामृतम्, अद्भुतसागर:, टोडरानन्दप्रभृति प्रसिद्ध प्रामाणिकग्रन्-

थानामाधारोपर्येवमनुमीयते (1178-79) अष्टसप्तत्युत्तरैकादशशततमात् एकोनाशीत्युत्तरैकादशशततमं यावत् ईस्वीमध्ये अयं राज्ञः सिंहासनारूढ़ोऽभवत्। (1200) ईस्वीये द्वादशशततमेवर्षेऽस्य राज्यस्य समाप्तिरभवत्। हलायुधस्य साहित्यिकजीवनं तस्मिन्नेवकाले आसीदित्यपि प्राप्यते।

काण्वसंहितायाः भाष्यकाराः

यथापूर्वमुदितः शुक्लयजुर्वेदस्य द्वे शाखे स्तः। प्रथमा शाखा माध्यन्दिनशाखा विद्यते। अस्याः शाखायाः भाष्यकारेषु कतिपयानां भाष्यकाराणां यथा पुस्तकेषु प्राप्तः तथा परिचयः प्रदत्तः। इदानीं द्वितीया शाखा काण्वीया शाखा विद्यते। अस्याः शाखायाः ये भाष्यकाराः सन्ति तेषां परिचय अत्र प्रदीयते।

१ सायणः

आचार्यसायणस्य भाष्यं काण्वसंहिताया उपरि प्राप्यते। परञ्च सम्पूर्णा नास्ति। केवलं काण्वसंहितायाः पूवार्द्ध सायणाचार्यस्य भाष्यं प्राप्नोति। अनन्ताचार्य-महोदयस्यानुकथनमस्ति सायणाचार्यस्य भाष्यं काण्वसंहितायाः उत्तरार्द्धभागोपरि नास्ति। ते वदन्ति

व्याख्या काण्वशाखीयसंहिता पूर्वविंशतिः।

माधवाचार्यवर्येण स्पष्टीकृत्य न चोत्तरा।।

अतस्तां व्याकरिष्येऽहमनन्ताचार्यनामकः।।

भगवद्दत्तमहोदयस्य कथनमस्ति- "सम्भवतः अनन्ताचार्यस्य कालपर्यन्तं सायणस्य उत्तरार्द्धभाष्यं लोपगतम् आसीत्।" परञ्च कुन्दनलालशर्ममहोदयाः वदन्ति सम्भाव्यते अवशिष्टानां संहितानामुपरि सायणेन भाष्यं न लिखितः स्यात्।

२ आनन्दबोध-भट्टोपाध्यायः

पञ्चदशषोडशशताब्योर्वा "काण्व वेदमन्त्र भाष्य संग्रह" नाम्नः ग्रन्थः आचार्येण आनन्दबोधभट्टोपाध्यायमहोदयेन विरचितः। भट्टोपाध्यायमहोदयस्य पितुः नाम जातवेदभट्टोपाध्याय आसीत्। अस्य गुरोर्नाम परिव्राजकाचार्य वासुदेवपुरी आसीत्। इयं सूचना ईशावास्योपनिषद्भाष्यस्य पुष्पिकायां प्रदत्तास्ति।

आनन्दबोधमहोदयस्य भाष्यं काण्वसंहिताया अन्तिमे दशके सरस्वतीसुषमायां प्रकाशितास्ति। सरस्वतीसुषमायाः प्रकाशनं काश्यां भवति। विदितमस्ति काण्वसंहिता चतुषु दशकेषु प्राप्यते। अन्तिमं दशक एकत्रिंशाध्यायतः चत्वारिंशदध्यायं यावत् प्राप्यते। अवशिष्टेषु दशकेष्वपिभाष्यं प्राप्यते। आनन्दबोधमहोदयस्य भाष्ये उव्वटकृत्-माध्यन्दिनसंहिताभाष्यस्य किञ्चित् दिग्दर्शनं भवति। तथापि मौलिकतायुक्तं भाष्यमस्त्यस्यमहा-

ेदयस्य। इदं भाष्यं सुबोधगम्यमस्ति। अस्मिन् भाष्ये देवताऋषिछन्दानाञ्च निर्देशोस्ति।

३ अनन्ताचार्यमहोदयाः

अस्याचार्यस्य निवासः काशी आसीत्। अनन्ताचार्यमहोदयस्य मूलनाम अनन्तभट्ट आसीत्। अनन्तभट्टमहोदयस्य भाष्यं काण्वसंहितायाः उत्तरार्द्ध प्राप्यते। अनन्ताचार्यमहा-ेदयात् पूर्ववर्तिन आसन् सायणमहोदयाः। यजुः प्रातिशाख्योपरि हस्तलीपि अतिप्राचीनं प्राप्यते। अनन्ताचार्यमहोदयस्य कण्वकण्ठाभरणे याजुष्सर्वानुक्रमण्याः होलीभाष्यस्यै-कोद्धरणं प्राप्यते। अस्य महोदयस्य भाष्ये महीधरमहोदयस्य छाया दृश्यते। सप्तदशश-ताब्द्यामस्यमहोदयस्य काल आसीत्। अस्य पितुः नाम नागदेवभट्टः मातुर्नाम भागीरथी चासीत्। अस्य भाष्यस्य नाम भावार्थदीपिका विद्यते। वैष्णवसम्प्रदायस्यानुयायिन आसन् एते महोदयाः।

अनन्ताचार्यमहोदयानां प्रकाशिताः ग्रन्थाः अत्र सन्ति- (1) शतपथब्राह्मणभाष्यम् (2) कण्वकण्ठाभरणम् (3) यजुः प्रतिशाख्यभाष्यम् अथवा पदार्थ-प्रकाशः (4) भाषिकसूत्रभाष्यञ्च।।

शुक्लयजुर्वेदस्यान्याः शाखाः-

अस्य वेदस्यान्या शाखास्सन्ति जाबालाः, शापेयाः, तापायनीयाः, पौण्डूवत्साः, कापोलाः गालवाः, वैजवापाः, कात्यायनीयाः। अत्र जाबालाः याज्ञवल्क्यस्य शिष्याः आसन्। वर्तमाने अस्याः शाखायाः जाबालोपनिषद् एव प्राप्यते। जाबालब्राह्मणस्य कल्पस्यापि उद्धरणं प्राप्यते। जाबालगृहसूत्रस्य वर्णनं गौतमधर्मसूत्रे, जाबालधर्मसूत्रे स्मृा-तिचन्द्रिकायाञ्चोद्धरणरूपेण प्राप्यते। अनन्तभट्टमहोदयाः शवीया इति पाठः स्वीकरोति। तापायनीयाः भाष्यस्य वर्णन काण्वसंहितायाः भाष्यभूमिकायां प्राप्यते। स्मृतिचन्द्रिकायाः श्राद्धकाण्डे वत्ससूत्रस्य वचनमुद्धृतमस्ति। कापोलाः इति विषये किञ्चिन्न प्राप्यते। गालवः ऋग्वेदीयशाखायाः प्रवर्तकाः आसन्। अनेन प्रकारेण सर्वासां शाखानां विवरणं प्राप्यते।

२.५ रूद्राध्यायः

प्रस्तावना

शुक्लयजुर्वेदसंहितायाः षोडशाध्यायो रुद्राध्यायीनाम्ना प्रसिद्धः। पञ्चदशे अध्याये अग्निचयनप्रकारं वर्णयित्वा षोडशे शतरुद्रियहोममन्त्राः उत्ताः। एषु मन्त्रेषु रुद्राध्याये रुद्रदेवतायाः स्वरूपं, वैशिष्ट्यं च प्रस्तूयते। यद्यपि रुद्रः काचन देवता परन्तु स भ-गवत्स्वरुपः।श्रीभगवान् सर्वव्यापी। रुद्रस्यापि वर्णनायां तस्य सर्वस्वरूपता प्रकटिता।

देवमनुष्यदिरूपेण यथा तस्य स्थिति: तथा पर्णनीहारादिरूपेणापि स एव प्रकाशते। अस्मिन् अध्याये मुख्यत: रुद्रं प्रति नमस्कार: प्रार्थना च विहिता। शिवस्य शिवधर्मस्य शैवधर्मस्य वा प्रसार: शुक्लयजुर्वेदसाहित्येतिहासे गुरुत्वपूर्णस्थानम् अलंकरोति।। रुद्रशब्दास्यार्थ: भीषण: भयङ्करो वेति। अन्तिमक्षणे य: सर्वान् रोदयति स: रुद्ररूपेण ख्यातो भवति। जन्मसमये स्वयमेव भीषणं क्रन्दति अपि च तत्-शब्देन अखिलभुवनं य: कम्पयति स: रुद्र:। अत्र द्वौ भागौ क्रियेते। तत्र प्रथमभागे सप्त मन्त्रा:, तथा द्वितीये भागे सप्त मन्त्रा: व्याख्यास्यन्ते।

(३) रुद्रदेवताया: स्वरुपं वैशिष्ट्यञ्च

शुक्लयजुर्वेदे रुद्राध्याये रुद्रदेवताया: स्वरूपं तथा वैशिष्ट्यं विस्तारेण समालोचितम्। शैवधर्मस्य उत्पत्ते: तथा प्रसारस्य इतिहासे शुक्लयजुर्वेदस्य अतीव महत्त्वं वर्तते इत्यत्र नास्ति सन्देहलेशावसर:। शुक्लयजुर्वेदसंहिताया: षोडश: अध्याय: रुद्राध्यायनाम्ना प्रसिद्ध:। रुद्रशब्दस्य अर्थ: भीषणं भयङ्करं वा। पापिनो नरान् दु:खभोगेन रोदयति इति रुद्र:। किञ्च रुत् दु:खं द्रावयति रुद्र:। यद्वा श्रु गतौश् ये गत्यर्थस्ते ज्ञानार्था:। रवणं रुत् ज्ञानं राति ददाति रुद्र: ज्ञानम् भावे क्विप् तुगागम:। रुत् ज्ञानप्रद: इति वा।

ऋग्वेदे रुद्र: अन्तरीक्षस्थानस्य देव:, मरुतां पितेति प्रसिद्ध:। शुक्लयजुर्वेदस्य चतुर्षु सूक्तेषु तथा एकस्य सूक्तस्य भागमात्रे च सोमदेवेन सह तस्य स्तुति: दृश्यते। ऋग्वेदे अपि रुद्रस्य भयङ्करं रूपं बहुषु स्थलेषु वर्ण्यते। वैदिकदेवताया: बाह्यप्रतीकं प्रत्येकम् एकम् एकं प्राकृतिकघटनरूपम्। तस्मात् रुद्रदेवस्य प्रतीकं वज्र: इति। अत: वज्रस्य अधिष्ठात्री-देवता रुद्र: जगत्प्रपञ्चस्य स्वामिरूपेण प्रकीर्तित: अभूत्। वज्रस्य उत्पन्नकाले अर्थात् वज्रपतनकाले तस्य भीषणशब्देन त्रिभूवनं भयभीतं भवति। इयमेव घटना रूपकावरणेन उच्यते यत् रुद्र: जन्म-क्षणे भीषणचित्कारं करोति। वज्रेण सह भीषण-विनाशशब्दौ नित्यं संम्बद्धौ। तस्मात् तस्य अधिष्ठाता देव: रुद्र: भीषण: गर्जनशी-लश्च। ऋग्वेदे रुद्रदेवताम् उद्दिश्य स्तुतिनिवेदकसूक्ते सर्वदा भयानकरूपेण संहारकरूपेण वा अयम् आविर्भवति। तस्य रुद्रस्य रुद्ररूपदर्शनेन साकं तस्य कल्याणमयरूपस्य अपि वर्णना वेदे बहुत्र प्राप्यते। यथा स: वैद्यश्रेष्ठ: इत्यपि श्रुयते। तथा हि आम्नातं -भिषत्तं त्वां भिषजां शृणोमि(ऋ २।।३३।।४)। ऋग्वेदस्य कस्यपि एकस्य मन्त्रे (२।३३।२) रुद्रम् उद्दिश्य प्रार्थना अपि विहिता, तथा ह्याम्नातं -शतं हिमा अशीय भेषजेभि: इति अर्थात् हे रुद्रदेव येन अहं तव प्रदत्तेन भिषजा शतं वर्षाणि जीवामि इति। भीषणस्य रुद्रस्य वेदे चिकित्सकत्वेन वर्णनायां तस्य कल्याणरूपस्यापि परिचय: प्राप्यते। तस्मादेव वेदे भेषज इति जलाष इति च शब्दद्वयं रुद्रसम्पर्के प्रयुत्तो भवति।

रुद्रदेवस्य चारित्रिकवर्णना अपि ऋग्यजुर्वेदभेदेन भिन्ना भवति। यथा ऋग्वेदे रुद्रस्य

संहारत्वेन अधिकवर्णना अस्ति। अपि च यजुर्वेदे घोर: घोरतर: तथा शिव: शिवतर: इति। किञ्च स: यजुर्वेदे शिवशङ्कर-मयस्कर-शम्भव-मयोभवप्रभृतिभि: कल्याणवाचकसंज्ञाभि: स्तूयते। प्रत्येक विशेषणवाचकशब्दस्यार्थ: कल्याणजनितसुखम् इति। य: रुद्र: स एव शिव:। किन्तु शुक्लयजुर्वेदे शिवरुद्रयो: मध्ये वैपरीत्यम् सदपि तस्य समन्वय: च दृश्यते। न केवलम् अर्याणाम् अपि च अनार्याणाम् अन्त्यजानां च देवतारूपेन स: रुद्र: वर्णित:। न केवलम् उच्चवर्णानाम्, अपि तु कुलालानां लौहकाराणां । व्याधादीनामपि स: देव: पालकश्च। न केवलं मनुष्याणाम् अपि तु समस्तप्राणीनां यथा गवाम् अशवानां शुनां च स: एव पालक:। न केवलं सज्जनानाम् अपि तु असच्चौर-लुण्ठकानामपि देवता पालकश्च। तस्मात् तस्मिन् रुद्रे बहुविपरीतधर्माणाम् एकत्र समावेश: दृश्यते। किञ्च स: आर्य-अनार्याणां सतामसतां सर्वेषाम् उपास्य:। एकत्र स: शिव: शान्त: पालक: उपास्यश्च, अपरत्र स: रुद्र: भीषण: संहारकश्च इति। शुक्लयजुर्वेदे रुद्र: सगुणदेवान् अतिक्रम्य निर्गुणपरमेश्वरेण परिणत: अभवत्।

रुद्राध्याये अनार्यलुण्ठकान्त्यजादीनाम् उपासकत्वेन पालकत्वेन रुद्र: वर्णित: अस्ति। अत: आदौ स: रुद्र: अनार्याणामुपास्य: आसीत् अनन्तरञ्च आर्यगणै: स: पूजित:, अत: स: आर्यानामनार्याणाम् उपास्य: इति केचन पण्डिता:। परन्तु ऋग्वेदे रुद्र: सम्पूर्ण: आर्यदेव:। केभ्यश्चन ब्राह्मणग्रन्थेभ्य: ज्ञायते आर्यानार्योभयधर्मे रुद्रदेवस्य पूजा प्रचलिता आसीत्।

शुक्लयजुर्वेदे रुद्राध्याय: काव्यसौन्दर्येण मण्डित:। अध्यायेऽस्मिन् रुद्र: पशुपति-शम्भु-शिवशङ्कर-गिरिश- गिरिशन्त- शितिकण्ठ-नीलग्रीव-कपर्दि-प्रभृतिभि बहुभि: नामभि: अलंकारित:। ऋग्वेदे रुद्र: वज्रस्य वातस्य वा देवता। शुक्लयजुर्वेदे न केवलं वज्रस्य वातस्य, अपि तु सूर्येण साकं रुद्रस्य अभिन्नत्वं नैकन मन्त्रेण प्रतिपादितम्। तत्र रुद्र: सूर्यस्य एकांश: इति। तस्मात् सूर्योदयास्तचलानुसारेण प्रत्येकम्। अपि मुहूर्त पृथक् पृथङ्नामभि: तस्य स्तुति:। सूर्योदयकाले अस्ताचलसमये सूर्यस्य सहस्त्ररश्मय: स्पष्टीभवन्ति। ऋषिरूपस्य कवे: कल्पनया सूर्यविम्ब: मस्तक इव किञ्च चतुर्धाप्रसारितरश्मय: दीर्घजटा इव इति। कपर्दी जटाशब्दवाची। यस्य जटा अस्ति स: कपर्दी इत्युच्यते। तस्मात् सूर्येण साकम् एकात्मभूतस्य रुद्रस्य अन्यं नाम कपर्दी इति (१६।।१०)। (रुद्राध्यायस्य सप्तममन्त्रे काव्यसौन्दर्ये)। अस्तगामिन: सूर्यरूपात् रुद्रस्य नीलग्रीव इति नाम्न: उत्पत्ति:। अस्ताचलसमये आकाशं वर्णक्रीडायां।

।। रुद्राध्याय: ।।

निमज्जितं भवति। तदा सूवर्णमण्डित: सूर्य: पश्चिमायां दिशि शोभितो भवति। सूर्यविम्बस्य मध्ये नीलवर्णरेखा एका लक्ष्यते। मध्यभाग: शरीरस्य कण्ठसदृश:। ग्रीव: कण्ठपर्यायवाची। ग्रीवस्य नीलवर्णत्वात् सूर्य: नीलग्रीवो नीलकण्ठ इति नाम्ना प्रसिद्ध:

इति। अतः सूर्येण साकम् अभिन्नात्मनः रुद्रस्यापि नाम नीलग्रीवो नीलकण्ठ इति वा। तथा हि सप्तममन्त्रे

असौ योऽवसर्पति नीलग्रीवो विलोहितः।

उतैनं गोपा अदृश्रन्नदृश्रन्नुदहार्यः स दृष्टो मृडयाति नः।।

एवं सूर्यरूपरुद्रदेवतायाः अस्ताचलसमये उद्बुद्धः रम्यः मुहूर्तः आकृष्यमाणो भवति। तदा गावः गोष्ठं प्रति प्रत्यागच्छन्ति। गवां प्रत्यागमनेन साकम् आगतः गवां पालकः गोपालः अपि सूर्यरूपेण रुद्रेण सृष्टस्य परिवेशेन आकृष्टं भूत्वा तं रुद्रदेवं पश्यति। समयोऽयं ग्राम्यरमणीनाम् अपि जलानयनसमयः। ताः रमण्यः जलानयनसमये आकृष्टं भूत्वा रुद्रदेवस्य अपूर्वलीलां पश्यन्ति। रुद्राध्याये काव्यरूपेण एतानि मन्त्राणि काव्यकल्पनया अलंकारेण च अलंकृतानि सन्ति इति।

शतरूद्रिय

नमस्ते रूद्र मन्यव उतो त इषवे नमः। बाहुभ्यामुत ते नमः।।१ ।।

उ0 शतरुद्रियहोमः। 'अथातो यः शतरुद्रियं जुहोति' इत्युपक्रम्य स एषोऽत्राग्निश्चितो बुभुक्षमाणो रुद्ररूपेणावतिष्ठते। तस्य तर्पणं देवैः कृतम्। द्वितीयं दर्शनम्। यद्वै शतरुद्रियं जुहोतीत्युपक्रम्य प्रजापतेर्विस्त्रस्तादित्यभिधाय मन्त्रार्थानुगुण्येन श्रुतिर्भवति। स एव शतशीर्षो रुद्रः समभवदिति। नमस्ते रुद्रमन्यवे रौद्रोऽध्यायः परमेष्ठिन आर्षं देवानां वा प्रजापतेर्वा आद्योऽनुवाकः षोडशभिऋग्भिः। तत्र एको रुद्रो देवता एका गायत्री तिस्त्रोऽनुष्टुभस्तिस्त्रः पङक्त्यः सप्तानुष्टुभौ द्वे जगत्यौ। नमोऽस्तु ते। हे रुद्र, ते तव संबन्धिने मन्यवे क्रोधाय। उत अपि च। ते तव संबन्धिने इषवे काण्डाय नमोऽस्तु। बाहुभ्याम् उत अपि ते तव संबन्धिभ्यां बाहुभ्यां नमोऽस्तु।।१ ।।

'शतरुद्रियहोम उत्तरपक्षस्यापरस्या स्त्रत्तयां परिश्रित्खर्कपर्णेनार्ककाष्ठेन शातयन्सततं जर्तिलमिश्रान् गवेधुकासक्तूनजाक्षीरमेके तिष्ठन्नुदङ्नमस्त इत्यध्यायेन त्र्यनुवाकान्ते खाहाकारो जानुमात्रे पञ्चान्ते च नाभिमात्रे प्राक् च प्रत्यवरोहेभ्यो मुखमात्रे प्रतिलोमं प्रत्यवरोहान् जुहोति प्रमाणेषु नमोऽस्त्विति प्रतिमन्त्रम्' (का० १८।१।१—५)। अस्यार्थः। हिरण्यशकलैरग्निप्रोक्षणानन्तरं शतरुद्रियसंज्ञो होमः तस्याहवनीये प्राप्तावपवादमाह। उत्तरपक्षपश्चिमकोणे याः परिश्रितो जङघामात्र्यादयः पूर्वं निखातास्तासु होमः। तत्र विधिः। जर्तिलैरारण्यतिलैर्मिश्रान् गवेधुकासक्तूनर्कपत्रेण जुहोति। किं कुर्वन्। अर्ककाष्ठेन संततं क्षारयन् परिश्रित्सु पातयन् अर्कपत्रं दक्षकरेणादायार्ककाष्ठं वामेनादाय तेन पातनीयम्।

सक्तुस्थाने अजादुग्धमिति केचित्। उदङभुखो नमस्त इत्यध्यायेन। तत्रानुवाकत्रयान्ते 'अर्भकेभ्यश्च् वो नमः' (क० २६) इत्यत्र जानुमात्रे परिश्रिति खाहाकारो विधेयः। पञ्चानुवाकान्ते 'सुधन्नने च' (क० ३६) इत्यत्र नाभिमात्रे परिश्रिति खाहाकारः। 'नमोऽस्तु रुद्रेभ्यः' (क० ६३) इति प्रत्यवरोहमन्त्राः तेभ्यः प्राक् मुखमात्रपरिश्रिति खाहाकारः। नमोऽस्त्विति कण्डिकात्रयेण प्रतिलोमं होमः। 'ये दिवि' (क० ६४) इति मुखमात्रे। 'येऽन्तरिक्षेः (क०६६) इति जानुमात्रे। इति सूत्रार्थः। नमस्ते। षोडशर्चोऽनुवाकः एकरुद्रदैवत्यः आद्या गायत्री तिस्त्रोऽनुष्टुभः तिस्त्रः पङक्त्यः सप्तानुष्टुभः द्वे जगत्यौ। अध्यायस्य परमेष्ठिदेवप्रजापतय ऋषयः। मा नः (क० १५—१६) इति द्वयोः कुत्सोऽपि ऋषिः। हे रुद्र, रुत् दुःखं द्रावयति रुद्रः। यद्वा 'रु गतौ' ये गत्यर्थास्ते ज्ञानार्थाः। रवणं रुत् ज्ञानं राति ददाति रुद्रः ज्ञानम् भावे क्विप् तुगागमः। रुत् ज्ञानप्रदः। यद्वा पापिनो नरान् दुःखभोगेन रोदयति रुद्रः। हे रुद्र, ते तव मन्यवे क्रोधाय नमः नमस्कारोऽस्तु। उतो अपिच ते तवेषवे बाणाय नमः। उतापि च ते तव बाहुभ्यां नमः। तव कोधबाणहस्ता अस्मदरिष्वेव प्रसरन्तु नास्मास्वित्यर्थः।।१।।

या ते रुद्र शिवा तनूरघोराऽपापकाशिनी । तया नस्तन्वा शन्तमया गिरिशन्ताभिचाकशीहि।।२।।

या। ते। रुद्द्र। शिवा। तनू। अघौरा। अपापकाशिनीच्यपाप काशिनी।। तया। न। तन्वा। शन्तमयेतिशम् तमया। गिरिशन्तेतिगिारि शन्त। अभि। चाकशीहि।।२।।ल

उ० या ते तव हे रुद्र, शिवा शान्ता तनूः शरीरम्। अघोरा अविषमा। अपापकाशिनी पापमसुखं या प्रकाशयति सा पापकाशिनी पापप्रकाशिनी। न पापकाशिनी अपापकाशिनी। तया नः अस्मान् तन्वा शन्तमया सुखतमया सुखयितृतमया अतिशयेन सुखत्रिया। गिरिशन्त गिरौपर्वते कैलासााक्ष्ये अवस्थितः शं सुखं तनोतीति गिरिशन्तः। यद्वा गिरि वाच्यवस्थितः सुखं तनोतीति। यद्वा गिरौ मेघेऽवस्थितो वृष्टिद्वारेण सुखं तनोतीति। तस्य संबोधनं हे गिरिशन्त। अभिचाकशीहि अभिपश्य। सुख—यितुमिति शेषः। चाकशीतिः पश्यतिकर्मा।।२।।

म० हे रुद्र, या ते तवेट्टशी तनूः शरीरं हे गिरिशन्त, तया तन्वा नोऽस्मानभिचाकशीहि अभिपश्य। चाकशीतिः पश्यतिकर्मा (नि० ३।११।८)। कीट्टशी तनूः। शिवा शान्ता मङगलरूपा। यतोऽघोरा अविषमा सौम्या अतएवाऽपापकाशिनी पापमसुखं काशयति प्रकाशयति पापकाशिकनी न पापकाशिनी अपापकाशिनी। या पुण्यफलमेव ददाति न पापफलमित्यर्थः। गिरौ कैलासे स्थितः शं सुखं प्राणिनां तनोति विस्तारयतीति शिरिशन्तः,

गिरि वाचि स्थित: शं तनोतीति वा, गिरौ मेघे स्थितो वृष्टिद्वारेण शं तनोतीति वा, गिरौ शेते गिरिश:। अमति गच्छति जानातीत्यन्त: सर्वज्ञ:। 'अम गतौ भजने शब्दे' कर्तरि क्त:। गिरिशश्चासावन्तश्च् गिरिशन्तस्तत्संबुद्धि:। शकन्ध्वादित्वापररूपम् (पा० ६।१।९४) कीदृश्या तन्ना। शन्तमया सुखतमया।।२।।

यामिषुं गिरिशन्त हस्ते बिभर्ष्यस्तवे। शिवां गिरित्र तां कुरू मा हिंसी: पुरूषं जग-ात्।।३।।

याम्। इषुम्। गिरिशन्तेतिगिरि शन्त। हस्ते। बिभर्षि। अस्तवे।। शिवाम्। गिरित्रेति-तिगिरि त्र। ताम्। कुरू। मा। हिसी्। पुरुषम्। जगत्।।३।।

उ० यामिषुम्। याम् इषुं काण्डम्। हे गिरिशन्त गिरौ पर्वतेऽवस्थित: कैलासाख्ये सुखं तनोतीति गिरिशन्त: तस्य संबोधनं हे गिरिशन्त। हस्ते बिभर्षि घारयसि। अस्तवे असितुं क्षेप्तुमित्यर्थ:। शिवां गिरित्र गिरौ कैलासेऽवस्थित: त्रायते भक्तानिति गिरित्र: तस्य संबोधनं हे गिरित्र। तां कुरु। किंच। माहिंसी: मावधी: पुरुषम् जगत् जङग्मं च गवादि।।३।।

म० हे गिरिशन्त, त्वं यामिषुं बाणं हस्ते बिभर्षि धारयसि। किं कर्तुम्। अस्तवे 'असु क्षेपणे' तुमर्थे तवेप्रत्यय:। असितुं शत्रून् क्षेप्तुमित्यर्थ:। गिरित्र गिरौ कैलासेऽवस्थित: त्रायते इति गिरित्र: तामिषुं शिवां कल्याणकारिणीं कुरु। किंच पुरुषं पुत्रपौत्रादिकं जगत् जङग्ममन्यदपि गवाश्चादिकं मा हिंसी: मा वधी:।।३।।

शिवेन वचसा त्वा गिरिशाऽच्छावदामसि। यथा न: सर्वमिज्जगदयक्ष्म सुमना असत्।।४।।

उ० शिवेन चवसां शिवेन वचनेन त्वा त्वाम्। गिरिश गिरौ पर्वते कैलासाख्ये शेते इति गिरिश: तस्य संबोधनम् हे गिरिश। अच्छावदामसि। 'अच्छाभेराप्तुमिति शाकपूणि:'। 'इदन्तो मसि'। तथा अभिवदाम। यथा येन प्रकारेण न: अस्माकं सर्वम् इत्। इच्छब्द एवार्थे। सर्वमेव जगत् जङग्मादि। अयक्ष्मम्। यक्ष्मा व्याधि:। व्याधिरहितम् सुमनाश्च् शोभनमनस्कं च असत् भूयात्।।४।।

म० गिरौ कैलासे शेते गिरिश: हे गिरिश, शिवेन वचसा मङग्लेन स्तुतिरूपेण

वचनेन त्वा अच्छ त्वां प्राप्तुं वयं वदामसि वदामः प्रार्थयामहे। 'अच्छामेराप्तुमिति शाकपूणिः' (नि० ५।२८) संहितायां 'निपातस्य च' (पा०६। ३। १३६) इति दीर्घः। 'इदन्तो मसि' (पा० ७। १। ४६)। किं वदाम इत्यत आह। नोऽस्माकं सर्वमित् सर्वमेव जगत् जङग्मं नराः पश्वादि यथा येन प्रकारेण अयक्ष्मं नीरोगं सुमनाः शोभनमनस्कं च असत् भवति यथा कुर्तिति शेषः। सुमनःशब्दे पुंस्त्वमर्मां जगद्विशेषणत्वात्। असदित्यत्र 'लेटोऽडाटौ' (पा० ३। ४। ९४) इत्यट् इलोपः।।४।।

अध्यवोचदधिवक्ता प्रथमो दैव्यो भिषक्। अहीश्च् सर्वन् जम्भयन् सर्वाश्च् यातधान्योऽधराचीः परासुवा।।४।।

उ० अध्यवोचत्। अधीत्युपरिभावमैश्वर्ये वा। अधिवदतु ब्रवीतु कंचित्स्वकीयं पुरूषम् भगवान् रुद्रः। अधिवक्ता ऐश्वर्येणैव यो वदितुं जानाति। प्रथतो दैव्यो भिषक् मुख्यो देवसंबन्धी भिषक् वैद्यः। किमधिवदत्वित्यत आह। अहींश्च् सर्वान् जम्भयन्। 'जभिजृभी गात्रविनामे'। सर्वान् सर्वप्रकारान् नाशयन्। सर्वाश्च् यातुधान्यः यातनाः दुःखं कष्टं तत्प्राणिषु धारयन्तीति यातुधान्यः राक्षसीः जीम्भयन्। अधराचीः अधोञचनाः कृत्वा।

परासुव पराक्षिप। यद्वा रुद्र एवोच्यते। अध्यवोचदधिवक्ता अधिवदतु ईश्वरो वक्ता। प्रथमो देवसंबन्धी भिषक् वैद्यः। अहींश्च सर्वान्। जम्भयन् सवोश्च यातुधान्यः अधराचीः कृत्वा परासुव क्षिप।।५।।

म० रुद्रो मामध्यवोचत् अधिवक्तु मां सर्वाधिकं वदतु, तेनोक्ते मम सर्वाधिक्यं भवत्येवेत्यर्थः। कीदृशः। अधिवक्ता अधिकवदनशीलः। प्रथमः सर्वेषां मुख्यः पूज्यत्वात्। दैव्यः देवेभ्यो हितः। भिषक् रोगनाशकः स्मरणेनैव रोगनाशादिभ्षक्त्वम्। एवं परोक्षमुक्त्वा प्रत्यक्षमाह। हे रुद्र, सर्वा यातुधान्यः यातुधानीः राक्षसीः त्वं परासुव पराक्षिप अस्म्भ्यो दूरीकुरु। किं कुर्वन्। सर्वानहीन् सर्पव्याघ्रादीन् जम्भयन् विनाशयन्। कीदृशीर्यातुधान्यः। अधराचीः अधरेऽधोगमनशीलाः। चौ समुच्चये। सर्पनाशराक्षसीक्षेपौ सदैव कुर्वित्यर्थः।।५।।

असौ यस्ताम्रो अरुण उत बभ्रः सुमङगलः। ये चैन रुद्रा अभितो दिक्षु श्रिताः सहस्त्रशोऽवैषा हेड ईमहे।।६।।

उ० असौ यः। आदित्यरूपेणात्र रुद्रः स्तूयते। अभिनयेन दर्शयन्नाह। असौ यस्ताम्रः

ताम्रवर्णः। उदयकाले अस्तमनकाले च। अरुणः अरुणर्वाः रक्तवर्णः। उत बभ्रः अपिच बभ्रुवर्णः कपिलवर्णः। सुमङग्ल शोभनानि मङगलान्यस्येति सुमङग्लः। अवास्य हेड ईमह इत्यनुषङग। ये च एनं भगवन्तमादित्यं रुद्राः रश्मयः। अभितः इतश्चेतश्च्। दिक्षु सर्वासु च। श्रिताः स्थिताः सहस्त्रशः असंख्याताः अग्र एषां हेड ईमहे। अव ईमहे अव-नयामः। एषां संबन्धी हेडः क्रोधः। हेड इति क्रोधनामसु पठितम्। यद्वा रुद्र एवोच्यते। असौ यस्ताम्रवर्णः अरुणवर्णः अपिच बभ्रुवर्णः सुमङगलः। अनेकानि हि रूपाणि रुद्रः करोति कार्यवशात्। समञ्जसमन्यत्।।६।।

म० आदित्यरूपेणात्र रुद्रः स्तूयते। योऽसौ प्रत्यक्षो रुद्रो रविरूपः। च पुनरर्थे। रुद्रा एनमभितोदिक्षु प्राच्यादिषु श्रिताः किरणरूपेण सहस्त्रशोऽसंख्याः एषां हेडः क्रोधमस्मदपराधजं वयमेव ईमहे निवारयामः भक्तया निराकुर्मः। हेड इति क्रोधनाम। 'अभिसर्वतसोः' (पा० २। ३। २) द्वितीया। कीदृशोऽसौ। ताम्रः उदयेऽत्यन्तंरक्तः। अरुणः रक्तोऽस्तकाले। उतापि च बभ्रुः पिङगलवर्णोऽन्यदा। सुमङग्लः शोभनानि मङग्लानि यस्य मङग्लरूपः रव्युदये सर्वमङगलप्रवर्तनात्।।६।।

असौ योऽवसर्पति नीलग्रीवो विलोहितः। उतैनं गोपा अदृश्नन्दृश्नुदहार्यः स दृष्टो मृडयाति नः।।७।।

उ० असौ यः आदित्यः अवसर्पति अर्वाचीनं सर्पति गच्छति अस्तमयकाले। नीलग्रीवः नीलग्रीव इवास्तं गच्छन् लक्ष्यते। विलोहितः धारणाधनु (?) मात्रेणाप्राप्तविलोहितमण्डलाभिप्रायम्। उतैनं गोपा अदृश्रन् अथैनं गोपालाः अभिपश्यन्ति गवां प्रवेशनकालं मन्यमानाः। अदृश्रन्नदहार्यः। दृशेरुडागमश्छान्दसः। पश्यन्ति च उदकहार्यः कुम्भदास्यः। आगोपालाङग्नादिप्रसिद्ध इत्यर्थः। स दृष्टो दृष्टमात्रो मृडयाति। 'मृड सुखने' सुखयति। नः अस्मान्। अत्यन्तं मृदुहृदयतम इत्यभिप्रायः। यद्वा रुद्र एवोच्यते। ऋषिराह। असौ यः अर्वाचीनं सर्पति अभिमुखं गच्छति। नीलग्रीवो नीलकण्ठः विलोहितः विगतकलुषभावः। उतैनं गोपा अदृश्रन्नुदहार्य इति गोपालाङग्नादिप्रसिद्धिं दर्शयति। समञ्जसमन्यत्।।७।।

म० योऽसावादित्यरूपोऽवसर्पति उदयास्तमयौ कुर्वन्निरन्तरं गच्छति। एनं गोपा उत गोपाला अपि वेदोक्तसंस्कारहीनाः अदृश्रन् पश्यन्ति। उदहार्यः उदकं हरन्ति ता उदहार्यः 'मन्थौदन—' (पा० ६। ३।६०) इत्यादिना उदकस्योदादेशः। जलहारिण्यो योषितोऽप्येनमदृश्रन् पश्यन्ति। आगोपालाङग्नादिप्रसिद्ध इत्यर्थः। दृशेर्लुङि 'इरितो वा' (पा० ३। १।५७) इति च्लेरङ् रुगागमश्छान्दसः कीदृशः। नीलग्रीवः विषधारणेन नीला ग्रीवा कण्ठो यस्य अस्तमये नीलकण्ठ इव लक्ष्यः। विलोहितः विशेषेण रक्तः।

स रुद्रो दृष्टः सन्नोऽस्मान्मृडयाति सुखयतु। असौ मण्डलवर्ती रुद्र एव तपतीति ज्ञातः सुखं करोत्वित्यर्थः।।७।।

नमोऽस्तु नीलग्रीवाय सहस्त्राक्षाय मीढुषे। अथो ये अस्य सत्वानोऽहं तेभ्योऽकरं नमः।।८।।

(नम। अस्तु। नीलग्ग्रीवायेतिनील ग्रीवाय। सहस्त्राक्क्पायेतिसहस्त्र अक्क्षाय। मीढुषे।। अथोऽइच्यथो। स्त्रे। अस्य। सत्त्वान। अहम्। तेब्भ्य। अकरम्। नम।।८।।)

उ० नमोऽस्तु नमस्कारोऽस्तु। नीलग्रीवाय नीलकण्ठाय सहस्त्राक्षाय बह्वक्षाय। मीढुषे 'मिह सेचने'। सेक्क्े तरुणाय। अविपरिणामीति स्तूयते। अथो अपिच ये अस्य सत्वानः सत्वभूता रुद्राः अहं तेभ्यः अकरम् अकरवम् करोमि। नमस्कारम्।।८।।

म० नीलग्रीवाय नीलकण्ठाय रुद्राय नमोऽस्तु नमस्कारो भवतु। कीट्टशाय। सहस्त्रमक्षीणि यस्य इन्द्रस्वरूपिणे। मीढुषे मिमेहेति मीढव्न् तस्मै 'मिह सेचने' 'दाश्वान्साह्वान्मीढव्ांश्च्' (पा० ६। १। १२) इति क्कसन्तो निपातः। सेक्क्े वृष्टिकर्त्रे पर्जन्यरूपायेत्यर्थः। तरुणाय वा। अथो अपिच अस्य रुद्रस्य ये सत्वानः प्राणिनो भृत्यास्तेभ्योऽहं नमो नमस्कारमकरं करोमि। 'कृञ् कृतौ' शप् लङि उत्तमैकवचनम्।।८।।

प्रमुञ्च् धन्नवस्त्वमुभयोरात्न्योर्ज्याम्। याश्च् ते हस्त इषवः परा ता भगवो वप।।९।।

(प्र। मुञ्च्। धन्न्वन। त्वम्। उभयो। आत्न्योर्। ज्याम्।। या। च। ते। हस्ते। इषव। परा। ता। भगवऽइतिभग वव्। ववप।।९।।)

उ० प्रमुञ्च् धन्वनः धनुषः त्वमुभ्योः आत्न्योर्धनुरन्तयोः ज्यां गुणम्। याश्च् ते तव हस्ते इषवः। परा ता भगवो वप परावप पराक्षिप ताः हे भगवन् महदैश्वर्ययुक्त।।९।।

म० हे भगवः भगं षड्विधमैश्वर्यमस्यास्तीति भगवान्। 'मतुवसो रुः संबुद्धौ छन्दसि (पा० ८।३।१)

इति रुत्वम्। 'ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः। ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा' इत्युक्तेः। हे भगवन् धन्वनः धनुष उभयोरात्न्योः द्वयोः कोट्योः स्थितां ज्यां मौर्वी त्वं प्रमुञ्च् दूरीकुरु। याश्च् ते तव हस्ते इषवः बाणाः ता इषूः परावप पराक्षिप।।९।।

विज्यं धनुः कपर्दिनो विशल्यो बाणवाँ।।२।। उत। अनेशन्नस्य या इषव आभुरस्य निषङ्ग्धिः।।१०।।

(द्विज्ज्यमितिवि ज्यम्। धनु। कपर्दिन। विव्शल्ल्यऽइतिवि शल्ल्य। बाण-वानितिबाण ववान। उत।। अनेशन्। अस्य। या। इषव। आभु। अस्य। निषङ्ग्धिरि-तिनिषङगधि।।१०।।)

उ० विज्यं धनुः विगतगुणं धनुः। कपर्दोऽस्यास्तीति कपर्दी। कपर्दोऽस्य जटाबन्धः। विशल्यः शल्यरहितः। बाणवान् इषुधिः। उत अपिच। अनेशन् 'णश अदर्शने' नष्टा। अस्य या इषवः आभुः रिक्तः अस्य निषङ्ग्धिः खङग्निक्षेपः। निषज्यत इति निषङग् खङग् उच्यते तद्यस्मिन्धीयते स निषङ्ग्धिः। न्यस्तसर्वशस्त्र इत्यभिप्रायः।।१०।।

म० कपर्दो जटाजूटोऽस्यास्तीति कपर्दी रुद्रस्तस्य धनुः विज्यं मौर्वीरहितमस्तु। विगता ज्या यस्य तत्। उतापि बाणवान् बाणा अस्मिन् सन्तीति बाणवान् इषुधिः विशल्यो विफलोऽस्तु। बाणग्रगतो लोहभागः शल्यम् इषुधिर्निरग्रबाणोऽस्तु। अस्य रुद्रस्य या इषवः ता अनेशन् नश्यन्तु 'णश अदर्शने' नशेरत एत्वम् अङि वेत्येत्वम् पुषादित्वात् च्लेरङ्। अस्य रुद्रस्य निषङ्ग्धिः निषज्यत इति निषङ्ग्ः खङग्ः स धीयतेऽस्मिन्निति निषङ्ग्धिः कोशः स आभुः रिक्तः खङगरहितोऽस्तु। रुद्र अस्मान् प्रति न्यस्तसर्वशस्त्रोऽस्ति-वत्यर्थः।।१०।।

या ते हेतिर्मीढुष्टम हस्ते बभूव ते धनुः। तयास्मान्विश्वतस्त्वमयक्ष्मया परिभुज।।११।।

(या। ते। हेति। मीढुष्ट्टम। मीढुस्तमेतिमीढु तम। हस्ते। बभूव। ते। धनु।। तया। अस्म्मन्। विुश्श्वत। त्वम्। अयक्ष्मया। परि। भुज।।११।।)

उ० या ते या ते तव हेतिरायुधम् हे मीढुष्टम 'मिह सेचने'। सेक्तृतम युवतम। परिणामनिषेधद्वारेण स्तुतिः। अस्मात्सर्वे भवति। हस्ते बभूव भूता। ते इति निरर्थकः। धनुरिति हेतिविशेषणम्। तया हेत्या अस्मान्विश्वतः सर्वतः त्वम् अयक्ष्मया। यक्ष्मा व्याधिः। व्याधिरहितया परिभुज परिपालय।।११।।

म० अतिशयेन मीढवान्मीढुष्टमः 'तसौ मत्वर्थे' (पा० १।४।१९) इति भसंज्ञायां 'वसोः संप्रसारणम्ः (पा० ६।४। १३१) इति संप्रसारणम्। षत्वष्टुत्वे। हे मीढुष्टम

सेक्तृतम वर्षुक, ते तव हस्ते या धनुः हेतिः धनूरूपमायुधं बभूव अस्ति। एकं तेपदं पादपूरणाय। तया धनूरूपया हेत्या विश्वतः सर्वतोश्वतः सर्वतोऽस्मान् परिभुज परिपालय। भुजेर्विकरणव्यत्यये शप्रत्ययः। कीदृश्या तया। अयक्ष्मया नास्ति यक्ष्मा रोगो यस्यास्तया निरुपद्रवया दृढया अनुपद्रवकारिण्या वा।।११।।

परि ते धन्नो हेतिरस्मान्नृणक्तु विश्वतः। अथोय इषुधिस्तवारे अस्मन्निधेहि तम्।।१२।।

(परि। ते। धन्न्वन। हेति। अस्म्मान्। दृणक्क्तु। दृिश्रश्वत।। अथोऽइत्त्यर्थो। य। इषुधिरितीषु धि। तव। आरे अस्म्मत्। नि धेहि। तम्।।१२।।)

उ० परि ते। परिवृणक्तु परिवर्जयतु। ते तव धन्नः धनुषः संबन्धिनी हेतिः आयुधं काण्डलक्षणम् अस्मान् विश्वतः सर्वतः। अथो अपिच। य इषुधिर्बाणवान् तव आरे दूरे अस्मत् अस्मत्तः निधेहि स्थापय तम् इषु धिम्।।१२।।

म० हे रुद्र, ते तव धन्नो हेतिः। धनुःसंबन्धि आयुधं विश्वतः सर्वतोऽस्मान् परिव्-ृणक्तु त्यजतु। मा हन्त्वित्यर्थः। 'वृजी वर्जने' रुधादित्वात् श्रम्। अथो अपिच यस्तव इषुधिस्तमस्मत्सकाशात् आरे दूरे निधेहि अस्मत्तो दूरे स्थापय।।१२।।

अवतत्य धनुष्टव सहस्त्राक्ष शतेषुधे। निशीर्य शल्यानां मुखा शिवो नः सुमना भव।।१३।।

(अवतत्त्येत्त्यव तच्य। धनु । त्वम्। सहस्त्राक्षेतिसहस्त्र अक्क्ष। शतेधऽइतिशत इषुधे।। निशीठर्ऽोतिनि शीठर्ठ। शल्ल्यानाम्। मुखा। शिवः नं। सुमनाऽइतिसु मना। भव।।१३।।)

उ० अवतत्य अवतार्य धनुः त्वम् हे सहस्त्राक्ष शतेषुधे शतशब्दो बहुपर्यायः। निशीर्य शल्यानां मुखा शातयित्वा फलानां मुखानि। शिवः शान्तः नः अस्माकं सुमनाः शोभनमनस्कश्च् भव।।१३।।

म० सहस्त्रमक्षीणि यस्य शतमिषुधयो यस्य हे सहस्त्राक्ष, हे शतेषुधे, त्वं नोऽस्मान् प्रति शिवः शान्तः सुमनाः शोभनचित्तश्च भव। अनुगृहाणेत्यर्थः। किं कृत्वा। धनुरवतल्य अपज्याकं कृत्वा शल्यानां मुखा मुखानि बाणफलाग्राणि निशीर्य शीर्णानि कृत्वा 'श हिं-

सायाम्‘ ‘समासेऽनञ्पूर्वे क्त्वो ल्यप्‘ ‘ऋत इद्धातो:‘ (पा० ७।१।१००) इति।।१३।।

नमस्त आयुधायानातताय धृष्णवे। उभाभ्यामुत ते नमो बाहुभ्यां तव धन्वने।।१४।।

(नम। ते। आयुधाय। अनातताय। धृष्णवे।। उभाब्भ्याम्। उत। ते। नम:। बाहुब्भ्यामितिबाहुभ्याम्। तव। धन्न्वने।।१४।।)

उ० नमस्ते नमोऽस्तु ते तव आयुधाय अनातताय अवतारिताय। धृष्णवे धर्षण-शीलाय प्रगल्भाय। उभाभ्याम् उत अपिच। ते तव नमोऽस्तु। बाहुभ्यां तव धन्वने। धनुष नम इत्यनुवर्तते।।१४।।

म० हे रुद्र, ते तवायुधाय नमोऽस्तु बाणाय नतिरस्तु। कीटटशाय। अनातताय धनुष्यनारोपिताय। धृष्णवे धर्षणशीलाय। धृषे: क्नुप्रत्यय:। रिपून् हन्तुं प्रगल्भाय। उतापि च ते तवोभाभ्यां बाहुभ्यां नम: तव धन्वने धनुषेऽपि नमोऽस्तु। तस्यापि विशेषणम् अनातताय अवतारितमौर्वीकाय।।१४।।

मा नो महान्तमुत मा नो अर्भकं मा न उक्षन्तमुत मा न उक्षितम्। मा नो वधी: पितरं मोत मातरं मा न: प्रियास्तन्वो रुद्र रीरिष:।।१५।।

(मा। नं। महान्तम्। उत। अर्ब्भकम्। उक्क्षन्तम्।। वव्धी। पितरम्। मातरम्। प्रिया। तन्न्व। रुदद्र। रीरिषं। रिरिषऽइतिरिरिष।।१५।।)

उ० मा न: सावधी: न: अस्माकं महान्तं वृद्धं वय:—प्रभृतिभि:। उत मा नो अर्भकम् अपि च मावधी: न: अस्माकमर्भकमल्पम्। मा न उक्षन्तम् मावधी: न: अस्माकमुक्षन्तम्। ‘उक्ष सेचने‘। सिञ्चन्तं तरुणमिति यावत्। उत मा न उक्षितम्। अपिच मावधी: न: अस्माकमुक्षितं सिक्तं गर्भस्थमित्यर्थ:। मा नो वधी: पितरम् मावधी: न: अस्माकं पितरम्। आदरार्थं पुनर्वचनम्। महान्तमिति सिद्धत्वात्। मोत मातरम् मावधी: अपि च मातरम्। मा न: प्रियास्तन्व: रुद्र रीरिष:। रिषतिर्हिंसार्थ:। मारीरिष: माहिंसी:। न: अस्माकं प्रियास्तन्व: प्रियाणि शरीराणि पुत्रपौत्रलक्षणानि। हे रुद्र।।१५।।

म० हे रुद्र, नोऽस्माकं महान्तं वृद्धं गुरुपितृव्यादिकं मा वधी: मा हिंसी:। उतापि नोऽस्माकमर्भकं बालं मा वधी:। नोऽस्माकमुक्षन्तं सिञ्चन्तं तरुणं मा वधी:। उतापि नोऽस्माकमुक्षितं सिक्तं गर्भस्थं च मा वधी:। उतापि नो मातरं जननीं मा वधी:। महान्-

तमित्यनेन सिद्धयोर्मातापित्रोः पुनरादानमादरार्थम्। नोऽस्माकं प्रिया वल्ल्भाः तन्नः तनूः शरीराणि पुत्रपौत्ररूपाणि मा रीरिषुः सा हिंसीः। रिषतिहिर्ंसाकर्मा।।१५।।

मा नस्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः। मा नो वीरान् रुद्र भामिनो वधीर्हविष्मन्तः सदमित्त्वा हवामहे।।१६।।

(तोके। तनये। आयुषि। गोषु। अश्शेषु। रीरिष। रिरिषऽइतिंरिरिष।। ववीरान्। रुद्द्र। भामिन। ववधी। हविष्मन्त। सदम्। इत्। त्वा। हवामहे।।१६।।)

उ० मा नः। मा रीरिषः। रिषतिर्हिंसाकर्मा। मा हिंसीः नः अस्माकम्। तोके पुत्रविषये। मा हिंसीः तनये पौत्रविषये। मा हिंसीः नः अस्माकम् आयुषि विषयभूते। मा नो गोषु मा हिंसीः नः अस्मां गोषु विषयभूतासु। मा नो अश्वेषु मा हिंसीः नः अस्माकमश्वेषु विषयभूतेषु। यद्वा विभक्तिव्यत्ययेन व्याख्यानम्। मारीरिषः अस्माकं तोकं तनयमायुर्गा अश्वानिति। मा नो वीरान् रुद्रभामिनो वधीः मावधीः नः अस्माकं वीरान् हे रुद्र, भामिनः। 'भाम क्रोधेः। क्रोधसंयुक्तान्। कः प्रत्युपकार इति चेत्। हविष्मन्तः हविषा संयुक्ताः सदं सदाकालम्। इच्छब्द एवार्थे। त्वामेवाह्वयामहे आह्वयामो यागार्थम्। अनन्यशरणा वयमित्यभिप्रायः।।१६।।

म० हे रुद्र, नोऽस्माकं तोके पुत्रे तनये पौत्रे मा रीरिषः मा हिंसीः। नः आयुषि जीवने मा हिंसीः। नो गोषु धेनुषु मा रीरिषः। नोऽश्वेषु तुरगेषु। मा रीरिषः। विभक्तिव्यत्ययो वा। तोकं तनयमायुर्गा अश्वान्मा हिंसीः। 'भम क्रोधे'। भामिनः क्रोधयुतानपि नोऽस्माकं वीरान् भृत्यान्मा वधीः। क उपकार इति चेत्। हविष्मन्तः हविर्युक्ताः सदमित् सदैव त्वां वयं हवामहे यागायाह्वयामः। त्वदेकशरणा वयमिति भावः।।१६।।

नमो हिरण्यबाहवे सेनान्ये दिशां च पतये नमो नमो वृक्षेभ्यो हरिकेशेभ्यः पशूनां पतये नमो नमः शष्पिञ्जराय त्विषीमते पथीनां पतये नमो नमो हरिकेशायोपवीतिने पुष्टानां पतये नमः।।१७।।

(हिरण्यबाहऽइतिहिरण्य वाहवे। सेनान्र्युऽइतिसेना न्ये। दिशाम्। च। पतये। ववृक्क्षेब्भ्य। हरिकेशेब्भ्यइतिहरिं केशेब्भ्य। पशूनाम्। शष्पिञ्जराय। त्विषीमते। षिमतऽइतित्त्विषिं मते। पथीनाम्। हरिकेशायेतिहरिं केशाय। उपवीतिनऽइच्युप ववीतिने। पुष्टट्।नाम्।।१७।।)

उ० नमो हिरण्यबाहवे। इतउत्तरं यजूंषि द्रापे अन्धसस्पते इति यावत्। द्वयोर्द्वयो रुद्रयोश्च् स्तूतिः। तिस्त्रोशीतयो रुद्राणां कण्डिकायां कण्डिकायाभष्टावष्टौ रुद्राः तेषां चोभयतोनमस्कारा: अन्ये अन्यतरतोनमस्कारा अन्ये रुद्रास्ते घोरतरा अशान्ततरा: यत उभयतोनमस्करा इति। नमोस्तु हिरण्यालंकारभूषितबाहवे। सेनान्ये च सेना नयतीति सेनानी:। दिशां च पतये नम:। नमो वृक्षेभ्यो हरिकेशेभ्य: वृक्षरूपेभ्यो रुद्रेभ्यो नमस्कार इति। हरितानि पर्णानि केशा इव येषां लक्ष्यन्ते। पशूनां पतये नम:। नम: शष्पिञजराय नवप्ररूढानि तृणानि शष्पं तद्वर्णाय। त्विषीमते। त्विषिर्दीप्ति:। पथीनां पतये नम:। पथाभिति प्राप्ते छान्दसम्। नमो हरिकेशाय लोहितकेशाय। उपवीतिने यज्ञोपवीतिने पुष्टानां समृद्धानां पतये नम:।।१७।।

म० 'नमो हिरण्यबाहव इत्युत्तरं द्रापे इति' (क० ४७) ऋक्पर्यन्त। सर्वाणि यजूंषि। तत्र नमो हिरण्यबाहव इत्यादीनां धनुष्कृद्भ्यश्च् वो नम इत्यन्तानां (क० ४६) चत्वारिंशद-धिकद्विशतसंख्याकानां यजुषां तावन्तो रुद्रा देवता: नमो व: किरिकेभ्य इत्यादिचतुर्णां (क० ४६) अग्निवायुसूर्या देवता: रुद्राणां प्रधानभूता:। छन्दांसि तु चतुरक्षरं दैवी बृहती पञचाक्षरं दैवी पङिक्त: षडक्षरं यजुर्गायत्री सप्ताक्षरं यजुरुष्णिक् अष्टाक्षरं यजुरनुष्टुप् नवाक्षरं यजुर्बृहती दशाक्षरं यजु:पङिक्त: एकादशाक्षरं यजुस्त्रिष्टुप् द्वादशाक्षरं यजुर्जगती चतुर्दशाक्षरं सामोष्णिगेकमेव किरिकेभ्य इति। एतान्येवात्र छन्दांसि। तद्रुद्रमध्ये केचनोभ्-ायतोनमस्काश:। पदद्वयात्पूर्वमेव पदोच्चारणात्पश्चाच्च नम:पदं येषां ते उभयतोनमस्कारा: हिरण्यबाहवे इत्यादि श्वपतिभ्यश्च वो इत्यन्ता:। (क० २८) ततोऽन्यतरतोनमस्कारा: अन्यतरत आदावेव यजुर्द्वयस्य नमस्कारो येषां ते नमो भवायेत्यादि (क० २८) प्रखिदते चेत्यन्ता: (क० ४६)। इषुमद्भ इत्यादि (क० २२) श्वपतिभ्यश्च इत्यन्ता: (क० २८) प्रत्यक्षा: व इति युष्मच्छब्दयोगात्। इषुकृभ्द्य इति। (क० ४६) उभयतोनमस्कारा: सभाभ्य इति (क० २४) जातसंज्ञा रुद्रा:। उभयतोनमस्कारा: शान्ततमा: अन्यतरतो-नमस्कारा घोरतरा:। तेषां मन्त्राणामर्थ उच्यते। एकैकस्यां कण्डिकायामष्टावष्टौ रुद्रा:। हिरण्यमाभररूपं बाहुर्यस्य स हिरण्यबाहु:। स च सेनां नयतीति सेनानी: तस्मै रुद्राय नम:। दिशां पतये पालकाय रुद्राय नम:। हरयो हरितवर्णा: केशा: पर्णरूपा येषां ते हरिकेशास्तेभ्यो वृक्षेभ्यो वृक्षरूपरुद्रेभ्यो नम:। पशूनां जीवनां पतये पालकाय रुद्राय नम:। शष्पिञजराय पीतरक्तवर्णाय टिलोपश्छान्दस:। त्विषिर्दीप्तिरस्यास्तीति त्विषिमान्। संहितायां त्विषिशब्दस्य दीर्घ:। ईट्टशाय रुद्राय नम:। पथीनां मार्गाणां पालकाय नम:। पथिशब्दो मार्गवाची। उत्तरदक्षिणतृतीयामार्गा: श्रुतावुक्ता:। हरिकेशाय नीलवर्णकेशाय जरारहितायोपवीदिने मङग्लार्थयज्ञोपवीतधरिणे रुद्राय नम:। पुष्टानां गुणपूर्णानां नराणां पतये स्वामिने नम:।।१७।।

नमो बभ्लुशाय व्याधिनेऽन्नानां पतये नमो नमो भवस्य हेत्यै जगतां पतये नमो नमो रुद्रा याततायिने क्षेत्राणां पतये नमो नमः सूतायाहन्त्यै वनानां पतये नमः।।१८।।

(बभ्लुशाय। ष्याधिने। अन्नानाम्। भवस्य। हेत्यै। जगताम्। रुद्वाय। आततायिनऽ-इत्यातत अयिने। क्षेत्राणाम्। सूताय। अहन्त्यै। ववनानाम्।।१८।।)

उ० नमो बभ्लुशाय बभ्रुवर्णाय। बभ्रुः कपिलः। व्याधिने विध्यतीति व्याधी। अन्नानां पतये नमः। नमो भवस्य हेत्यै। भवः संसारः। हेतिरायुधम्। संसारस्य छेन्त्रे। जगतां पतये नमः जगतां जङगमानाम्। नमो रुद्राय आततायिने। आततेन धनुषा एतीत्याततायी उद्यतायुधाय। क्षेत्राणां पतये नमः। नमः सूताय सूताऽश्वसारथिः। अहन्त्यै अहन्त्रे। नहि सूतः कंचिदपि हन्ति। वनानां पतये नमः।।१८।।

म० बभ्लुशः कपिलवर्णः। यद्वा बिभर्ति रुद्रमिति बभ्जुर्वृषभस्तस्मिन् शेते स बभ्लुशः। विध्यति शत्रूनिति व्याधी तस्मै रुद्राय नमः। अन्नानां पालकाय नमः। भवस्य संसारस्य हेत्यै आयुधाय संसारनिवर्तकाय रुद्राय नमः। जगतां पालकाय रुद्राय नमः। आततेन विस्तृतेन धनुषा सह एति गच्छतीति आततायी उद्यतायुधस्तस्मै रुद्राय नमः। क्षेत्राणां देहानां पालकाय नमः। न हन्तीत्यहन्तिस्तस्मै अहन्त्रे सूताय सारथये तद्रूपाय रुद्राय नमः। सारथिर्न हन्ति वनानां पालकाय नमः।।१८।।

नमो रोहिताय स्थपतये वृक्षाणां पतये नमो नमो भुवन्तये वारिवस्कृतायौषधीनां पतये नमो नमो मन्त्रिणे वाणिजाय कक्षाणां पतये नमो नम उच्चैर्घोषायाक्रन्दयते पत्तीनां पतये नमः।।१९।।

(रोहिताय। स्थपतये। वृक्क्षाणाम्। भुवन्तये। ववारिवस्कृताय। ववारिवकृतायो-तिवारिव कृताय। ओषधीनाम्। मन्त्रिणे। वाणिजाय। कक्क्षाणाम्। उच्चैर्ग्घोषायेत्त्युच्चै घोषाय। आक्क्रन्दयतऽइत्त्या क्रन्दयते। पत्तीनाम्।।१९।।)

उ० नमो रोहिताय। वर्णतो निर्देशः। स्थपतये स्थपतिर्गृहादीनां चेता। चयनं करोति विश्वकर्मरुपेण। वृक्षाणां पतये नमः। नमो भुवन्तये भुवं पृथिवीं तनोति विस्तारयतीति भुवन्तिः। वारिवस्कृताय वरिवो धनम् तत्कृतं येन सा वारिकवस्कृतः। दीर्घत्वं छान्दसम्। ओषधीनां पतये नमः। नमो मन्त्रिणे। प्रसिद्ध एव मन्त्री। वाणिजः वणिगेव वाणिजः।

कक्षाणां पतये नमः। नदीकक्षः पर्वतकक्षो वा। नम उच्चैर्घोषाय महाशब्दाय। आक्रन्दयते आक्रन्दः प्रसिद्धः। पत्तीनां पतये नमः। हस्त्यश्वरथपदातिसंख्यापत्तिः।।१९।।

म० रोहितो लोहितवर्णः स्थपतिर्गृहादिकर्ता विश्वकर्मरूपेण तस्मै नमः। वृक्षाणां पालकाय नमः। भुवं तनोतीति भुवन्ति—भूमण्डलविस्तारकः। वरिवो धनं करोतीति वरिवस्कृत् स एव वारिवस्कृतः स्वार्थेऽण्। स्थानभोग्यकराय नमः। ओषधीनां ग्राम्यारण्यानां पालकाय नमः। आलोचनकुशलो मन्त्री। वणिगेव वाणिजः व्यापारकर्ता तद्रूपाय नमः। वनगता गुल्मबीरुधादयः कक्षास्तेषां पालकाय नमः। उच्चैर्घोषो ध्वनिर्यस्य स उच्चैर्घोषः। आक्रन्दयति रोदयतीत्याक्रन्दयन् युद्धे महाशब्दाय रिपुरोदकाय नमः। पत्तीनां सेनाविशेषाणां पदातीनां वा पालकाय नमः। 'एको रथो गजश्चाश्वास्त्रयः पञ्च पदातयः। एष सेनाविशेषोऽयं पत्तिरित्यभिधीयते' इति व्यासोक्तेः (भार०१। २८९)।।१९।।

नमः कृत्स्नायतया धावते सत्वनां पतये नमो नमः सहमानाय निव्याधिन आव्याधिनीनां पतये नमो नमो निषङ्गिणे ककुभाय स्तेनानां पतये नमो नमो निचेरवे परिचरायारण्यानां पतये नमः।।२०।।

(कृत्स्नातयेर्तिकृत्स्न आयतया। धावते। सत्त्वनाम्। सहमानाय। निष्व्याधिनऽइतिनि ष्व्याधिने। आष्व्याधिनीनामित्त्या ष्व्याधिनीनाम्। निषङ्गिणे। ककुभाय। स्तेनानाम्। निचेरवऽइतिनि चेरवे। परिचरायेतिपरि चराय। अरण्ण्यानाम्।।२०।।)

उ० नमः कृत्स्नायतया। कृत्स्नायततायेति प्राप्ते तकारलोपश्छान्दसः। कृत्स्नं चासावायतं च कृत्स्नायतः पूरितधनुः तस्य भावः कृत्स्नायतया तया हेतुभूतया धावते। आकर्णपूरितधनुषेत्यर्थः। सत्वनां सत्वानां पतये नमः। नमः सहमानाय अभिभवनशीलाय निव्याधिने नितरां विध्यतीति निव्याधी। आव्याधिनीनां पतये नमः आविध्यन्ति याः ककुभाय ककुभ इति महन्नामसु पठितम्। स्तेनानां पतये नमः स्तेनश्चौरः। नमो निचेरवे नितरां चेरतीति निचेरुः। परिचराय सर्वतोगत्रे। अरण्यानां पतये नमः।।२०।।

म० कृत्स्नं समग्रमायतं विस्तृतम् अर्थाद्धनुः यस्य स कृत्स्नायतस्तस्य भावः कृत्स्नायतता तया आकर्णपूर्णधनुष्टेन धावते युद्धे शीघ्रं गच्छते रुद्राय नमः। शीघ्रगतौ सरतेर्धावादेशः तलोपश्छान्दसः। यद्वा कृत्स्नं। सर्व आयो लाभो यस्य स कृत्स्नायस्तस्य भावः कृत्स्नायतता तया धावते सर्वलाभप्रापकत्वेन धावते। यत्र गच्छति तत्र सर्वेष्टं लाभं प्राप्तोतीत्यर्थः। सत्वन्शब्दः प्राणिवाची। सत्वानः सात्विकाः शरणागताः प्राणिनस्तेषां पालकाय नमः। सहतेऽरीनभिभवतीति सहमानः। नितरां विध्यति हन्ति शत्रुनिति नि-

व्याधी तस्मै नमः। आ समन्ताद्विध्यन्तीत्याव्याधिन्यः शूरसेनास्तासां पालकाय नमः। निषङग्ः खङग्ः सोऽस्यास्तीति निषङगी ककुभो महान् तस्मै रुद्राय नमः। ककुभ इति महान्नामसु पठितम्। स्तेना गुप्तचोरास्तेषां पालकाय नमः। अपहारबुध्या निरन्तरं चरतीति निचेरुः। परित आपर्णवाटिकादौ हरणेच्छया चरतीति परिचरः तस्मै नमः। अरण्यानां वनानां पतये नमः। रुद्रो लीलया चोरादिरूपं धत्ते। यद्वा रुद्रस्य जगदात्मकत्वाञचोरादयो रुद्रा एव ध्येयाः। यद्वा स्तेनादिशरीरे जीवेश्वररूपेण रुद्रो द्विधा तिष्ठति तत्र जीवरूपं स्तेनादिशब्दवाच्यं तदीश्वररुद्ररूपं लक्षयति यथा शाखाग्रं चन्द्रस्य लक्षकम्। किं बहुना लक्ष्यार्थविवक्षया मन्त्रेषु लौकिकाः शब्दाः प्रयुक्ताः।।१०।।

नमो वञचते परिवञचते स्तायूनां पतये नमो नमो निषङ्गिण इषुधिमते तस्कराणां पतये नमो नमः सृकायिभ्यो जिघासभ्द्यो मुष्णतां पतये नमो नमोऽसिमभ्द्योनक्तंचरभ्द्यो विकृन्तानां पतये नमः।।२१।।

आ ब्रह्मन्ब्राह्मणो ब्रह्मवर्चसी जायतामा राष्ट्रे राजन्युः शूर्र इषव्योऽतिव्याधी महारथो जायतां दोग्ध्री धेनुर्वोढानडानाशुः सप्तिः पुरन्धिर्योषा जिष्णू रथेष्ठाः सभेयो युवास्य यजमानस्य वीरो जायतां निकामे निकामे नः पर्जन्यो वर्षतु फलवत्यो न ओषधयः पच्यन्तां योगक्षेमो नः कल्पताम्।।२२।।

(आ। ब्रह्मन्। ब्राह्मण। ब्रह्मवर्च्चसीतिब्ब्रह्म वर्च्चसी। जायताम्। आ राष्ट्रे। राजन्न्य शूर। इषष्टय । अतिव्याधीत्त्यति व्याधी। महारथऽइतिमहा रथ। जायताम्। दोग्गधी। धेनु। वोढा। अनडवान्। आशु। सप्ति। पुरन्धिरितिपुरम् धिं। योषा। जिष्णु। रथेष्ट्ट। रथेस्त्थाऽहतिरथे स्था। सभेय । युवा। आ। अस्य। यजमानस्य। वीर। जायताम्। निकामेनिकाऽइतिनिकामे निकामे। नं। पर्ज्जन्न्य। वर्षतु। फलवत्त्यऽइतिफल वत्त्य। नं। ओषधयं। पच्चयन्ताम्। योगक्क्षेऽहतियोग क्षेम। न। कल्प्पताम्।।२२।।)

उ० जपति। आब्रह्मन् आ जायतां हे ब्रह्मन्, ब्राह्मणः ब्रह्मवर्चसी। यज्ञाध्ययनशीलो ब्राह्मण आजायतामित्यर्थः। राष्ट्रे। आजयतां च राष्ट्रक राजन्यः शूरः इषव्यः इषुभिः विध्यति इषव्यः इषुषु वा साधुः इषव्यः। अतिव्याधी महारथः। अतिविध्यति द्विषन्तामित्यतिव्याधी। महारथश्च दोग्ध्री धेनुः राष्ट्रे आजायतामिति सर्वत्र संबन्धः। वोढा अनडावान् आशुः शीघ्रः सप्तिरश्वः। पुरन्धिर्योषा। पुरं शरीरं रूपादिगुणसमन्वितं धारयतीति पुरन्धिः। जिष्णू रथेष्ठाः। जयनशीलः रथे तिष्ठतीति रथेष्ठाः युयुत्सुः सभेयो युवा। सभामर्हति

विद्यागुणचरित्रैः सभेयः युवा आ अस्य यजमानस्य आजयतां चास्य यजमानस्य धीरः पुत्रः। किंच निकामे निकामे नः पर्जन्यो वर्षतु प्रार्थनायामवश्यं भवतीति निकामः। अभ्यासो वीप्सार्थः। अस्माकं राष्ट्रफलवत्य अतिशयेन फलयुक्ताः नोऽसमाकं राष्ट्रे ओषधयः पच्यन्ताम्। योगक्षेमो नः कल्पताम्। योगो द्रव्यादीनां संयोगः क्षेमस्तेषामेव परिपालनम्। योगश्चास्माकं कलृप्तो भवतु। योगश्च क्षेमश्चेति द्वन्द्वः। तत्र नपुंसकलिङगता वा स्यात् द्विर्वचनं वा इति। तत्र छान्दसो विसर्जनीयो द्रष्टव्यः।।२२।।

म० 'कृष्णाजिनाद्या समिदाधानात् कृत्वा ब्रह्मन्निति जपत्युत्सर्गकाल एके' (का० २०।४।११)। कृष्णाजिनदीक्षात आरभ्योखायां त्रयोदशसमिदाधानान्तं कृत्वाध्वर्युरेव ब्रह्मन्निति जपति उत्सर्गैरुपतिष्ठत इत्युत्सर्गोपस्थानकाले एके आ ब्रह्मन्निति जपमिच्छन्ति। यद्वाश्वस्योत्सर्गकाले विभूर्मात्रेति जपानन्तरमित्थ्यर्थः। लिङगोक्तदेवता उत्कृतिः। हे ब्रह्मन्, राष्ट्रेऽस्मद्देशे ब्रह्मवर्चसी यज्ञाध्ययनशीलो ब्राह्मणः आजायतामुत्पद्यताम्। राजन्यः क्षत्रियश्चेदृश आजायताम्। कीदृशः। शूरः पराक्रमी। 'शूर विक्रान्तौ' शूरयति शूरः इषव्यः इषुभिर्विध्यतीति इषव्यः। यद्वा इषौ कुशलः इषव्यः। अतिव्याधी अत्यन्तं विध्यतीत्यतिव्याधी शत्रुभेदनशीलः। महारथः एकः सहस्त्रं यजति स महारथः। दोग्ध्री दुग्धपूरयित्री धेनुः आजायतां राष्ट्रे इति सर्वत्र संबन्धः। अनडवान् वृषभो वोढा वहनशीलो जायताम्। सप्तिरश्व आशुः शीघ्रङगामी जायताम्। योषा स्त्री पुरन्ध्रिः पुरं शरीरं सर्वगुणसंपन्नं दधाति पुरन्ध्रिः। रथे तिष्ठतीति रथेष्टाः क्विप् सप्तम्या अलुक्। रथे स्थितो युयुतसुर्नरो जिष्णुः जयनशीलो जायताम्। युवा आ अस्येति पदच्छेदः। अस्य यजमानस्य युवा समर्थः सभेयः सभायां योग्यो वीरः पुत्रो जायताम्। सभायां साधुः सभेयः 'ढच्छन्दसि' (पा० ४।४।१०६) इति सभाशब्दात्तत्र साधुरित्यर्थे ढप्रत्ययः। तस्य ण्यादेशः। किं च नोऽस्माकं राष्ट्रे पर्जन्यो निकामे निकामे नितरां कामनायां सत्यां वर्षतु। अभ्यासो वीप्सार्थः। नोऽस्माकमोषधयः यवाद्याः फलवत्यः फलयुक्ताः पच्यन्तां स्वयमेव पक्का भवन्तु। नोऽस्माकं योगक्षेमः कल्पतां योगेन युक्तः क्षेप्तो योगक्षेमः स क्लृप्तो भवतु। अलब्धलाभो योगः। लब्धस्य परिपालनं क्षेमः।।२२।।

प्राणाय स्वाहापानाय स्वाहा व्यानाय स्वाहा चक्षुषे स्वाहा श्रोत्राय स्वाहा वाचे स्वाहा मनसे स्वाहा।।२३।।

(चक्क्षुषे। श्रोत्राय। ववाचे। मनसे।।२३।।)

प्राण—अपान—व्यान—चक्षु—श्रोत्र—वाक्—मन के लिए यह आहुति है।।२३।।

उ० 'आज्यसक्तुधानालाजानामेकैकं जुहोति प्राणाय स्वाहेति प्रतिमन्त्रं सर्वरात्रमावर्तम्।।२३।।

म० 'आज्यसक्तुधानालाजानामेकैकं जुहोति प्राणाय स्वाहेति प्रतिमन्त्र सर्वरात्रमावर्तम् (का० २०।४।३९)। आज्यादीनां प्रतिप्रहरमेकैकं कमेण सर्वरात्रमुत्तरवेदिस्थाग्रनौ जुहोति प्राणाय स्वाहेत्यादिद्वादशकण्डिकात्मकैरनुवाकै:। किं कृत्वा। आवर्तम् प्राणाय स्वाहेत्यादिकमेकशताय स्वाहेत्यन्तं मन्त्रगणमावर्त्यावर्त्य सर्वरात्रमिति द्वितीयाग्रहणाद्धोमक्रियाया रात्रे: कात्स्न्येन संयाग: कार्य:। तत: प्रथमयामे घृतेन याग: द्वितीये सक्तुभि: तृतीये धानाभि: चतुर्थे लाजै:। एकस्मै इति द्वादशेऽनुवाके (३४) एकस्मै स्वाहा द्वाभ्या स्वाहेत्यत्र त्रिभ्य: स्वाहा चतुर्भ्य: स्वाहा पञ्चभ्य: स्वाहा षड्भ्य: स्वाहा सप्तभ्य: स्वाहा अष्टभ्य: स्वाहा नवभ्य: स्वाहेत्येवमादयो मन्त्रा अपठिता अपि ककैकोच्चयेन शतपर्यन्ता: प्रयोज्या:। 'एकोत्तरा जुहोति:।(१३।२।१।५) इति श्रुते:। व्युष्टायां समाप्तायां रात्रौ व्युष्ट्यै स्वाहेति घुताहुतिमेकामुदिते सूर्ये स्वर्गाय स्वाहेति च जुहोतीति सूत्रार्थ:। लिङ्गोक्तदेवतानि यजूंषि। प्राणादय इन्द्रियदेवा:।।२३।।

पाठसार:

विशेषत: शैवधर्मस्य प्रचार: अस्मिन् अध्याये विद्यते। तस्य वैशिष्ट्यं स्वरूपश्चापि प्रायश: विस्तरेण अत्र वर्णित:। स: रुद्र: भयङ्कर: आसीत्। जन्मसमये स्वयमेव भीषणं क्रन्दति अपि च तत् शब्देन अखिलभूनं य: कम्पयति स: रुद्र:। ऋग्यजुर्वेदभदात् तस्य रुद्रस्य वर्णना अपि पृथक् भवति। वैदिकदेवताया: बाह्यप्रतीकं प्रत्येकम् एकम् एकं प्रकृतिकघटना। तस्मात् रुद्रदेवस्य प्रतीकं वज्र इति। रुद्रदेव: सर्वदा न भयङ्कर:। तस्य रुद्रण सहितं तस्य कल्याणमयरूपमपि अस्ति। यथा स: वैद्यराजा। स: वैद्यरूपेण सर्वान् अरोग्यं ददाति। शिव:, शङ्कर:, मयस्कर:, शम्भु:, मयोभव: चेति तस्य कल्याणवाचकशब्दा: इति। स: न केवलम् आर्यानार्याणां मनुष्याणामपि तु समस्तप्राणीनाम् उपास्य: पालकश्चेति। सूर्यास्तचलसमये आकाशं रञ्जितं भवति। तदा सूर्यविम्बस्य मध्यभागे एका विशिष्टा नीलवर्णरेखा प्रतीयते। साधारणत: शरीरस्य मध्यमभागसदृश: कण्ठ:। सूर्यस्यापि मध्यभागस्य कण्ठस्य नीलवर्णत्वेन प्रतीयमानत्वात् सूर्यस्य नाम नीलकण्ठ:। सूर्येण साकं रुद्रस्य अभेदप्रतिपादनत्वात् रुद्रस्यापि नाम नीलकण्ठ:। अधुना आदित्यरूपेण रुद्र: स्तूयते। योऽसौ रुद्र: ताम्रवर्ण: अरुणवर्ण: पिङ्गलवर्ण: सुमङ्गलश्च तथा येऽस्य असंख्या अंशव: तेषां क्रोधं वयं भक्त्या निवारयाम:। आदित्यरुपो रुद्र: सर्वदैव दर्शनीय:। सूर्यास्तचलसमये सूर्यदेवस्य रुद्रदेवस्य वा लीललायां महितं भूत्वा गोपालका: ग्राम्यरमण्य: च रुद्रदेवस्य लीलां पश्यन्ति इति। नीलग्रीवाय सहस्राक्षाय

वर्षकाय रुद्राय तथा तस्य गणेभ्यश्च वयं पणताः। हे भगवन् रुद्रदेव स्वकीयं धनुः ज्यामुक्तं कुरु, स्वहस्तधृतान् वाणान् च पराक्षिय। रुद्रस्य धनुः बाणाः खड्गश्च विफलीभवतु। सः अस्मान् प्रति न्यस्तसर्वशस्त्रः अस्तु। आयुधधारणनिमित्तं रुद्रस्य रौद्र रूपम् अतिभयानम्। अत एव अस्मान् प्रति यथा सः शान्तः शोभनमनस्कश्च भवेत् तदर्थं प्रार्थना विधीयते। हे रुद्रदेव बालं तरुणं गर्भस्थ शिशुम्, अस्माकं गुरुपितृव्यादिकं, पितरं मातरं स्वजनान् च न विनश्येः। सर्वान् प्रति त्वं सदैव अनुग्रहशीलो भव इति पुनः पुनः प्राथ्र्यते इति शम्।

१.० सर्वमेधमन्त्रा

(सर्वे। निमेषाऽइतिनि मेषा। जज्ञिरे। विवद्द्युतइतिवि द्युत। पुरुषात्। अधि।। न। एनम्। ऊर्द्धम्। न। तिठर्ठाञचम्। न। मद्ध्ये। परि। जग्रभत्।।२।।)

उ० सर्वे निमेषाः। सर्वे निमेषत्रुटिकाष्ठादयः कालविशेषाः जज्ञिरे जाताः विद्युतः विद्युत्पर्जन्यस्तनयिन्तवः। पुरुषादधि सकाशात्। नच एनं पुरुषं सर्वस्यापि जनकं सन्तं ऊर्ध्वं नच तिर्यञ्चं नच मध्ये परिजग्रभत् न परिगृह्याति कश्चिदपि। नह्यसौ प्रत्यक्षादीनां विषयः। आगमो हि तत्र प्रवर्तते। तदुक्तम् 'एष नेतिनेत्यात्मना अगृह्यो नहि गृह्यते' इत्यादि।।२।।

म० सर्वे निमेषाः त्रुटिकाष्ठाघट्यादयः कालविशेषाः पुरुषात् अधि पुरुषसकाशाज्- जज्ञिरे। कीदृशात्पुरुषात्। विद्युतः विशेषेण द्योतते विद्युत् तस्मात्। किंच कश्चिदपि एनं पुरुषमूर्ध्वमुपरिभागे न परिजग्रभत्परिगृह्णाति। न ह्यसौ प्रत्यक्षादीनां विषय इत्यर्थः। 'स एष नेति नेत्यात्माऽगृह्यो न हि गृह्यते' इति श्रुतेः। जग्रभत्। ग्रहेः शतरि जुहोत्यादित्वेन रूपम्।।२।।

न तस्य प्रतिमा अस्ति यस्य नाम महद्यशः। हिरण्यगर्भ इत्येष मा मा हिसीदित्येषा यस्मान्न जात इत्येषाः।।३।।

उ० न तस्य गायत्री द्विपदा। न तस्य पुरुषस्य प्रतिमा प्रतिमानभूतं किंचिद्विद्यते। यतो यस्य नाम महद्यश इत्येष चतुर्ऋचोऽनुवाकोदुरविप्रकर्षेण हिरण्यगर्भं प्रमिमाभ- तमाह। मामाहिसी दित्येषा च ऋक् यस्मान्न जात इत्येषा च द्विकण्डिकोऽनुवाकः षोडशिदैवत्योऽदूरविप्रकर्षेणाभिवदति। आसां च कण्डिकानां ब्रह्मयज्ञेऽध्ययनं कर्तव्यं प्रतीकग्रहणत्वात्।।३।।

म० द्विपदा गायत्री। तस्य पुरुषस्य प्रतिमा प्रतिमानमुपमानं किंचिद्वस्तु नास्ति। अतए-

व नाम प्रतिद्धं महत् यशः यस्यास्ति। सर्वातिरिक्तयशा इत्यर्थः। हिरण्यगर्भ इत्योषेऽनुवाकश्चतुर्ऋचः हिरण्यगर्भः यः प्राणतः यस्येते य आत्मदा इति (२५।१०—११)। मा मा हिंसीज्जनितेत्येका एषा (१२।१०२)। यस्मान्न जातः इन्द्रश्च सम्रडिति (८।३६—३७) द्व्यृचोऽनुवाकः। एताः प्रतीकचोदिताः पूर्वं पठितत्वादादिमात्रेणोक्ताः ब्रह्मयज्ञे जपे च सर्वा अध्येयाः। एवं सर्वत्र।।३।।

एषो ह देवः। प्रदिशोऽनु सर्वाः पूर्वो ह जातः स उ गर्भे अन्तः। स एव जातः स जनिष्यमाणः प्रत्यङ् जनास्तिष्ठति सर्वतोमुखः।।४।।

(एष। ह। देव। प्रदिशऽइतिप्र दिश। अनु। सवर्वा । पूवर्व । ह। जात। य। ऊँऽइच्यूँ। गर्ब्भे। अन्तरिच्यन्त।। स। एव। जात। स। जनिष्ष्यमाण। प्रच्यङ। जना। तिष्टठति। सवर्वतोमुखऽइतिसवर्वत मुख।।४।।)

उ० एषो ह। त्रिष्टुभः सर्वाः सदसस्पतिमभ्दुतमित्यस्या गायत्र्याः प्राक्। इदानीं स्वरूपतः कथयति। एष एव देवः प्रदिशः दिशश्च सर्वाः अनुव्याप्य वर्तते तिर्यगूर्ध्वमधश्चंति। पूर्वे ह जात अनादिनिधनः संभूतः। स उ गर्भे अन्तः स एव च मातुरुदरे अन्तर्गर्भे व्यवतिष्ठते। स एवच जातः स एव च जनिष्यमाणः। तदुक्तम् 'सर्वे खल्विदं ब्रह्म तज्जलानिति शान्त उपासीते' ति प्रतिपदार्थमञ्चनः। हे जनाः तिष्टति। अचिन्त्यशक्तरित्यर्थः। जना इत्याद्युदात्तस्वरमपि स्वरामन्त्रितार्थस्यादावेव वर्तते।।४।।

म० चतववष्टुिभः। ह प्रसिद्धम्। एषो ह देवः सर्वाः प्रदिशः अनुतिष्ठति व्याप्य स्थितः। हे जनाः, ह प्रसिद्धमेष पूर्वः प्रथमो जात उत्पन्नः। गर्भे अन्तः गर्भमध्ये स उ स एव तिष्ठति। जातोऽपि स एव जनिष्यमाणः उत्पत्स्यमानोऽपि स एव। प्रत्यङ् प्रतिपदार्थमञ्चति प्रत्यङ्। सर्वतोमुखः सर्वतो मुखाद्यवयवा यस्य। अचिन्त्यशक्तिरित्यर्थः।।४।।

यस्माज्जातं न पुरा किं च नैव य आबभूव भुवनानि विश्वा। प्रजापतिः प्रजया सरराणस्त्रीणि ज्योतीषि सचते स षोडशी।।५।।

(यस्म्मात्। जातम्। न। पुरा। किम्। चन। एव। य। आबभूवेत्त्या बभूव। भुवनानि। विवश्श्वा।।५।।)

उ० यस्मान्न जातः। यस्मात्पुरुषात् जातं न पुरा किंच एव। यश्च आबभूव संभ-

ावयति भुवनानि भूतजातानि विश्वा विश्वानि सर्वाणि। प्रजापतिरिति व्याख्यातम्। अयं षोडशकलिङगयुक्त:।।५।।

म० यस्मात् पुरा किंचन किमपि न जातमेव। यश्च विश्वानि सर्वाणि भुवानानि भूतजातानि आवभूव समन्ताभ्यावयामास। अन्तर्भूतो ण्यर्थ:। स षोडशी षोडशावयवा-लिङगशरीरी प्रजापति: प्रजया संररण: रममाण: त्रीणि ज्योतींषि रवीन्द्वग्निरूपाणि सचते सेवते।।५।।

येन द्यौरुग्रा पृथिवी च दृढा येन स्व: स्तभितं येन नाक:। यो अन्तरिक्षे रजसो विमान: कस्मै देवाय हविषा विधेम।।६।।

(येन। द्यौ। उग्रा। पृथिवी। च। दृढा। येन। स्वरितिस्व। स्तभितम्। येन। नाक।। य। अन्तरिक्क्षे। रजस। विवमानऽइतिवि मान।।६।।)

उ० येन पुरुषण द्यौ: उग्रा उद्गर्णा वृष्टिदायिनी कृता। पृथिवी च दृढा स्थिरा प्राणिधारणाय वृष्टिग्रहणाय च अन्ननिष्पादनाय च कृता। येन च स्व: आदित्यमण्डलं स्तभितं स्तम्भितम्। येन च नाक: स्वर्गो लोक: स्तम्भित:। यश्चान्तरिक्षे रजस: उदकस्य वृष्टिलक्षणस्य विमानो निर्माता। तं परित्यज्य कस्मै अन्यस्मै देवाय हविषा विधेम हविर्दद्म इति समंजसम्।।६।।

म० येन पुरुषेण द्यौरुग्रा उद्गूर्णा। वृष्टिदा कृतेति शेष:। पृथिवी च येन दृढा कृता। सर्वप्राणिधारणं वृष्टिग्रहणं अन्ननिष्पादनं चेति भूतेर्दाढर्यम्। येन ख: आदित्यमण्डलं स्तभितं स्तभितम्। येन नाक: स्वोंऽपि स्तम्भित:। य: अन्तरिक्षे नभसि रजसो जलस्य वृष्टिरूपस्य विमान: विमिमीते निर्माता। तं विहाय कस्मै देवाय हविषा विधेम हविर्दद्म:। न कस्मैचिदित्यर्थ:।।६।।

यं क्रन्दसी अवसा तस्तभाने अभ्यैक्षेतां मनसा रेजमाने। यत्राधि सूर उदितो विभाति कस्मै देवाय हविषा विधेम।। आर्पो हयद्बहतीर्यश्चिदाप:।।७।।

(यम्। क्रन्दसीऽइतिक्क्रन्दसी। अवसा। तस्तभानेऽइतितस्तभाने। अभि। ऐक्क्षेताम्। मनसा। रेजमानेऽइतिरेजमाने।। यत्त। अधि। सूर। उदितऽइत्त्युत् इत। विवभातीतिवि भाति।।७।।)

उ० यं क्रन्दसी यं पुरुषं क्रन्दसी द्यावापृथिव्यौ अवसा अन्नेन हविर्लक्षणेन वृष्टिधारणाद्युपकारजनितेन। तस्तभाने संस्तम्भ्यन्त्यौ सर्वप्राणिजातम्। अभि ऐक्षेतां मनसा साब्वेतत्कृतमनेनेति। रेजमाने कल्पमाने। यत्र च अधि उपरि स्थित: यदाधार इत्यभिप्राय:। सूर: सूर्य: उदिता: सन् विभाति। तं देवम् परित्यज्य कस्मै देवाय हविषा विधेम इति समंजसम्। आपो ह यद्बृहतीर्यश्चिदाप इति द्वे प्रतीकगृहीते। अन्नापि स्वाध्यायाध्ययनं प्राप्तं प्रतीकस्योपलक्षणार्थत्वात्।।७।।

म० क्रन्दसी द्यावापृथिव्यौ यं पुरुषं मनसा अभ्यैक्षेतां साधु कृतमित्यप्श्यताम्। कीदृश्यौ क्रन्दसी। अवसा हविर्लक्षणेनान्नेन वृष्टिजनकेन तस्तभाने प्राणिजातं स्तम्भयन्त्यौ। व्यत्ययेन स्तम्भेर्ह्रादित्वम्। रेजमाने शोभमाने। सूर: सूर्य: यत्र द्यावापृथिव्यो: उदित: सन् अधिविभाति अधिकं शोभते वित्रासवति वा। तं विहाय कस्मै हविर्दद्म:। आपो ह यद्बृहती: (२७। २५) यश्चिदाप: (२७।२६) द्वे प्रतीकोक्ते जपादावध्येये।।७।।

वेनस्तत्पश्यन्निहितं गुहा सद्यत्र विश्वं भवत्येकनीडम्। तास्मिन्निदसं च वि चैति सर्वस ओत: प्रोतश्च विभू: प्रजासु।।८।।

(वेन। तत्। पश्यत्। निहितमितिनि हितम् । गुहा। सत्। यत्त्र। विवश्वम्। भवति। एकनीडमित्त्येक नीडम्।। तस्मिन्। इदम्। सम्। च। विव। च। एति। सवर्वम्। स। ओतऽइत्त्या उत। प्रोतऽइतिप्र उत। च। विवभूरितिवि भू। प्रजास्वितिप्र जासु।।८।।)

उ० वेनस्तत्पश्यत्। वेन: पण्डित: विदितवेदान्तरहस्य: सभ्दावनया तद्रूपं ब्रह्म पश्यत् पश्यति। निहितं स्थापितम्। गुहा गुहायामित्र। सन्नित्यम्। सत्र विश्वं सर्वमिदं विकारजातं भवति एकनीडं एकनिलयमविभक्तम्। कारणमेवोपसंहृतिकाले। समेत्य च व्येति सृष्टिकाले सर्वमेव। स च परमेश्च शरीरभावेन प्रोतश्च जीवभावेन इतरथा वा विभू: विभवति च कार्यकारणभावेन प्रज्ञासु।।८।।

म० वेन: पण्डितो विदितवेदान्तरहस्य: तत् ब्रह्म पश्यत् पश्यति। जानातीत्यर्थ:। कीदृशं तत्। गुहा गुहायां रह:स्थाने निहितं स्थापित दुर्ज्ञेयमित्यर्थ:। सत् नित्यम्। यत्र ब्रह्माणि विश्वे कार्यजातमेकनीड़ भवति। एकमेव नीडमाश्रयो यस्य तत्। अविभक्तमविशेषं कारणमेव भवतीत्यर्थ:। तस्मिन्ब्रह्माणि इदं सर्वं भूतजातं समेति च सङगच्छते संहारकाले। व्येति च निर्गच्छति सर्गकाले। स परमात्मा प्रजासु ओत: प्रोतश्च ऊर्ध्वतन्तुषु पट इव शरीरभावेन ओत: तिर्यक्तन्तुषु पट इव शरीरिभावेन प्रोतश्च। कीदृश:। विभू: कार्यकारणरूपेण विविधं भवतीति विभू: स एवेत्यर्थ:।।८।।

प्र तद्वोचेदमृतं नु विद्वान्गन्धर्वो धाम विभृतं गुहा सत्। त्रीणि पदानि निहिता गुहास्य यस्तानि वेद स पितुः पितासत्।।९।।

(प्र। तत्। वोचेत्। अमृतम्। नु। विद्वान्। गन्धवर्व। धाम। विवभृतमितिवि भृतम्। गुहा। सत्।। त्रींणि। पदानि। निहितेतिनि हिता। गुहा। अस्य। य। तानि। वेद। स। पितु। पिता। असत्।।९।।)

उ० प्र तत् प्रवोचेत् प्रब्रूयात् तत् अमृतं शाश्वतम्। नु क्षिप्रम्। विद्वान् पण्डितः गन्धर्वः। गन्धर्वलोके हि ब्रह्मविद्या सुतरां ज्ञायते। धर्मस्थानम्। विभृतं नानाभूतं सर्गस्थितिप्रलयैः। गुहासत् गुहायमिव निगूढम् अविवृतवेदान्तरहस्यसभ्दावानाम्। किंच। त्रीणि पदानि निर्हितानि गुहा गुहायामिव अस्य अमृतस्य सर्गस्थितिप्रलयाः त्रयो वा वेदाः त्रयो वा कालाः। भूतस्त्वोपलक्षणार्थं वा। भूयांसो हि तत्र गुणाः श्रूयन्ते विज्ञानघनानन्दसत्यसंकल्पादयः। परब्रह्मान्तर्याम्यव्याकृतानि वा त्रयः पादाः। यश्च तानि वेद जानासि स पितुरवि पिता भवति। परं ब्रह्म भतीत्वर्थः। तद्धि ब्रह्मरूपं श्रेष्ठम्।।९।।

म० गां वेदवाचं धारयति विचारयतीति गन्धर्वः वेदान्तवेत्ता विद्वान् पण्डितः नु क्षिप्रम् अमृतं शाश्वतम् तत् ब्रह्म प्रवोचेत् प्रब्रूयात्। गुहा गुहायां सत् विद्यमानम् धाम स्वरूपं विभृतं सर्गस्थितिप्रलयाः वेदाः काला वा ब्रह्माम्तर्यामिविज्ञानात्मानो वा। किंच यः तानि पदानि वेद जानाति स पितुः ब्रह्मणोऽपि पिता परमात्मा असंत् भवति। परंब्रह्मैव भवतीत्यर्थः।।९।।

स नो बन्धुर्जनिता स विधाता धामानि वेद भुवनानि विश्वा। यत्र देवा अमृतमानशानास्तृतीये धामन्नध्यैरयन्त।।१०।।

(स। न। बन्धु।जनिता। स। विवधतेतिविधाता। धामानि। वेद। भुवनानि। विवश्वा।। यर्त्त। देवा। अमृतम्। आनशाना। तृतीये। धामन्। अद्ध्यैरयन्तेत्त्यधि ऐरयन्त।।१०।।)

उ० स नो बन्धुः। स नोऽस्माकं बन्धुः। स चास्माकं जनिता। जनयितेति प्राप्ते 'जनिता मन्त्रे' इति णिचोलोपः। स च नो विधाता धारयिता। यः धामानि ब्रह्मणः स्थानानि वेद। भुवनानि भूतजातानि विश्वा सर्वाणि वेद नानात्मनो भिन्नानि वेद। किंच। यत्र देवा अग्न्यादयः अमृतं परब्रह्मलक्षणम्। आनशानः व्याप्रुवन्तः तृतीये धामन् धामनि स्थाने अधि

उपरि स्थिता: ऐरयन्त स्वेच्छया प्रवर्तन्ते तत्रच यो वेद स नो बन्धुरित्याद्यनुवर्तते।।१०।।

म० स परमात्मा नोऽस्माकं बन्धु: बन्धुवन्मान्य:। जनिता जनयिता। 'जनिता मन्त्रे' (पा० ६।४।५३) इति णिचो लोप:। स च विधाता धारयिता। स: विश्वा सर्वाणि भुवनानि भूतजातानि धामानि स्थानानि च वेद। देवा अग्न्यादय: तृतीये धामन् धामनि स्थाने स्वर्गरूपे अध्यैरयन्त स्वेच्छया वर्तन्ते। कीदृशा देवा:। अमृतं मोक्षप्रापकं ज्ञानं यत्र ब्रह्मणि आनशाना: व्याप्नुवाना: अश्नुवते आनशाना: 'बहुलं छन्दसि' (पा० २।४। ७६) इत्यशेर्ह्रोदित्वेन द्वित्वे शानचि अभ्यासस्य नुगागम:। ब्रह्मनिष्ठं ज्ञानं प्राप्ता: सन्त: स्वर्गे देवा मोदन्त इति भाव:।।१०।।

परीत्य भूतानि परीत्य लोकान्परीत्य सर्वा:प्रदिशो दिशश्च। उपस्थाय प्रथमजामृतस्यात्मनात्मानमभि संविवश।।११।।

(परीत्त्येतिपरि इत्त्य। भूतानि। परीत्त्येतिपरि इत्त्य। लोकान्। परीत्त्येतिपरि इत्त्य। सर्वा। प्रदिशऽइतिप्र दिश। दिश। च।। उपस्त्थायेत्त्युप स्थाप। प्रथमजामितिप्रथम जाम्। ऋतस्य। आत्मना। आत्मानम्। अभि। सम्। विवेश।।११।।)

उ० इदानीं सर्वेषु भूतेष्वहमस्मि सर्वाणि च भूतानि मयि सन्तीत्येतद्दर्शनावगुण्ठितस्य सर्वमेध्याजिनो मुक्तरुच्यते द्वाभ्यां कण्डिकाभ्याम्। नचात्र सर्वमोधो ग्रह: कर्तव्यो दर्शनस्य प्राधन्यात्। एवं हि पश्यतो यजमानस्याग्निहोत्रादयो यज्ञा: सर्वे सर्वमेधा एव। आलम्बनमात्रं हि तत्र यज्ञा:। परीत्य भूतानि अनेन दर्शनेन परिज्ञाय सर्वाधि भूतानि एवमेतदित्यवधार्य। एवं परिज्ञाय च सर्वान् लोकान्। परिज्ञाय च सर्वा: दिश:। परिज्ञाय च सर्वा: प्रदिश:। उपस्थाय च प्रथमजां वाचं त्रयीलक्षणाम्। 'अपिहि तस्मात्पुरुषाद्ध्यैव पूर्वमसृज्यते' तिश्रुते: प्रथमजा वाक्। ऋतस्य यज्ञस्य आत्मना आत्मानम्। परेण ब्रह्म विशिष्टं ब्रह्म अभिसंविशप्ति अपुनरावृत्तये।।११।।

म० इदानीं सर्वभूतेष्वहमस्मि सर्वाणि भूतानि मसीति ज्ञानवत: सर्वमेधयाजिनो मुक्तिरुच्यते। किंच सर्वमेधग्रहोऽपि न ज्ञानं प्रधानम्। ब्रह्मज्ञानवतो यजमानस्याग्निहोत्रादयोऽपि यज्ञा: सर्वमेधा एवेत्याह परीत्य भूतानीति कण्डिकाभ्याम्। एवंज्ञानवान् सर्वमेध्याजी आत्मना जीवरूपेण ऋतज्ञस यज्ञस्यात्मानं यज्ञाधिष्टातारं परमात्मानमभिसंविवेश प्रतिशति। ब्रह्मैव भवतीत्यर्थ:। किं कृत्वा। भूतानि परीत्य सर्वभूतानि ब्रह्मत्वेन विज्ञाय। लोकान्भूरादीन्परीत्य ब्रह्मरूपाञ्ज्ञात्वा। सर्वा: प्रदिश: विदिश: दिशश्च परीत्य

तद्रूपा ज्ञात्वा। प्रथमजां प्रथमोत्पन्नां त्रयीरूपां वाचमुपस्थाय संसेव्य। यज्ञादि कृत्वेत्यर्थः। 'अपिहि तस्मात्पुरुषाद्ब्रह्मैव पूर्वमसृज्यत' इति श्रुतेः प्रथमजा वाक् वेदरूपा।।११।।

परि द्यावापृथिवी सद्य इत्वा परि लोकान्परि दिशः परि स्वः। ऋतस्य तन्तुं विततं विचृत्य तदपश्यत्तदभवत्तदासीत्।।१२।।

(परि। द्यावापृथिवीऽइतिद्यावापृथिवी। सद्य। इत्त्वा। परिं। लोकान्। परिं। दिश। परिं। स्वरितिस्व।। ऋतस्य। तन्तुम्। विवततमितिवि ततम्। द्यिचृत्त्येतिदि चृत्त्य। तत्। अपश्श्यत्। तत्। अभवत्। तत्। आसीत्।।१२।।)

उ० परि द्यावा। परीत्यमुपसर्ग इत्वेत्यनेन संबध्यते। परीत्य द्यावापृथिव्यौ अनेन दर्शनेन परीत्य च लोकान् परीत्य च दिशः परीत्य च स्वः आदित्यम्। ऋतस्य यज्ञस्य तन्तुं विततं विचृत्य विच्छिद्य परिसमाप्य। सद्य एव तत् तथाभूतमात्मानम् अपश्यत् पश्यति। तदभवत् तथाभूतं ब्रह्म भवति। तदासीत् तदेवास्ति। तदुक्तम् 'तदेव सन्तस्तदु तभ्दवामः'। 'यथा ह्येकस्याग्नेः पदीपसहस्त्राणि तुल्यशक्तीनि निर्गच्छन्ति एवं परमात्मन इमे जीवा अप्युच्चरन्ति'। आभ्यां कण्डिकाभ्यां ग्रहस्थानामेव मुक्तिर्दर्शिता भवति। तेषां हि भूयांस उपायाः यज्ञादयः।।१२।।

म० परीत्युपसर्ग इत्वेत्यनेन संबध्यते। सर्वमेधयाजी तत् ब्रह्म अपश्यत् पश्यति तत् अभवत् भवति तत् असीत् वस्तुगत्या तदेवास्ति। अज्ञाननिवृत्तिरेव दर्शनं भवनं चेति भावः। किं कृत्वा। द्यावापृथिवी सद्यः परि इत्वा परीत्य तद्रूपेण ज्ञात्वा। लोकान् परीत्य दिशः परीत्य स्वरादित्यं च परीत्य। गुह्यं वस्तु पुनःपुनः कथितं चित्तमारोहतीति पुनरुक्तः। ऋतस्य यज्ञस्य तन्तुमितिकर्तव्यतां विततं प्रसारितं यथा तथा विचृत्य सामप्य यज्ञं कृत्वेत्यर्थः। 'तदेव सन्तस्तदु तभ्दवाम' इति श्रुतेः 'ब्रह्मैव सन्ब्रह्माप्येति' इति श्रुतेश्च ब्रह्मरूपस्य जीवस्याज्ञाननिवृत्तिरेव ब्रह्माप्तिरित्यर्थः।।१२।।

सदसस्पतिमभ्दुतं प्रियमिन्द्रस्य काम्यम्। सनिं मेधामयासिष स्वाहा।।१३।।

(सदस। पतिम्। अद्द्भुतम्। प्रियम्। इन्द्रस्य। काम्म्यम्।। सनिम्। मेधाम्। अयासिषम्। स्वाहा।।१३।।)

उ० इतउत्तरम् तिसृभिः कण्डिकाभिर्मेधा याच्यते श्रीश्च चतुर्थ्या। सदसस्पतिम् सदसस्पतिर्देवता सदो यज्ञगृहं तस्य पतिः तम्। अभ्दुतं महान्तं अचिन्त्यशक्तिम्। प्रियमिन्द्रस्य। कास्यं कामसंपत्करम् कमनीयं वा धनमेधार्थिभिः। सनिं धनं मेधाम् अयासिपम् याचे। द्विकर्मा चायं धातुः।।१३।।

म० इत उत्तरमृक्त्रये मेधा याच्यते। चतुर्थ्या श्रीर्याच्यते। प्रथमा गायत्री लिङगोक्तदेवता। अग्निं सनिं द्रव्यदानं मेधां बुद्धिं च अयासिषं याचे। द्विकर्मकः। कीदृशमग्निम्। सदसः यज्ञगृहस्य पतिं पालकम् अभ्दुतमचिन्त्यशक्तिम् इन्द्रस्य प्रियं मित्रं काम्यं कामनीयं धनमेधार्थिभिः।।१३।।

यां मेधां देवगणाः पितरश्चोपासते। तया मामद्य मेधयाग्ने मेधाविनं कुरु स्वाहा।।१४।।

(याम्। मेधाम्। देवगणाऽइतिदेव गणा। पितर। च। उपासतऽइत्त्युप आसते।। तया। माम्। अद्य। मेधया। अग्ने। मेधाविनम्। कुरु। स्वाहा।।१४।।)

उ० याम् मेघाम्। तिस्त्रोऽष्टुभ आग्नेय्यः। यां मेधां देवगणाः पितरश्च उपसाते पूजयन्ति। तया माम् अद्य मेधया हे अग्ने, मेधाविनं कुरु स्वाहा सुहुतमस्तु।।१४।।

म० अनुष्टुप्। हे अग्ने, तया मेधया अद्य मां मेधाविनं बुद्धियुक्तं कुरु। स्वाहा सुहुतमस्तु। 'अस्मायामेधास्त्रजो विनिः' (पा० ५।२।१२१) इति विनिप्रत्ययः। मेधास्यास्तीति मेधावी तम्। तया कया। देवगणाः देवगणाः देवसमूहाः पितरश्च यां मेधामुपासते पूजयन्ति। देवपितृमान्या बुद्धिरस्माकमस्त्वित्यर्थः।।१४।।

मेधां मे वरुणो ददातु मेधामग्निः प्रजापतिः। मेधामिन्द्रश्च वायुश्च मेधां धाता ददातु मे स्वाहा।।१५।।

(मेधाम्। मे। वरुण। ददातु। मेधाम्। अग्नि। प्रजापतिरितिप्रजा पति।। मेधाम्। इन्द्र। च। वायु। च। मेधाम्। धाता। ददातु। मे। स्वाहा।।१५)

उ० मेधां मे। लिङगोक्तदेवतानुष्टुप्। वरुणो मे मह्य मेधां ददातु। अग्निः प्रजापतिश्च मे मेधां ददातु। इन्द्रः वायुश्च मे मेधां ददातु। धाता मे मेधां ददातु स्वाहा सुहुतमस्तु।।१५।।

इंद मे ब्रह्म च क्षत्रं चोभे श्रियमश्नुताम्। मयि देवा दधतु श्रियमुत्तमां तस्यै ते स्वाहा।।१६।।

इति माध्यन्दिनीयायां वाजसनेयिसंहितायां

द्वात्रिंशोऽध्यायः।।३२।।

(इदम्। मे। ब्रह्मम्। च। क्षत्रम्। च। उभेऽइत्त्युभे। श्रियम्। अश्श्नुताम्।। मयिं। देवा।

दधतु। श्रियम्। उत्तमामित्त्युत् तमाम्। तस्यै। ते। स्वाहा।।१६।।)

।।इति वाजसनेयिसंहितापदे द्वात्रिंशत्तमोऽध्यायः।।

उ० इदं मे। श्री ऋक्। इदं ब्रह्म च क्षत्रं च उभे ब्रह्मक्षत्रे श्रियम् अश्नुताम् मदीयां श्रियमुपजीवताम्। मयि च देवाः दधतु स्थापयन्तु श्रियम् उत्तमाम्। ययाहं सर्वजनभोग्यो भवामि। तसंवे ते स्वाहा। या त्वमेवं सर्वजनैरभिलप्यसे तस्यै श्रियै ते तुभ्यं स्वाहा सुहुतमस्तु। अप्राप्य मेधां श्रियं च न यज्ञाः सिध्यन्तीत्येष संबन्धः।।१६।।

इति उबटकृतौ मन्त्रभाष्ये द्वात्रिंशत्तमोऽध्यायः।।३२।।

म० मन्त्रोक्तदेवतानुष्टुप्।श्रीकामोऽनया श्रियं याचते। ब्रह्मणजातिः क्षत्रं क्षत्रियजातिः इदमिमे उभे ब्रह्मक्षत्रे मे मम श्रियमश्नुताम्। देवाः मयि उत्तमां श्रियं दधतु स्थापयन्तु। तस्यै प्रसिद्धायै ते तुभ्यं श्रियै स्वाहा सुहुतमस्तु। चौ समुच्चयार्थौ। श्रीमेधे बिना यज्ञासिद्धेस्ते प्रार्थ्येते।।१६।।

१.० प्रवर्ग्याग्निकाश्वमेधोपनिषत्सं

ऋचं वाचं प्रपद्ये मनो यजुः प्रपद्ये साम प्राणं प्रपद्ये चक्षुः श्रोत्रं प्रपद्ये। वागोजः सहौजो मयि प्राणापानौ।।१।।

(ऋचम्। वाचम्। प्र। पद्ये। मन। साम। प्राणम्। चक्ष्क्षु। श्रोत्रम्। ववाक्। ओज। सह। ओज। मयि। प्राणापानौ।।१।।)

उ० इदानीं प्रवर्ग्याग्निकाश्वमेधोपनिषत्संबद्धा मन्त्रास्ताव्याक्ष्यास्यामः। तत्राग्निका उग्रश्चेत्येवमादयः। तान्पुनः परमेष्ठ्यपश्यत्। प्राजापत्यो विमुख इति तस्य मन्त्रगणस्य संज्ञा। अग्नि हृदयेनेत्याश्वमेधिकाः आ अध्यायात् प्रजापतेरार्षम्। परिशिष्टं दध्यङ्ङाथर्वणोऽपश्यत्। 'दध्यङ् ह वा आथर्वणः' इत्येवमादिकया श्रुत्या तभ्दावं प्रतिपद्यते। ऋचं वाचम्। प्रवर्ग्यस्यादावन्ते च शान्तिमकरणाऽध्यायः। विश्वेदेवा अग्निकानामाश्वमेधिकानां च मन्त्राणाम् इह समान्नानं दिवाकीर्तिसामान्यात्। प्रथमकण्डिका यजुः। साम प्राणं चक्षुः श्रोत्रमिति व्याख्येयम्। नहि त्रयीविद्याप्रपन्नस्य प्रवर्ग्य आयुषो विनाशं कुर्यात्। तथा वाङमनः प्राणश्चक्षुः श्रोत्राणि प्रपन्नस्य सप्तदशं ह्येतत्प्रजापतेर्लिङगमुपलक्षितम्। अथैवंसति वाक् ओजो बलं मानसं धृष्टतानाम। पुनरोजोग्रहणमादरार्थे च। एतदुक्तं भवति—वाक्

अतिशयिकमोजः प्राणापानौ च सह एकीभूताः मयि वर्तन्तेऽतः प्रवर्ग्योऽस्मान्न हिनस्ति।।१।।

म० पञ्चाध्यायी आथर्वणेन दधीचा दृष्टा 'दध्यङ् ह वा आथर्वण एत शुक्रमेतं यज्ञं विदांचकार' (१४।१।१।२०) इति श्रुतेः। 'उग्रश्च' (३९।७।१७।८६।) इत्याग्निको मन्त्रः। अग्निं हृदयेनेत्याद्यध्यायसमाप्तिपर्यन्तमाश्वमेधिकम् (३९।८—१३) तद्द्वयं वर्जयित्वा। (का० अनुक्रमण्याम्)शान्तिकरणमाद्यन्तयोः। ऋचं वाचमित्यध्यायेन शान्तिकरणं कार्यम्। स्वाध्याये मन्त्रपाठे प्रवर्ग्यमन्त्रादावस्याध्यायस्य दर्शनात्। अथ मन्त्रार्थः। पञ्च यजूंषि लिङ्गक्तदेवतानि। ऋचमृग्रूपां वाचमहं प्रपद्ये प्रविशामि शरणं व्रजामि। यजुः यजूरूपं मनः प्रविशामि। प्राणं प्राणरूपं साम प्रपद्ये। चक्षुरिन्द्रियं श्रोत्रेन्द्रियं च प्रपद्ये। वागादिग्रहणं सप्तदशावयवोपलक्षणम् सप्तदशावयवं प्रजापतेर्लिङ्ग प्रपद्ये इत्यर्थः। त्रयीविद्यां लिङ्गशरीरं च प्रपन्नं प्रवर्ग्यो न नाशयेदिति भावः। तथा वागिन्द्रियमोजो मानसं बलं धाष्टर्यम्। पुनरोजोग्रहणाच्छारीरं च बलम्। प्राणापनौ उच्छवासनिश्वासवायू च एते सह एकीभूताः सन्तो मयि वर्तन्ते। अतोऽपि प्रवर्ग्योऽस्मान्न हनतीति भावः।।१।।

यन्मे छिद्रं चक्षुषो हृदयस्य मनसो वातितृण्णं बृहस्पतिर्मे तद्दधातु। शं नो भवतु भुवनस्य यस्पतिः।।२।।

(यत्। मे। छिद्दम्। चक्क्षुष। हृदयस्य। मनस। वा। अतितृण्णमित्त्यति तृण्णम्। बृहस्प्पति। मे। तत्। दधातु।। शम्। न। भवतु। भुवनस्य। यः। पतिः।।)

उ० यन्मे बर्हस्पत्या पङ्क्तिः। यन्मे मम। छिद्रं अवखण्डितम् चक्षुषः हृदयस्य वा। हृदयग्रहणेन बुद्धिरुक्त।। मनसो वा अतितृण्णं अतिहिंसितम् प्रवर्ग्याचरणेन। बृहस्पतिः मम तत् दधातु। अथैवं बृहस्पत्यनुगृहीतानाम्। शं नः सुखरूपोऽस्माकं भवतु। भुवनस्य भूतजातस्य यः पतिः योऽधिपतिः प्रवगर्यरूपो यज्ञः।।२।।

म० बृहस्पतिदेवत्या पङ्क्तिः। मे मम चक्षुषः चक्षुरिन्द्रियस्य यत् छिद्रमवखण्डनं जातं प्रवर्ग्याचरणेन। हृदयस्य बुद्धेर्वा यत् छिद्रं जातम्। मनसो वा यत् अतितृण्णमतिहिंसितम् प्रवगर्याचरणेन यत् चक्षुर्बुद्धिमनसां व्याकुलत्वं जातम् बृहस्पतिर्देवगुरुः मे मम तत् छिद्रमतितृण्णं च दधातु संदधातु छिद्रं निवर्तयतु। भुवनस्य भूतजातस्य यः पतिरधिपतिः प्रवर्ग्यरूपो यज्ञः स नोऽस्माकं शं सुखरूपो भवतु। बृहस्पतिना छिद्रापाकरणात्प्रवर्ग्यः कल्याणरूपोऽस्त्वित्यर्थः।।२।।

भूर्भुवः स्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात्।।३।।

उ० भूर्भुवः स्वः यजूंषि। तत्सवितुरिति कयानस्तिस्त्रश्च व्याख्याताः। ऋषिकृतो विशेषः।। ३।। ४।। ५।। ६।।

म० भूर्भुवः स्वः त्रीणि यजूंषि। तत्सवितुः, कया नः, कस्त्वा, अभी षुणः, एताश्चतस्त्र ऋचो व्याख्याताः (३, ३५।२७, ३९—४१) अभी षुण इत्यस्यामृचि शतं भवास्यूतिभिरिति बहुवचनम्। पूर्वमूतय इत्येव पाठः। ऊतिभिः अवनैर्हेतुभिः शतमसंख्यरूपो भवसीत्यर्थः।।३।।४।।५।।६।।

कया नश्चित्र आभुवदूती सदावृधः सखा। कया शचिष्ठया वृता।।४।।

कस्त्वा सत्यो मदानां महिष्ठो मत्सदन्धसः। दृढा चिदारुजे वसु।।५।।

अभी षु णः सखीनामविता जरितृणाम्। शतं भवास्यूतिभिः।।६।।

(ऊतिभिरित्त्यूति भि।।६।।)

कया त्वं न ऊत्याभि प्रमन्दसे वृषन्। कया स्तोतृभ्य आभर।।७।।

(कया। त्वम्। न। ऊत्त्या। अभि। प्र। मन्दसे वृषन्।। कया। स्तोतृभ्यऽइतिस्तोतृभ्य। आ। भर।।७।।)

उ० कया त्वम्। गायत्री। ऐन्द्री अनिरुक्त। हे इन्द्र, कया ऊत्या केन वा गमनेन त्वम् नः अस्मान् अभिप्रमन्दसे अभिमोदयसि हर्षयसि। हे वृषन् सेक्तः, कया च ऊत्या केन वा गमनेन स्तोतृभ्यः दातुं धनानि आभर आहरसि। लडर्थे लोट्। तत्कथय। येन तथानुतिष्ठामः।।७।।

म० इन्द्रदेवत्या गायत्री अनिरुक्तेन्द्रपदहीना। आद्यपादे व्यूहद्वयम्। हे वृषन् वर्षतीति वृषा हे सेक्तः इन्द्र, 'वासवो वृत्रहा वृषा' इत्यभिधानम्। कया ऊत्या केन तर्पणेन हविर्दानेन नोऽस्मानभिप्रमन्दसे अभिमोदयसि। 'मदिस्तु स्वपने जाड्ये मदे मोदे स्तुतौ गतौ' लट्। कया च ऊत्या तृप्त्या स्तोतृभ्यः स्तुतिकर्तृभ्यो यजमानेभ्यः आभर आहर आहरसि। धनं दातुमिति शेषः। तद्वयेन तथा वयं कुर्म इति भावः। आभरेति लडर्थे लोट्।।७।।

इन्द्रो विश्वस्य राजति।शं नौ अस्तु द्विपदे शं चतुष्पदे।।८।।

(इन्द्र। विवश्श्वस्य। राजति।। शम्। न। अस्तु। द्विपदऽइतिद्वि पदे। चतुष्पदे। चतु पदऽइतिचतुपदे।।८।।)

उ० इन्द्रो विश्वस्य द्विपदा विराट। योयं महावीर इन्द्र आदित्यो वा। कस्याधिष्ठात्री देवता। विश्वस्य जगतः राजति देदीप्यते ईष्टे वा। तस्य प्रसादात्। अस्माकम् अस्तु द्विपदे शं चतुष्पदे। द्विपदां चतुष्पदां चेति विभक्तिव्यत्ययः।।८।।

म० द्विपदा वरिाट्र इन्द्रदेवत्या। विंशत्यक्षरा द्विपदा विराट्र कथ्यते। विश्वस्य सर्वस्य जगतः इन्द्रः 'इदि परमैश्वर्ये: इन्दतीतीन्द्रः परमेश्वरः महावीरः आदित्यो वा यो राजति देदीप्यते ईष्टे वा स नोऽस्माकं द्विपदे। विभक्तिव्यत्ययः। द्विपदां पुत्रादीनां शं सुखरूपोऽस्तु। चतुष्पदे चतुष्पदां गवादीनां च शं सुखरूपोऽस्तु।।८।।

शं नो मित्रः शं वरुणः शं नो भवत्र्यमा। शं न इन्द्रो बृहस्पतिः शं नो विष्ण-रुरुक्रमः।।९।।

(मित्र। वरुण। भवतु। अर्य्यमा।। इन्द्र। बृहस्प्पति। विवष्णु। उरुक्क्रऽइत्त्युरु क्रम।।९।।)

उ० शं नो मित्रः। द्वे अनुष्टुभौ। महावीरप्रसादात् आदौ च। शं सुखरूपः नोऽस्माकं भवतु मित्रः। शं च नः इन्द्रः बृहस्पतिः शं च नः विष्णु उरुकमः डरु विस्तीर्णः क्रमो यस्य स उरुक्रमः। शेषं दर्शितया व्याक्ष्येयम्।।९।।

म० द्वे अनुष्टुभौ मित्रवरुणादयो देवताः। मित्रो देवो नोऽस्माकं शं सुखरूपो भवतु महावीरप्रसादात्। मेद्यति भक्तेषु त्रिह्यतीति मित्रः। वरुणः शं सुखरूपो भवतु। वृ-णोत्यङगीकरोति भक्तमिति वरुणः। अर्यमा नोऽस्माकं शं भवतु। इयर्ति गच्छति भक्तं प्रतीत्यर्यमा। इन्द्रे देवेशो नोऽस्माकं शं भवतु। बृहस्पतिर्देवगुरुर्नः शं भवतु। बृहतां वेदानां पतिः पालकः। उरुर्विस्तीर्णः क्रमः पादन्यासो यस्य स विष्णुः नोऽस्माकं शं भवतु। वेवेष्टि व्याप्रोतीति विष्णुः।।९।।

शं नो वातः पवता शं नस्तपतु सूर्यः। शं नः कनिक्रदद्देवः पर्जन्यो अभिवर्ष-तु।।१०।।

(वात। पवताम्। तपतु। सूर्य।। कनिक्क्रदत्। देव। पर्जन्न्य। अभि। ववर्ष-

तु।।१०।।)

उ० शं नः शं सुखरूपः नोऽस्माकम् वातः अपुरुषः अव्याधिजनकश्च पवतां वातु। शं सुखरूपः अदहनः भेषजरूपश्च नोऽस्माकं तपतु सूर्यः। शं नः सुखरूपश्चास्माकम्। पर्जन्यो देवः काशनिक्षाररहितं पवित्रमुदकम् भेषजकर्तृ अभिवर्षतु। कनिक्रदत्। स्तनयित्नु शब्दं कुर्वन्।।१०।।

म० वातो वायुर्नोऽस्माकं शं सुखकारः अपुरुषः अव्याधिजनकश्च पवतां वहताम्। 'पव गतौ' लोट्। सुवति जनान् स्वस्वव्यापारेषु प्रेरयति सूर्यः शं सुखरूपोऽदहनो भेषजरूपश्च नोऽस्माकं तपतु किरणान्प्रसारयतु। पर्जन्यः पिपर्ति पूरयति जनमिति पर्जन्यः, परोऽम्भःपूरो जन्यतेऽनेन वा। 'पर्जन्यौ रसदब्देन्द्रौ' इत्यभिघानम्। पर्जन्यः पर्जन्येशो देवः नोऽस्माकं शं सुखकरं काशनिक्षाररहितं यथा तथा अभिवर्षतु सिञ्चतु। कीदृशः। कनिक्रदत् अत्यन्तं क्रन्दतीति शब्दं कुर्वन् 'दाधर्तिदर्धर्ति—' (पा०७।४।६५) इत्यादिना यङ्लुगन्तो निपातः।।१०।।

अहानि शं भवन्तुनः नः श रात्रीः प्रतिधीयताम्। शं न इन्द्राग्नी भवतामवोभिः शं न इन्द्रावरुणा रातहव्या। शं न इन्द्रापूषणा वाजसातौ शमिन्द्रासोमा सुविताय शं योः।।११।।

(अहानि। भवन्तु। न। रात्री। प्रतिं धीयताम्।। इन्द्राग्नीऽइतीन्द्राग्न्नी। भवताम्। अर्वोभिरित्त्यव भि। इन्द्रावरुणा। रातहष्य्येतिरात हष्या।। इन्द्रापूषणा। वाजसाताववितिवाज सातौ। इन्द्रसोमा। सुविताय। यो।।११।।)

उ० अहानि शम् द्विपदा गायत्री। अहानि दिवसाः शं सुखरूपाः भवन्तु नोऽस्माकम्। शं सुखरूपाः रात्रीः प्रतिधीयतां प्रतिदधात्वस्मासु महावीरः। शं सुखरूपौ च इन्द्रग्नी भवताम् अवोभिः पालनैः सह। शं नः सुखरूपौ चास्माकम्। इन्द्रावरुणा इन्द्रावरुणौ। रातहव्या दत्त्हविष्कौ भवताम्। शं नः सुखरूपौ चास्माकं इन्द्रापूषणौ भवताम्। वाजसातौ अन्नसंभजने निमित्तभूते। शं सुखरूपौ च इन्द्रासोमौ भवताम् सुविताय साधुगमनाय साधुप्रसवाय वा। शं योः शमनाय रोगाणां यावनाय पृथककरणाय च भयानाम्।।११।।

म० द्विपदा गायत्री। अहानि रात्रयश्च देवताः। अहानि दिनानि नोऽस्माकं शं सुखरूपाणि भवन्तु। रात्रीः शं सुखकर अस्मासु प्रतिधीयतां प्रतिदधातु। महावीर इति शेषः। कतरि यक् छान्दसाः। शं न इन्द्राग्नी त्रिष्टुप्। इन्द्राग्नी इन्द्रावरुणौ इन्द्रापूषणौ इन्द्रासोमौ देवताः। इन्द्रग्नी अवोभिः पालनैः कृत्वा नोऽस्माकं शं सुखरूपौ भवताम्। रातं दत्तं

हव्यं ययोस्तौ रातहव्यौ हविस्तृप्तौ इन्द्रावरुणौ नः शं भवताम्। वाजसातौ वाजस्यान्नस्य सातौ दाने निमित्तभूते इन्द्रापूषणा इन्द्रपूषसंज्ञौ देवौ नोऽस्माकं सुखरूपौ भवताम्। इन्द्रासोमा इन्द्रसोमौ देवौ शं सुखरूपौ भवताम्। किमर्थम्। सुविताय सुष्ठ इतं सुवितम् साधुगमनाय साधुप्रसवास वा। तथा शं रोगाणां शमनाय। योः यवनाय पृथककरणाय च भयानाम्। रोगं भयं च निवर्त्य सुखरूपौ भवतामित्यर्थः। 'देवताद्वन्द्वे च' (पा० ६३। २६) इति सर्वत्र पूर्वपदस्य दीर्घः।।११।।

शं नो देवीरभिष्टय आपो भवन्तु पीतये। शं योरभिस्त्रवन्तु नः।।१२।।

(देवी। अभिष्टये। आप। भवन्तु। पीतये।। यो। अभि। स्त्रवन्तु। न।।१२।।)

उ० शं नो देवीः। अब्देवत्या गायत्री। सुखरूपा अस्माकम् देवीः अभिष्टये अभिषेकाय अभीष्टाय वा। आपः भवन्तु पीतये पानाय च। शं योः शमनाय रोगाणां पृथककरणाय भयानां वा। अभिस्त्रवन्तु नः अस्माकम्।।१२।।

म० अब्देवत्या गायत्री। देवीः देव्यो दीप्यमाना अपो नोऽस्माकमभिष्टये अभिषेकायाभीष्टाय वा पीतये पानाय च शं सुखरूपा भवन्तु। अस्माकं स्नाने पाने चापः सुखयित्र्यो भवन्तु। आपः शं योः रोगाणां शमनं भयानां यवनं पृथककरणं च अभिस्त्रवन्तु। नोऽस्मकं भयरोगनाशं कुर्वन्त्वित्यर्थः १२

स्योना पृथिवि नो भवानृक्षरा निवेशनी। यच्छा नः शर्म सप्रथाः।।१३।।

उ० स्योना पृथिवीति व्याक्ष्यातम्।।१३।।

म० स्योना पृथिवि। व्याख्याताता (अ० ३५। क० २१) ।।१३।।

आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन। महे रणाय चक्षसे।।१४।।

उ० आपो हिष्ठेति तिस्त्रश्च व्याख्याताः।।१४।।१५।।१६।।

म० आपोहिष्ठा तृचो व्याख्यातः(अ० ११।क० ५०—५२)।।१४।।१५।।१६।।

योव: शिवतमो रसस्तस्य भाजयतेह न:। उशतीरिव मातर:।।१५।।

तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ। आपो जनयथा च न:।।१६।।

द्यौ: शान्तिरन्तरिक्ष शान्ति: पृथिवी शान्तिराप: शान्तिरोषधय: शान्ति:। वनस्पतय: शान्तिर्विश्रे देवा: शान्तिर्ब्रह्म शान्ति: सर्व शान्ति: शान्तिरेव शान्ति: सा मा शान्तिरो-धि।।१७।।

(द्यौ। शान्ति। अन्तरिक्क्षम्। पृथिवी। आप। ओषधय।। वनस्प्पतय। विश्श्वे। देवा। ब्रह्म्म। सर्वम्। एव। सा। मा। एधि।।१७।।)

उ० द्यौ: शान्ति। या द्युलोकरूपा शाान्ति: या चान्तरिक्षरूपा शान्ति:। या च पृथिवी। आप: ओषधय: वनस्पतय: विश्वेदेवा: ब्रह्म त्रयीलक्षणं परं वा। सर्वशान्ति: या सच शान्तिरेव शान्ति: स्वरूपत एव शान्ति:। सा। मा मां शान्ति: एधि। अस्त्विति पुरुषव्यत्यय:। त्वत्प्रसादादित्यपेक्षा।।१७।।

म० यजूंषि संहशि जीव्यासमित्यन्तानि (क० १९)। एकाधिका शककरी। द्यौ: द्युलोकरूपा या शान्ति: अन्तरिक्षरूपा च या शान्ति: पृथिवी भूलोकरूपा या शान्ति: आपो जलरूपा या शान्ति: ओषधय: ओंषधिरूपा या शान्ति: वनस्पतय: वृक्षरूपा या शान्ति: विश्वेदेवा: सर्वदेवरूपा या शान्ति: ब्रह्म त्रयीलक्षणं परं वा पद्रूपा या शान्ति: सर्वजगद्रूपा या शान्ति: शान्तिरेव शान्ति: या स्वरूपत: शान्ति: सा शान्ति: मा मां प्रति एधि अस्तु। पुरुषव्यत्यय:। महावीरप्रसादात्सर्व शान्तिरूपं मां प्रत्यस्त्वित्यर्थ:। यद्वा द्यौरित्यादिषु विभक्तिव्यत्यय: सप्तम्यर्थे प्रथमा। दिव्यन्तरिक्षे पृथिव्यामप्खोषधिषु वनस्पतिषु विश्वदेवेषु ब्रह्मणि सर्वस्मिंश्च या शान्ति: सा मां प्रत्यस्त्वित्यर्थ:।।१७।।

दृते दृह मा मित्रस्य मा चक्षुषा सर्वाधि भूतानि समीक्षन्ताम्। मित्रस्याहं चक्षुषा सर्वाधि भूतानि समीक्षे। मित्रस्य चक्षुषा समीक्षामहे १८

(दृते। दृह। मा। मित्रस्य। मा। चक्क्षुषा। सवर्वाणि। भूतानि। सम्। ईक्क्षन्ताम्।। अहम् ईक्क्षे। ईक्क्षामहे।।१८।।)

उ० दृते ह ह मा। हते यजु:। हृविदारणे' विदीर्णेऽपि शरीरे जरया। हंह हढीकुरु माम्। कथमिति चेत्। मित्रस्या मा चक्षुषा सर्वाणि भूतानि सं ईक्षन्तां पश्यन्तु। अहमपि

मित्रस्य चक्षुषा सर्वाणि भूतानि समीक्षे पश्यामि। शान्तं हि मित्रस्य चक्षुः। न वै मित्रं कंचन हिनस्ति। न मित्रः कंचन हिनस्तीति। एवमहिंस्यमाना अहिंसन्तश्च परस्परमद्रोहेण सर्वथा मित्रस्य चक्षुषा समीक्षामहे।।१८।।

म० दृते 'दृ विदारे' विदीर्णे जराजर्जरितेऽपि शरीरे हे महावीर, मा मां त्वं हंह हढीकुरु। यद्वा दृते विदीर्णे कर्मणि मां हंह अच्छिद्रं कर्म कुरु। यद्वा ससुषिरत्वात् सेक्तृत्वाचच हतिशब्देन महावीरः। हे दृते महावीर, मां हंह हढीकुरु। कथं दाढर्य तदाह। सर्वाणि भूतानि प्राणिनो मा मां मित्रस्य चक्षुषा समीक्षन्तां सम्यक् पश्यन्तु मित्रहष्टवा सर्वे मां पश्यन्तु नारिदृष्टवा। सर्वेषां प्रियो भूयासमित्यर्थः। किंच अहमपि सर्वाणि भूतानि मित्रस्य चक्षुषा समीक्षे पश्यामि सर्वे मे प्रियाः सन्तु। मित्रचक्षुः शान्तं भवति। मित्रः कंचन न हन्ति मित्रं च कश्चन न हन्ति एवं परस्पराद्रोहेण सर्वानहिंसन्तो मित्रस्य चक्षुषा वयं समीक्षामहे पश्यामः।।१८।।

हते हंह मा०। ज्योक्ते संहशि जीव्यासं ज्योक्ते संहशि जीव्यासम्।।१९।।

(ज्योक्। ते। सन्दृशीतिसम् दृशि। जीष्यासम्।।१९।।)

उ० हते हहं यजुः। हते हह मा। अतिशयार्थं पुनर्वचनम्। ज्योक् चिरम् ते तव संहशि संदर्शने। जीव्यासं जीवेयम्। आदरार्थं पुनर्वचनम्।।१९।।

म० हे हते वीर, मां हंह। आदरार्थं पुनर्वचनम्। हे महावीर, ते तव संहशि संदर्शने अहं ज्योक् चिरं जीव्यासं जीवेयम्। जीवेराशीर्लिङि रूपम्। ज्योगिति निपातश्चिरार्थः। पुनरुक्तिरादरार्था। ते संहशि ज्योग्जीव्यासम्।।१९।।

नमस्ते हरसे शोचिषे नमस्ते अस्त्वर्चिषे। अन्याँस्ते अस्मत्तपन्तु हेतयः पावको अस्मभ्य शिवो भव।।२०।

उ० नमस्ते हरसे इति व्याख्यातम्।।२०।।

म० नमस्ते व्याख्याता (अ० १७।क०११)।।२०।।

नमस्ते अस्तु विद्युते नमस्ते स्तनयित्नवे। नमस्ते भगवन्नस्तु यतः स्वः समीह-

से।।२१।।

(नम। ते। अस्तु। विवद्तऽइतिवि द्युते। स्तनयित्त्नवे।। भगवन्नितिभग ववन्। अस्तु। स्त्रत। स्वरितिस्व।। समीहसऽइतिसम् ईहसे।।२१।।)

उ० नमस्ते द्वे अनुष्टुभौ। नमः ते तुभ्यं अस्तु। विद्युते विद्युद्रूपाय। नमस्ते स्तनयित्नवे स्तनयित्नुरूपाय। नमः ते हे भगवन्, अस्तु। यतः यस्मात् स्वः स्वर्ग लोकं गन्तुम् समीहसे चेष्टसे। अमर्त्यस्त्वमित्यभिप्रायः।।२१।।

म० द्वे अनुष्टुभौ विद्युत्स्तनयित्नुरूपीगवद्देवते। हे भगवन् महावीर, विद्युते विद्युद्रूपाय ते तुभ्यं नमोऽस्तु। स्तनयित्नवे स्तनयित्नुर्गर्जितं तद्रूपाय ते नमोऽस्तु। यतः कारणात् स्वः स्वर्गं गन्तुं त्वं समीहसे चेष्टसे अतस्ते तुभ्यं नमोऽस्तु।।२१।।

यतो यतः समीहसे ततो नो अभयं कुरु। शं नः कुरु प्रजाभ्योऽभयं नः पशुभ्यः।।२२।।

(यतोयतऽइतियत यत। समीहसऽइतिसम् ईहसे। तत। न। अभयम्। कुरु।। शम्। न। कुरु। प्रजाब्भ्यऽइतिप्र जाब्भ्य। अभयम्। न। पशुब्भ्यऽइतिपशु भ्य।।२२।।)

उ० यतो यतः यस्माद्यस्मात् दुश्चरितात् अपाकर्तुं समीहसे चेष्टसे ततस्ततः नः सुखमस्माकम् कुरु प्रजाभ्यः। अभंय नः पशुभ्यः कुरु।।२२।।

म० हे महावीर, यतो यतः यस्माद्यस्माद् दुश्चरितात्त्वं समीहसे अस्मास्वपकर्तुं चेष्टसे ततस्ततो नोऽस्माकमभयं कुरु। किंच नोऽस्माकं प्रजाभ्यः शं सुखं कुरु। नोऽस्माकं पशुभ्यः चाभयं भीत्यभावं कुरु।।२२।।

सुमित्रिया न आप ओषधयः सन्तु दुर्मित्रियास्तस्मै सन्तु योऽस्मान्द्वेष्टि यं च वयं द्विष्मः।।२३।।

उ० इत उत्तरं यजूंषि व्याख्यायन्ते अध्यायत्। तत्र सुमित्रिया न इति व्याख्यातम्।।२३।।

म० यजुः। व्याख्यातम्(अ० ६।क०२२)।।२३।।

तचचक्षुर्देवहितं पुरस्ताच्छुक्रमुचचरत्। पश्येम शरदः शतं जीवेम शरदः शत शृणुयाम शरदः शंत प्रब्रवाम शरदः शतमदीनाः स्याम शरदः शतं भूयश्च शरदः श-तात्।।२४।।

इति माध्यन्दिनीयायां वाजसनेयिसंहितायां षट्त्रिंशोऽध्यायः।।३६।।

(तत्। चक्क्षु। देवहितमितिदेव हितम्। पुरस्त्तात्। शुक्रम्। उत्। चरत्। पश्श्येम। शरद। शतम्। जीवेम। शृणुयाम। प्र। ब्रवाम। अदीना। स्याम। भूय। च। शतात्।।२४।।)

तच्चक्षुः। योयं महावीरोऽस्माभिः स्तुतः। तत् आदित्यरूपं चक्षुः। देवहितं देवैर्निहितं स्थापितम् देवानां वा हितम्। पुरस्तात् प्राच्यां दिशि। शुक्रं शुकलम् उसंसृष्टं पाप्मभिः। शोचिष्मद्वा। उचचरत् उदितम्। तत्प्रसादाचच। पश्येम शरदः शतम्। जीवेम शरदः शतम्। श्रृणुयाम शरदः। शतम्। प्रब्रवाम शरदः शतम्। अस्खलितवागिन्द्रिया भवामः। अदीनाः स्याम शरदः शतम्। भूयश्च बहुतरं कालं च शरदः शतात्।।२४।।

इति उवटकृतौ मन्त्रभाष्ये षट्त्रिंशोऽध्यायः।।३६।।

म० सूर्यदेवत्या ब्राह्मी त्रिष्टुप्। एतैर्मन्त्रैर्यो महावीरोऽस्माभिः स्तुतः तत् चक्षुः जगतां नेत्रभूतमादित्यरूपं पुरस्तात् पूर्वस्यां दिशि उच्चरत् उचचरति उदेति 'इतश्च लोपः परस्मैपदेषु' (पा० ३।४।९७) इतीकारलोपः। कीदृशं तत्। देवहितं देवैर्हितं स्थापितम्। यद्वा देवानां हितं प्रियम् शुक्रं शुकलं पापासंसृष्टं शोचिष्मद्वा। तस्य प्रसादात् शतं शरदः वर्षाणि वयं पश्येम शतवर्षपर्यन्तं वयमव्याहतचक्षुरिन्द्रिया भवेम। प्रार्थनायां लिङ्। अत्यन्तसंयोगे द्वितीया। शतं शरदः जीवेम अपराधीनजीवना भवेम। शतं शरदः श्रृणुयाम स्पष्टश्रोत्रेन्द्रिया भवेम। शतं शरदः प्रब्रवाम अस्खलितवागिन्द्रिया भवेम। शतं शरदः अदीनाः स्याम न कस्याप्यग्रे दैन्यं कुर्याम। शतात् शरद्ः शतवर्षोपर्यपि भूयश्च बहुकालं पश्येमेत्यादि योज्यम्।।२४।।

अभ्यास प्रश्न

१. रुद्रस्वरुपं लिखत।

२. रुद्रस्य वैशिष्ट्यं लिखत।

३. सूर्यस्य नीलकण्ठ इति नाम्नः सार्थकं प्रतिपादयत।

४. रुद्रसूक्तस्य सारं लिखत।

५. नमस्ते रुद्र ....इति मन्त्रं व्याख्यात।

६. यामिषु गिरिशन्त....इति मन्त्रं व्याख्यात।

७. शिवेन वचसा त्वा....इति मन्त्रं व्याख्यात।

८. नमोऽस्तु नीलग्रीवाय....इति मन्त्रं व्याख्यात।

९. विज्यं धनुः....इति मन्त्रं व्याख्यात।

१०. नमस्त आयुधायानातताय....इति मन्त्रं व्याख्यात।

११. परि ते धन्वनो....इति मन्त्रं व्याख्यात।

१२. या ते हेतिर्मीढुष्टम....इति मन्त्रं व्याख्यात।

संदर्भ ग्रंथ

- वैदिक सूक्तावली, डॉ. रामदेव साहू, श्याम प्रकाशन, जयपुर, 2006.
- ऋक् सूक्तावलि – डॉ. विश्वनाथ शर्मा, अभिषेक प्रकाशन, जयपुर, 1195.
- वैदिक सूक्त मुक्तावली – डॉ. श्रीकृष्ण ोझा, अभिषेक प्रकाशन, 2005.
- वैदिक साहित्य और संस्कृति –वाचस्पति गैरोला, चौखम्भा प्रकाशन नई दिल्ली, 2003.

❖❖❖

अध्याय : 3

यजुर्वेदभाष्ये

राष्ट्राभिवर्धनम्, सपत्नक्षयणं च।

ब्रह्मणस्पतिः, अभीवर्तमणिः। अनुष्टुप्।

अभीवर्तेन मणिना येनेन्द्रो अभिवावृधे।

तेनास्मान् ब्रह्मणस्पतेऽभि राष्ट्राय वर्धय ।।१।।

अभिवृत्य सपत्नानभि या नो अरातयः ।

अभि पृतन्यन्तं तिष्ठाभि यो नो दुरस्यति ।।२।।

अभि त्वा देवः सविताभि सोमो अवीवृधत्।

अभि त्वा विश्वा भूतान्यभीवर्तो यथाससि ।।३।।

अभीवर्तो अभिभवः सपत्नक्षयणो मणिः ।

राष्ट्राय मह्यं बध्यतां सपत्नेभ्यः पराभुवे ।।४।।

उदसौ सूर्यो अगादुदिदं मामकं वचः।

यथाहं शत्रुहोऽसान्यसपत्नः सपत्नहा।५।।

सपत्नक्षयणो वृषाभिराष्ट्रो विषासहिः ।

यथाहमेषां वीराणां विराजानि जनस्य च ।।६।।

पृथिवीसूक्तम्

पदपाठः- असम्ऽबाधम्। मध्यतः। मानवानाम्। यस्याः। उत्ऽवतः। प्रऽवतः। समम् बहु।। नानांऽवीर्याः। ओषधीः। या। बिभर्ति। पृथिवी नः। प्रथताम्। राध्यताम् नः।।2।।

अन्वयः- यस्याः बहु उद्वतः प्रवतः समं मानवानां मध्यतः असम्बाधं याः नानावीर्याः ओषधीः बिभर्ति, पृथिवी नः प्रथताम, नः राध्यताम्।

सरलार्थः- या अबद्धापि मानवान् बध्नाति, यस्याः भूमिः वैचित्रपूर्णा, या बहुशक्ति सम्पन्नौषधिवृक्षान् धारयति, सा पृथिवी अस्माकं समीपे विस्तीर्णा भवतु, अस्माकं कृते पुष्पैः शोभिता भवतु।

व्याकरणम्

प्रथताम्- प्रथ्-धातोः लोटि प्रथमपुरुषैकवचने।

राध्यताम- राध्-धातोः लोटि प्रथमपुरुषैकवचने।

नानावीर्याः- नाना वीर्याणि यासां ताः इति बहुव्रीहिसमासः।

बिभर्ति- भृ-धातोः लटि प्रथमपुरुषैकवचने।

पदपाठः- यस्याम्। समुद्रः। उत। सिन्धुः। आपः। यस्यम् अन्नम् कृष्टयः।

सम्ऽबभूवुः।। यस्याम्। इदम्। जिन्नति। प्राणत्। एजेत्। सा। नः। भूमिः। पूर्वऽपेयें। दधातु।।३ ।।

अन्वयः- यस्यां समुद्रः सिन्धुः उत आपः, यस्याम् अन्नं कृष्टयः सम्बभूवुः, यस्याम् इदं प्राणत् । एजत् जिन्नति, सा भूमिः नः पूर्वपेये दधातु।

सरलार्थः- यत्र समुद्राः नद्यः जलानि सन्ति, यत्र शस्यादयः कर्षणकारिणः मानवाः सम्भूताः भवन्ति, यत्र प्राणशीलाः गतिशीलाः(कम्पनशीलाः) जीवन्ति, सा भूमिः अस्मान् प्रथमपानसदृशे आनन्दे प्रस्थापयतु।

व्याकरणम्

सम्बभूवुः- सम्पूर्वकात् भू-धातोः लिटि प्रथमपुरुषबहुवचने।

प्राणत्- प्रपूर्वकात् अन्-धातोः शतृप्रत्यये।

एजत्- एज्-धातोः शतप्रत्यये।

जिन्नति- जिन्द्-धातोः लटि प्रथमपुरुषैकवचने।

दधातु- धा-धातोः लोटि प्रथमपुरुषैकवचने।

यस्याश्चतस्त्रः प्रदिशः पृथिव्याः

यस्यामन्नं कृष्टय: संबभूवु:।

या बिभर्ति बहुधा प्रणदेजत्

सा नो भूमिर्गोष्वप्यन्ने दधातु।।४।।

पदपाठ:- यस्या:। चर्तस्र:। पृऽदिश:। पृथिव्या:। यस्याम्। अन्नम्। कृष्टय:। सम्ऽबभूवु:।। या। बिभर्ति। बहुऽधा। प्राणत्। एजंत्। सा। न:। भूमि:। गोषु अपि अन् दधातु।।४।।

अन्नय:- यस्या: पृथिव्या: चतस्र: प्रदिश:, यस्याम् अन्नं कृष्टय: सम्बभूवु:, या प्राणत् एजत् बहुधा बिभर्ति, मा भूमि: न: गोषु अपि अन्नेषु दधातु।

सरलार्थ:- यस्या: पृथिव्या: चतस्र: दिश: सन्ति, यस्यां पृथिव्याम् शस्यानि उत्पन्नानि मनुष्याश्च उत्पन्ना:, या पृथिवी प्राणशीलान् गतिशीलान्(कम्पशीलान्) च विविधप्रकारेण धारयति, सा पृथिवी अस्मान् गवादिपशुषु शस्ये च प्रस्थापयतु।

व्याकरणम्

कृष्टय:- कृष्-धातो: भावे क्तिन्प्रत्यये प्रथमाबहुवचने रूपम्।

संबभूवु:- सम्पूर्वकभू-धातो: लिटि प्रथमपुरुषबहुवचने।

यस्य पूर्वे पूर्वजना विचक्रिरे

यस्य देवा असुरानभ्यवर्तयन्।

गवामश्वानां वयसश्च विष्ठा

भगं वर्च: पृथिवी नो दधातु।।५।।

पदपाठ:- यस्याम्। पूर्वं पूर्वऽजना:। विचक्रिरे। यस्यम्। देवा:। असुरान्। अभिऽअर्वर्तयन्। गवांम्। अश्वानाम्। वयस:। च। विऽस्था। भर्गम् वर्च:। पृथिवी। न:। दधातु।।५।।

अन्वय:- यस्यां पूर्वे पूर्वजना: विचक्रिरे यस्यां देवा: असुरान् अभ्यवर्तयन्। पृथिवी गवाम् । अश्वानां वयस: च विष्ठा, न भगं वर्च: दधातु।

सरलार्थ:- यस्यां पृथिव्यां पूर्वजा: विविधकर्माणि अकुर्वन्, यस्यां पृथिव्यां देवा: असुरान् पराजीतवन्त:, या पृथिवी गवादीनां विचित्रम् आश्रयस्थानम्, सा पृथिवी अस्मभ्यम् ऐश्वर्यं तेजश्च प्रयच्छतु।

व्याकरणम्

विचक्रिरे- विपूर्वकात् कृ-धातो: लिटि प्रथमपुरुषबहुवचने।

अभ्यवर्तयन्- अभिपूर्वकात् वृ-धातो: णिचि लङि प्रथमपुरुषबहुवचने।

विष्ठा- विपूर्वकात् स्था-धातो: कप्रत्यये।

विश्वंभरा वसुधानी प्रतिष्ठा

हिरण्यवक्षा जगतो निवेशनी।

वैश्वानरं बिभ्रती भूमिरग्नि

मिन्द्रऋषभ द्रविणे नो दधातु।।६ ।।

पदपाठ:- विश्वम्भरा। वसुऽधानी। प्रतिऽस्था। हिरण्यऽवक्षा। जगत:। निवेशनी।।

वैश्वानरम्। बिभ्रती। भूमि:। अग्निम्। इन्द्रंऽऋषभा। द्रविणे। न:। दधातु।।६ ।।

अन्वय:- विश्वंभरा, वसुधानी, प्रतिष्ठा, हिरण्यवक्षा, जगत: निवेशनी, इन्द्रऋषभा भूमि: वैश्वानरम् अग्नि बिभ्रती न: द्रविणे दधातु।।

सरलार्थ:-विश्वस्य भरणपोषणकारिका, धनस्य धारिका, समेषाम् आश्रयस्थानं, हृदये सुवर्णधारिका, जगत: निवासस्थानम् अथवा जगति उत्पन्नानां प्राणिनाम् शैथिल्यदान-कारिका, इन्द्रेण रक्षिता पृथिवी वैश्वानरं धारयन्ती अस्मान् धने प्रस्थापयतु।

व्याकरणम्

विश्वम्भरा- विश्वं भरतीति या सा विश्वम्भरा।

वसुधानी- वसूपपदात् धा-धातो: ल्युटि डीपि।

हिरण्यवक्षा- हिरण्यं वक्षे यस्या: सेति बहुव्रीहि:।

निवेशनी- न्युपपदात् विश्-धातोः ल्युटि डीपि।

विभ्रती- विपूर्वकभृ-धातोः शतृप्रत्यये डीपि।।

इन्द्रऋषभा- इन्द्रः ऋषभः यस्याः सा इति बहुव्रीहिः।

यां रक्षन्त्यस्यूप्ना विश्वदानीं

देवा भूमि पृथिवीमप्रमादम्।

सा नो मधु प्रियं दुहा

मथो उक्षतु वर्चसा।।७।।

पदपाठः- याम्। रक्षन्ति। अस्वप्नाः। विश्वऽदानीम्। देवाः। भूमिम्। पृथिवीम्।
अप्रऽमादम्।। सा। नः। मधु प्रियम्। दुहाम्। अथो इति। उक्षतु। वर्चसा।।७।।

अन्वयः- यां पृथिवी भूमिम् अस्वप्नाः देवाः विश्वदानीम् अप्रमादं रक्षन्ति सा (पृथिवी) नः प्रियं मधु दुहाम् अथो वर्चसा उक्षतु।

सरलार्थः-निद्राविहीनाः देवाः प्रमादरहिताः सन्तः यां विस्तृतां पृथिवीं रक्षयन्ति सैव पृथिवी । मधु क्षरतु किञ्च तेजः प्रसारयतु।

व्याकरणम्

रक्षन्ति- रक्ष्-धातोः लटि प्रथमपुरुषबहुवचने।

विश्वदानीम्- विश्वोपपदात् धा-धातोः ल्युटि डीपि।।

दुहाम्- आत्मनेपदिनः दुह्-धातोः लोटि प्रथमपुरुषैकवचने। ।

उक्षतु- उक्ष्-धातोः लोटि प्रथमपुरुषैकवचने।

यार्णवेऽधि सलिलमग्र आसीत्

यां याव्रिचरन् मनीषिणः।

यस्या हृदयं परमे व्योऽमन्

सत्येनावृतममृतं पृथिव्याः।

सा नो भूमिस्त्विर्षि बलं

राष्ट्रे दधातूत्तमे।।८।।

।।पृथिवीसूक्तम्।।

पदपाठः-या। अर्णवे। अधि सलिलम्। अग्रे। आसीत्। याम्। मायाभिः। अनुऽअर्च-रन्। मनीषिणः।। यस्याः । हृदयम्। परमे। विऽओमन्। सत्येन। आऽवृतम्। अमृतम् पृथिव्याः।। सा। नः। भूमिः। त्विषिम्। बलम्। राष्ट्रे। दधातु। उत्ऽतमे।।८।।

अन्वयः- या अग्रे अर्णवे सलिलम् अधि आसीत् यां मनीषिणः मायाभिः अन्वचरन्, यस्याः पृथिव्याः सत्येन आवृतम्, अमृतं हृदयं परमे व्योमन् सा भूमिः न बलं उत्तमे राष्ट्रे दधातु।।

सरलार्थः-या पृथिवी आदौ समुद्रमध्ये स्थिता आसीत्, मनीषिणः यां बुद्ध्या प्राप्नु-वन्ति, यस्याः पृथिव्याः अमृतहृदयं सत्येनावृतं सा पृथिवी अस्मान् उत्तमराष्ट्रे प्रस्थापयतु अथवा सा भूमिः अस्मभ्यम् उत्तमराष्ट्रार्थं तेजः शक्तिं च प्रयच्छतु।

व्याकरणम्

अन्वचरन्- अनूपपदात् चर्धातोः लङि प्रथमपुरुषबहुवचने।

व्योमन्- व्योम्नि इत्यस्य वैदिकं रूपमिदम्।

यस्यामापः परिचराः समानी

रहोरात्रे अप्रमादं क्षरन्ति।

सा नो भूमिभूरिंधारा पयों

दुहामथों उक्षतु वर्चसा।।९।।

पदपाठः- यस्याम्। आपः। परिऽचराः। सनीः । अहोरात्रे इति। अप्रेऽमादम्। क्षन्ति। सा। नः। भूमिः। भूरिऽधारा। पयः। दुहाम्। अथ इति उक्षतु। वर्चसा।।९।।

अन्वयः- यस्यां परिचरा आपः समानी अहोरात्रे अप्रमादं क्षरन्ति। भूरिधारा सा भूमिः नः पयः दुहाम् अथो वर्चसा उक्षतु।

सरलार्थः- यस्यां पृथिव्यां चतुर्दिक्षु विचरन्ति जलानि दिवसे रात्रौ च बाधराहित्येन प्रवहन्ति। एवं बहुधारासम्पन्ना पृथिवी अस्मभ्यं दुग्धं(जल) प्रयच्छतु अथवा सा पृथिवी अस्माकं कृते बहुधारया दुग्धं दोग्धु किञ्च तेजसा अभिषिञ्चतु।

व्याकरणम्

अहोरात्रे - अहश्च रात्रिश्च इति द्वन्द्वसमासस्य द्विवचनान्तं रूपम्।

क्षरन्ति - क्षर् इति अर्थकात् लटि प्रथमपुरुषस्य एकवचने रूपम्।

दुहाम् - दुह्-धातोः लोट्लकारस्य प्रथमपुरुषस्य एकवचने वैदिकं रूपम्।

यामश्विनावमिमा विष्णुर्यस्यां विचक्रमे।

इन्द्रो यो चक्र आत्मनेऽनमित्रां शचीपतिः।

सा न भूमिर्वि सृजतां माता पुत्राय मे पयः।।१०।।

पदपाठः- याम्। अश्विनौ। अमिमाताम्। विष्णुः। यस्याम्। विऽचक्रमे। इन्द्रः। याम्।

चक्रे। आत्मने। अनमित्राम्। शचीऽपतिः। सा। नः। भूमिः। वि। सृजताम्। मता। पुत्राय। मे। पयः।।१०।।

अन्वयः- याम् अश्विनौ अभिमाताम्, यस्यां विष्णुः विचक्रमे, यां शचीपतिः इन्द्र आत्मने अनमित्रां चक्रे, नः सा पृथिवी माता ते पुत्राय पयः विसृजताम्।।

सरलार्थः- यस्याः पृथिव्याः अश्विनौ परिमापं चक्रतुः, यस्यां विष्णुः पादन्यासं चकार, यां शचीपतिः इन्द्रः स्वस्य कृते अशत्रूकृतवान्, सैव अस्माकं पृथिवीमाता अस्मभ्यं दुग्धं प्रयच्छतु।

व्याकरणम्

अभिमाताम्- अभ्युपसर्गात् मा-धातोः लङि प्रथमपुरुषद्विवचने।

विचक्रमे- व्युपसर्गात् क्रम्-धातोः लिटि प्रथमपुरुषैकवचने।

चक्रे- आत्मनेपदिनः कृ-धातोः लिटि प्रथमपुरुषैकवचने।

वि सृजताम्- व्युपसर्गात् सृज्-धातोः लोटि प्रथमपुरुषैकवचने।

पाठगतप्रश्नः

१. पृथिवीसूक्तस्य कः ऋषिः का च देवता।

२. के पृथिवीं धारयन्ति।

३. पृथिवी कान् धारयति।

४. ऋतम् इति रूपं कथं सिद्ध्येत्।

५. पृथिव्याः कति दिशः।

६. जिघ्रति इति रूपं कथं सिद्ध्येत्।

७. कीदृशी पृथिवी ऐश्वर्यं तेजश्च प्रयच्छतु।

८. विश्वंभरा इति शब्दस्य कः अर्थः।

९. वसुधानी शब्दस्य कः अर्थः।

१०. हिरण्यवक्षा इत्यस्य विग्रहं समासं च लिखत।

११. इन्द्रऋषभा इत्यस्य विग्रहं समासं च लिखत।

१२. अस्वप्नाः इत्यस्य कः अर्थः।

१३. दुहाम् इति रूपं कस्मिन् लकारे।

१४. उक्षतु इति रूपं कथं सिद्ध्येत्

१५. कः शचीपतिः।

गिरयस्ते पर्वता हिमवन्तोऽरण्यं ते पृथिवि स्नमस्तु।
बभ्रुं कृष्णां रोहिणीं विश्वरूपां ध्रुवां भूमि पृथिवीमिन्द्रगुप्ताम्।
अजीतोऽहं अक्षतोऽध्यष्ठां पृथिवीमहम् ।।११।।

पदपाठः- गिरयः। ते। पर्वताः। हिमऽवन्तः। अरण्यम्। ते। पृथिवि। स्योनम्। अस्तु। ब्रभ्रुम्। कृष्णाम्। रोहिणीम्। विश्वऽपाम्। ध्रुवाम्। भूमिम्। पृथिवीम्। इन्द्रऽगुप्ताम्।।

अजीतः। अहंतः। अतः। अधि। अस्थम्। पृथिवीम्। अहम् ।।११।।

अन्वयः- पृथिवि ते गिरयः हिमवन्तः पर्वताः ते अरण्यं स्योनम् अस्तु। बभ्रुं कृष्णां रोहिणीं विश्वरूपां ध्रुवां इन्द्रगुप्तां भूमिं पृथिवीम् अहम् अजीतः अहतः अधि अस्थाम्।

सरलार्थः-हे पृथिवि तव गिरयः हिमावृताः पर्वताश्च कल्याणकारिणः, किञ्च तव वनानि कल्याणकारकाणि सन्तु। बभ्रवादिरूपविशिष्टा स्थिरा इन्द्रेण रक्षिता सुविस्तृता पृथिवी अपराजिता अहिंसिता नाशरहिता भवन्ती प्रतिष्ठतु।

व्याकरणम्

अजीतः- जि-धातोः क्तप्रत्यये जीतः इति रूपम् ततः न जीतः अजीतः इति नञ्तत्पुरुषसमासः।

अहतः- हन्-धातोः क्तप्रत्यये हतः इति रूपम् न हतः अहतः इति नञ्तत्पुरुषसमासः।

अक्षतः- क्षत्-धातोः क्तप्रत्यये क्षतः इति रूपम् न क्षतः अक्षतः इति नञ्तत्पुरुषसमासः।

अधि अस्थाम्- अध्युपसर्गात् स्थाधातो लङि उत्तमपुरुषैकवचने।

यत् ते मध्यं पृथिवि यच्च नभ्यं यास्त ऊर्जस्तन्वऽः संबभूवुः। तासुनो

धेह्यभि नः पवस्व मूता भूमिः पुत्रो अहं पृथिव्याः। पर्जन्यः पिता स उ नः पिपर्तु।।१२।।

पदपाठः- यत्। ते। मध्यम्। पृथिवि यत्। च। नभ्यम्। याः। ते। उर्जः। तन्वऽः। सम्ऽबभूवुः।। तासु नः। धेहि। अभि। नः। पवस्व। मृता। भूमिः।। पुत्रः। अहम्। पृथिव्याः।। पर्जन्यः। पिता। सः। ॐ इति। नः। पिपर्तु।।१२।।

अन्वय:- पृथिवि यत्, ते मध्यं, यत् नभ्यं च, या ते तन्व: ऊर्ज: संबभूवु: तासु न: धेहि, न: अभि पवस्व, भूमि: माता, अहं पृथिव्या: पुत्र:, पर्जन्य: पिता। स: न: पिपर्तु।।

सरलार्थ:- हे पृथिवि तव य: मध्यभाग: अस्ति, यत् नाभिक्षेत्रं, किञ्च य: तव शरीरात् उत्पन्न: रस: तेषु सर्वेषु अस्मान् धारयतु। अस्मान् पवित्रीकुरु। भूमि: माता अस्ति, अहं पृथिव्या: पुत्र: अस्मि, पर्जन्य: पिता अस्ति, स: अस्माकं पालनपोषणं करोतु।

व्याकरणम्

धेहि- धा-धातो: लोटि मध्यमपुरुषैकवचने।

पवस्व- पू-धातो: लोटि मध्यमपुरुषैकवचने।

पिपर्तु- पृ-धातो: प्रथमपुरुषैकवचने।

यस्यां वेदिं परिगृह्णन्ति भूम्यां यस्यां यज्ञं तुन्नते विश्वकर्माण:।।

यस्यां मीयन्ते स्वरव: पृथिव्यामूर्ध्वा: शुक्रा आहत्या: पुरस्तात् सा नो

भूमिर्वर्धयद् वर्धमाना।।१ ३ ।।

पदपाठ:- यस्यां वेदिं परिऽगृह्णन्ति भूम्यां यस्यां यज्ञं तन्नतें विश्वकर्माण:।

यस्यां मीयन्ते स्वरव:। पृथिव्यामूर्ध्वा:। शुक्रा।आहुत्या:। पुरस्तात्। सा। नो। भूमिर्वर्धयद् वर्धमाना।।१ ३ ।।

अन्वय:- यस्यां भूम्यां वेदिं परिगृह्णन्ति, विश्वकर्माण: यस्यां यज्ञं तन्नते, यस्यां पृथिव्याम् आहुत्या: पुरस्तात् ऊर्ध्वा: शुक्रा: स्वरव: मीयन्ते, सा भूमि: वर्धमाना न: वर्धयत्।

सरलार्थ:-यस्यां पृथिव्यां देवा: वेदिनिर्माणं कुर्वन्ति, यस्यां यज्ञं सम्पादयन्ति, किञ्च यस्याम् आहुतिदानात् पूर्वं प्रकाशमानयज्ञीययूपं मीयन्ते, सा भूमि: वर्धयन्ती अस्मान् वर्धयतु।

व्याकरणम्

परिगृह्णन्ति- पर्युपसर्गात् ग्रह्-धातो: लटि प्रथमपुरुषबहुवचने।

तन्नते- आत्मनेपदिन: तन्-धातो: लटि प्रथमपुरुषबहुवचने।

मीयन्ते- आत्मनेपदिन: मा-धातो: लटि प्रथमपुरुषबहुवचने।

वर्धयत्- वृध्-धातोः लोटि प्रथमपुरुषैकवचने।

वर्धमाना- वृध्-धातोः शानचि टापि प्रथमैकवचने।

यो नो द्वेषत् पृथिवि यः पृतन्याद्योऽभिदासान मर्न यो वधेन तं नो भूमे रन्धय पूर्वकृत्वरि।।१४।।

पदपाठः- यः। नः। द्वेषत् पृथिवि। यः। अभिऽदासांत्। मनसा। यः। वधेन तम्। नः। भूमे। रन्धय। पूर्वऽकृत्वरि।।१४।।

अन्वयः- (हे) पृथिवि यः नः द्वेषत् यः पृतन्यात् यः मनसा यः वर्धन अभिदासात् (हे) भूमे (हे) पूर्वकृत्वरि, तं नः रन्धय।

सरलार्थः- हे पृथिवि यः अस्मान् द्वेष्टि, यः युद्धं करोति, यः मनसा तथा शस्त्रेण दमनं करोति, हे पूर्वकृत्वरि तं त्वं नाशय।

व्याकरणम्

द्वेषत्- द्विष्-धातोः लोट्ल कारस्य प्रथमपुरुषस्य एकवचने रूपम्।

पृतन्यात्- पृतन्य इति नामधातोः लेट्-लकारस्य प्रथमपुरुषस्य एकवचने रूपम्।

अभिदासात्- अभि इति उपपदपूर्वकात् दस्-धातोः लोट्-लकारस्य प्रथमपुरुषस्य एकवचने रूपम्।

रन्धय . रन्ध-धातोः णिजन्तात् लोट्लकारस्य रूपम्।

त्वज्जूतास्त्वयि चरन्ति मर्त्यास्त्वं बिभर्षि द्विपदस्त्वं चतुष्पदः। तवेमे

पृथिवि पञ्च मानवा येभ्यो ज्योतिरमृतं मर्त्येभ्य उद्यन्त्सूर्यो रश्मिभिरातुनोति।।१५।।

पदपाठः- त्वत्। जूताः। त्वयि चरन्ति। मर्त्यः। त्वम्। बिभर्पि। द्विऽपदः। त्वम्।

चतुःऽपदः।। तवा इमे। पृथिवि। पञ्च मानवाः। येभ्यः। ज्योतिः। अमृतम्।

मर्येभ्यः।। उत्ऽयन्। सूर्यः। रश्मिऽभिः। आऽतुनोति ।।१५।।

अन्वय:- त्वत् जाता मर्या: त्वयि चरन्ति, त्वं द्विपद: त्वं चतुष्पद: बिभर्षि। पृथिवि इमे मानवा: येभ्य: मर्येभ्य: उद्यन् सूर्य: रश्मिभि: अमृतम् आतनोति।

सरलार्थ:- त्वत्त: जाता: प्राणिन: त्वयि एव विचरन्ति, त्वं पादद्वयधारिणं किञ्च पादचतुष्टयधारिणं धारयसि। हे पृथिवि सर्वे मनुष्या: तव, येषां कृते उद्यन् सूर्य: स्वकिरणेन अमृततुल्यं प्रकाशं प्रसारयति।

व्याकरणम्

बिभर्षि- भृ-धातो: लटि प्रथमपुरुषैकवचने।

आतनोति- आपूर्वकन्-धातो: लटि प्रथमपुरुषैकवचने।

ता न: प्रजा: सं दुह्रता समूग्रा वचो मधु पृथिवि धेहि मह्यम्।।१६।।

पदपाठ:- ता:। न:। प्रऽजा:। सम्। दुह्रताम्। सम्ऽअग्रा:। वच:। मधु: पृथिवा धेहि। मह्यम्।।१६।।

अन्वय:- ता: समग्रा: प्रजा: न: सं दुह्रताम् (हे) पृथिवि मह्यं वाच: मधु धेहि।

सरलार्थ:- ते समग्रप्राणिन: अस्मभ्यं सम्यक् सुखं प्रयच्छन्तु। हे पृथिवि वाच: मधुरतां अस्मभ्यं प्रयच्छतु।

व्याकरणम्

दुह्रताम्- दुह्-धातो: लोट्लकारस्य रूपम् इदम्

धेहि- धा-धातो: लोट-लकारस्य रूपम् इदम्।

विश्वस्वंऽ मातरमोषधीनां ध्रुवां भूमि पृथिवीं धर्मणा धृताम्। शिवां स्योनामनु चरेम विश्वहा।।१७।।

पदपाठ:-विश्वऽस्वम्। मातरम्। ओषधीनाम्। ध्रुवाम्। भूमिम्। पृथिवीम्। धर्मणा।

धृताम्। शिवाम्। स्योनाम्। अनु। चरेम। विश्वहा।।१७।।

अन्वय:- विश्वस्वम् ओषधीनां मातरं ध्रुवां, पृथिवीं धर्मणा धृतां भूमिं (वयं) विश्वहा अनु चरेम।

सरलार्थः-सर्वेषाम् उत्पन्नकारिकायाः, औषधीनां मातुः, दृढायाः, प्रशस्तायाः किञ्च धर्मेण धृतायाः, कल्याणकारिकायाः, सुखदानकारिकायाः पृथिव्याः उपरि वयं सर्वदा विचरामः।।

व्याकरणम्

विश्वसम्- विश्वस् इति प्रातिपदिकस्य द्वितीयायाः एकवचने रूपम्।

अनुचरेम- अनु इति उपसर्गपूर्वकात् चर्-धातोः लोट्लकारस्य उत्तमपुरुषस्य बहुवचने रूपम्।

महत्सधस्थं महती बभूविथ महान् वेग एजथुर्वेपथुष्टे।

महांस्त्वेन्द्रों रक्षत्यप्रमादम्।

सा नो भूमे प्र रोचय हिरण्यस्येव संदृशि मा नो द्विक्षत कश्चन।।१८।।

पदपाठः- महत्। सधऽस्थम्। महती। बभूविथ। महान्। वेगः। एजथुः। वेपथुः। ते।।

महान्। त्व। इन्द्रः। रक्षति। अप्रेऽमादम्। सा। नः। भूमे। प्र। रोचय। हिरण्यस्यऽइवा सम्ऽदृशि मा। नः। द्विक्षत। कः। चन।।१८।।

अन्वयः-(हे पृथिवि) महती(त्वं) महत् सधस्थं बभूविथ, ते महान् वेगः, एजथुः वेपथुः च। महान् इन्द्रः त्वा अप्रमादं रक्षति। हे भूमे सा (त्वं) संदृशि नः हिरण्यस्येव प्र रोचयः, नः कश्चन मा द्विक्षत।

सरलार्थः- हे पृथिवि त्वं महत् निवासस्थलम्, तव वेगः महान्, कम्पनं च महत्, किञ्च महान् इन्द्रः सावधानेन त्वां रक्षति। एवंभूते हे पृथिवि त्वम् एवम् अस्मान् रुचिविषयान् कुरु यथा सुवर्णः रुचिकरः भवति। कश्चिदपि अस्मान् प्रति न द्वेषं कुर्यात्।

व्याकरणम्

बभूविथ- भू-धातोः लिटि मध्यमपुरुषैकवचने।

एजथुः- एज्-धातोः लिटि मध्यमपुरुषद्विवचने।

वेपथुः- विप्-धातोः लिटि मध्यमपुरुषद्विवचने।

रक्षति- रक्ष्-धातोः लिटि प्रथमपुरुषैकवचने।

रोचय- रुच्-धातोः लोटि मध्यमपुरुषैकवचने।

अग्निभूम्यामोषधीष्वग्निमापोबिभ्रत्यग्निरश्मसु।अग्निरन्तःपुरुषेषु गोष्वश्वेष्वग्नयः।।१९।।

पदपाठः- अग्निः। भूम्यांम्। ओषधीषु। अग्निम्। आपः। बिभ्रति। अग्निः।

अश्मऽसु।। अग्निः। अन्तः। पुरुषेषु। गोषु। अश्वेषु। अग्नयः।।१९।।

अन्वयः-भूम्याम् अग्निः, औषधीषु आपः अग्निं बिभ्रति, अग्निः अश्मसु पुरुषेषु अन्तः अग्नयः, गोषु अश्वेषु।

सरलार्थः-अग्निः भूमौ अस्ति, जलम् अग्निं धारयति किञ्च प्रस्तरे अपि अग्निः अस्ति, पुरुषेषु जठराग्निः अस्ति। किञ्च गोषु अश्वेषु अपि अग्निः अस्ति।

व्याकरणम्

अग्निर्दिव आ तपत्यग्नेर्देवस्योर्वन्तरिक्षम्।अग्निं मर्तास इन्धते हव्यवाह घृतप्रियम्।।२०।।

पदपाठः- अग्निः। दिवः। आ। तपति। अग्नेः। देवस्य उरु। अन्तरिक्षम्। अग्निम् मर्तासः। इन्धते। हव्यवाहं घृतऽप्रियम्।।२०।।

अन्वयः- अग्निः दिवः आतपति, देवस्य अग्नेः उरु अन्तरिक्षम् अन्तरिक्षं मर्तासः अग्निम् इन्धते हव्यवाहं घृतप्रियम्।

सरलार्थः- सूर्यदेवः स्वर्गे तपति। एतत् महत् अन्तरिक्षमण्डलमपि अग्निः एव, मरणशीलाः प्राणिनः अग्निमेव प्रज्वालयन्ति।

व्याकरणम्

आतपति -आङ् इति उपसर्गपूर्वकात् तप्-धातोः लट्लकारस्य रूपम्

उरु- प्रचुरार्थे वेदे उरुशब्दस्य प्रयोगः भवति।

इन्धते - इन्ध-धातोः लट्-लकारस्य प्रथमपुरुषस्य एकवचने रूपम्।

हव्यवाहम्- हव्यं वहति यः स इति हव्यवाहः, तम् इति उपपदतत्पुरुषः।

पाठगतप्रश्नः

१६. स्योनम् इत्यस्य कः अर्थः।।

१७. जि-धातोः त्तप्रत्यये किं रूपम्।

१८. भूमिः का अस्ति।

१९. अहं पृथिव्याः कः अस्मि।

२०. तन्वते इति रूपं कस्यधातोः।

२१. धेहि इति कस्मिन् लकारे।

२२. एजतुः इति रूपं कथं सिद्ध्येत्।

२३. वेपथुः इति रूपं कस्यधातोः।

२४. अग्निः क्व अस्ति।

२५. रोचय इति रूपं कस्मिन् लकारे।

२५.३) पृथिवीसूक्तस्य सारः

वैदिकानाम् ऋषीणां मनसि सर्वदा परमतत्त्वस्य एव स्फुरणं, तत्र एव तेषां रमणम् इति नास्ति। तेषां मनसि अपि विद्यन्ते अलौकिकसौन्दर्यभावनाः नैसर्गिकप्रीतिः च। याः प्रीतिभावनाः तान् प्रेरयन्ति रस-भावमयेषु विषयेषु। तादृशस्य सौन्दर्यसंस्कृतस्य भावस्य वर्णना अथर्ववेदस्य भूमिसूक्ते अस्ति। अथर्ववेदीयं पृथिवीसूक्तं न केवलं वैदिकानाम् ऋषीणां प्रगाढज्ञानस्य निदर्शनम् अपि तु सौन्दर्यभावनायाः सहृदयतायाः च चरम निदर्शनम्।

इदं सुत्तम् अथर्ववेदस्य द्वादशकाण्डे अन्तर्भवति। एतादृशी भावसौन्दर्यसमृद्धा रचना वैदिकसाहित्येषु दुर्लभा। अत्र ऋषिः अथर्वा तस्य पृथिवीविषयकं हृद्गतं प्रेमभावं प्रदर्शयति।

विचित्ररूपवती अस्माकं पृथिविमाता। सा हि अस्माकं चिरपरिचिता मृन्मयी मूर्तिः। तया साकं अस्माकं योगः नाडीगतः। तस्याः एव अङ्के अस्माकं जन्म मरणं च अत्रैव। तस्मादेव सा देवतारूपेण कल्पिता वैदिकैः ऋषिभिः। तस्याः महिमानं वर्णयितुं वैदिककवयः धौर्यसीमानम् अतिक्राम्यन्ति। जनन्या धरिया सह द्युलोकस्य अपि प्रार्थनायां रताः ऋषयः, यतो हि द्युलोकः अस्माकं पितृतुल्यः। तस्याः च पत्नीरूपा हि पृथिवी इति भावना ऋषीणां सूक्ष्मबुद्धिगोचरा। तथाहि आम्नातम् ऋग्वेदे

द्यौः पितः पृथिवि मातरधुग् अग्ने भ्रातर्वसवो मृलत नः। इति।(ऋ.६.५१.५)

द्युलोकं पृथिवीलोकं च जनकजननीरूपेण पश्यन्ति वैदिककवयः। तयोः मेलनेनैव सृष्टिः। तयोः मध्ये अविनाभावसम्बन्धः अस्ति यथा अस्ति पार्वतीपरमेश्वरयोः मध्ये। तमेव अविनाभावसम्बन्धं कल्पयितुं तयोः स्वामीस्त्रीकल्पना। अनन्तकालाद् एव एतौ वर्तमानौ।

तथाहि आम्नातम्- ‘श्धुवा द्यौः ध्रुवा पृथिवी। इति।

तयोः पृथगस्तित्वं नास्ति यतो हि तौ सम्पृत्तौ। अत एव द्युलोकस्य मन्त्रैः पृथक् स्तुतिः न कृता। पृथिवीमातुः एकस्मिन् सूक्ते एव त्रिभिः ऋग्म-त्रभिः स्तुतिः कृता। परन्तु तेषां स्तुतिः पृथक् रूपेण नास्ति इति हेतोः वैदिकर्षयः तेषां स्तुतौ उदासीनाः आसन् इति अपि न चिन्तनीयम् ते प्रसिद्धदेवतावन्दनया सह एव मऽयानाम् अपि पृथिवीप्रभृतीनां देवानां स्तुतिं कृतवन्तः।।

तेषां दृष्टौ पृथिवी विस्तीर्णा, महती, जगतः सुखदायिनी, घृतवती, पयस्वती, यज्ञवती च अस्ति। ते पृथिव्याः मातृरूपवर्णनायां सर्वदा मुखराः सन्ति। मनुष्याणां जीवनदशायां मरणदशायां च एकमात्रम् आश्रयः पृथिवी जीवानां जननीस्वरूपा। वैदिकाः ऋषयः एतां पृथिवीं जननीरूपेण पूजयन्ति।

ऋग्वेदीयानाम् ऋषीणां पृथिवीविषयिणी या भावना बीजरूपेण लुकायिता आसीत् तस्य बीजस्य अङ्कुरोद्गमः अथर्ववेदस्य पृथिवीसूक्ते अभवत्। अत्र हि त्रयषष्टिः मन्त्राः सन्ति। येषु दार्शनिकभावनायाः प्रवाहः दृश्यते। न केवलं दार्शनिकभावनायाः अपि तु तया सम्मिलितायाः प्रकृतिप्रेमभावनायाः अपि सम्यक् अङ्कुरोद्गमः अत्र जातः। ऋषेः अथर्वणः दृष्टौ पृथिवी महिममयी भूतभविष्यत्कालस्य च नियन्त्री। सत्यं, बृहत्, ऋतम्, दीक्षा, उग्रतपस्या, ब्रह्म, यज्ञश्च तस्याः धारकाः। तथाहि आम्नातं पृथिवीसूक्ते सत्यं बृहदृतमुग्रं दीक्षा तपो ब्रह्म यज्ञः पृथिवीं धारयन्ती।। इति।(अ.वे.१२.१.१)

विचित्ररूपिणी अस्माकं पृथिवीमाता। तस्याः कुत्रचित् समतलं, कुत्रचित् च बन्धुरभूमिः। अत्र विद्यन्ते नदी-पर्वत-समुद्र-उर्वरभूमयः विचित्रधर्मिनः प्राणिनः च। फलप्रदायकस्य ओषधिवृक्षस्य सा एव आधाररूपा। अस्माकं प्राणान् सा वक्षे बिभर्ति। तथाहि आम्नातं पृथिवीसूक्ते- श्या बिभर्ति बहुधा प्राणद् एजतश्। इति।

सृष्टेः आदितः सा विश्वम्भरा विश्वधात्री च। सा विश्वम्भरा वसुधानी प्रतिष्ठा। तस्याः हिरन्मयवक्षदेशः सर्वेषां जगताम् आश्रयः। तस्याः गर्भ जनिं प्राप्य द्विपद-चतुष्पदप्राणिनः सर्वे तत्रैव विचरन्ति। तथाहि आम्नातं पृथिवीसूक्ते.

तज्जातास्त्वयि चरन्ति मऽयास्त्वं बिभर्षि द्विपदस्त्वं चतुष्पदः। इति। तस्याः हृदयं

परमव्योम्नि सत्येन आवृतम् तथाहि आम्नातं -ष्यस्यां हृदयं परमे व्योमन् सत्येनावृतममृतं पृथिव्या:ष् इति। देवगणसेविता सा पवित्रयज्ञकर्मणां वेदितुल्या। तत्रैव हविष: आहूत्या देवमानवानां मिलनक्षेत्रं रच्यते।

विश्वधात्री जननी पृथिवी सर्वेषां देवगणानां पूज्या। अश्विनीकुमारौ तस्य परिमापकौ। विष्णु: स्वयं तत्र द्वितीयपादं स्थापयामास। वीरश्रेष्ठ: इन्द्र: यस्य रक्षणार्थं सर्वदा नियुक्त:। तस्या: दुग्धसेवनेन विश्वे प्राणिन: पुष्टिमन्त: भवन्ति।

आहहो: कालादेव सा प्राणिनिवहानां जनयित्री धात्री च। कुत्रचित् सा सर्वंसहा कठिना, कुत्रचित् क्षमामयी सा अन्नदात्री, पयस्वती, शान्तिरूपिणी, सुगन्धा च। पर्जन्यदेव: अत्र नित्यं वर्षति। अत: स: कविकल्पनायां पृथिव्या: पति:। मनुष्या: श्रद्धया देवान् उद्दिश्य अत्र एव हवि: प्रददति। तथाहि आम्नातं पृथिवीसूक्ते.

श्भूम्यां देवेभ्यो ददति यज्ञं हव्यं अरंकृतम् (२.१.२२) इति। अस्या: मृत्तिकाया: गन्धेन मुग्ध: कवि: सर्वेषां सार्विकं मङ्गलं प्रार्थयति अनेन मन्त्रेण-श् तेन मा सुरभिं कृणु मा नो द्विक्षत कश्चनश्।। इति।

अस्या: पृथिव्या: वक्षसि जायमानम् आघातं सोढुम् असमर्थ: कवि:। कदाचित् भूम्या: खननं क्रियते चेदपि सा क्षति: शीघ्रमेव पूरणीया इति कवे: प्रार्थना। तथाहि आम्नातं पृथिवीसूक्ते .

श्यत् ते भूमे विखनामि क्षिप्रं तदपि रोहतु।

मा ते मर्म विमृग्वरि मा ते हृदयम् अर्पिषम्' ।। (अ.वे.१२.१.६३) इति। दुष्टशिष्टयो: उभयो: आश्रय: तस्या: क्रोडम् पृथिवीमातु: आश्रयधन्य: कवि: प्रार्थयति हे स्वर्गसखे पृथिवि त्वम् अस्माकम् आश्रयदात्री भव, त्वं सम्पदा श्रिया च भूत्या च अस्माकं पुष्टिं विदधातु। तथाहि आम्नातम् अथर्ववेदीये पृथिवीसूक्ते -

श्सं विदाना दिवा कवे श्रियां मा धेहि भूत्याम्' । इति।। (अ.वे.१२.१.६३) इति शम्

पृथिवीस्वरूपम्

भारतीयपरम्परायाम् अचेतनवस्तूनामपि अधिष्ठात्री देवता अङ्गीकृता। द्युलोको यथा देवानां तथैव पृथिवीलोक: मनुष्याणां मनुष्येतराणां जीवानामपि निवासस्थानम्। अयं तु अचेतन: परन्तु अस्य अधिष्ठाऽया देवतायायं संयुत्त: नियमितश्च। अतो वैदिकसाहित्ये अस्य भूरिशो वन्दना: विधीयन्ते।

अथर्ववेदीयपृथिवीसूक्ते पृथिव्या: महत्त्वं कीर्त्यते। उत्पत्ते: पुरा समुद्रपयसि निमज्ि-

जता आसीत् इयं पृथिवी। विद्वांस: स्वपराक्रमेण इमाम् अवापु:। अस्या: कतिपयक्षेत्राणि जलपूर्णानि कतिपयक्षेत्राणि स्थलानि च। अस्यां भूमिवैचित्र्यमपि लक्ष्यते। अत्र पयोधारा: स्वप्राणिकुलम् आनन्दयन्त: सरसं सावलीलं प्रवहन्ति। अस्य प्रभावेण मनुष्या: यश: धनम् आधिपत्यञ्च लभन्ते। तथाहि आम्नातम् -

ते नो गृणानो महिनी महि श्रव:

क्षत्रं द्यावापृथिवी धासथो बृहत्।

येनाभि कृष्टीस्ततनाम विश्वहा पनाय्यमोजो अस्मे समन्वितम् ।। इति।

माता यथा स्वपुत्रं पय: पाययति तेन तं वर्धयति च तथैव पृथिवी अपि सर्वान् अमृतसमं जलं पाययति तान् सम्यत्तया वर्धयति च। माता यथा स्वपुत्रेषु भेदं न करोति, सर्वान् समानतया स्निहाति एवमेव पृथिवी अपि साध्वसाधुविचारम् अवज्ञाय सर्वान् अन्न-धनादिना पालयति। तस्मात् पृथिव्या: मातृत्वं सर्वत: प्रसिद्धं वेदमन्त्रादिषु। द्यावापृथिव्यो: वर्णनावसरेऽपि अस्या: मातृरूपत्वं प्रस्फुट्यते। तत: आम्नातम् -

उरुव्यचसा महिनी असश्चता

पिता माता च भुवनानि रक्षत:।

सुधृष्टमे वपुषे न रोदसी

पिता यत्सीमभि रूपैरवासयत्।। इति।

ऋग्वेदीये द्यावापृथिवीसूक्ते उच्यते यत् इयं जगत: स्थितिं सम्पाद्य तथा जगच्चक्रस्य विरामहीनां गतिं च विधाय जगत: मातृरूपेण आत्मानं प्रकटितवती। आम्नातञ्च तत्र -

ते हि द्यावापृथिवी विश्वशंभुव

ऋतावरी रजसो धारयत्कवी।

सुजन्मनो धिषणे अन्तरीयते देवो देवी धर्मणा सूर्य: शुचि:।। इति।

एवमेव जगतो मातृरूपेण धात्रीरूपेण पालयित्रीरूपेण च बहुधा सा स्तूयते इति शिवम् ।।

पाठसार

अथर्ववेदसंहितायाः द्वादशकाण्डस्य प्रथमसूक्तस्य भूमिः पृथ्वी वा देवता। अथर्वा ऋषिः। सूक्तेस्मिन् पृथिव्याः भूमेर्वा वैशिष्ट्यं विस्तरेण उपन्यस्तम् अस्ति। ऋषिः अथर्वा ब्रुते यत् सत्यं, बृहत ऋतम, उग्रं, दीक्षा, तपः, यज्ञः, ब्रह्म पृथिवीं धारयन्ति। इयं भूमिः मानवानां मध्ये असम्बाधम् अस्ति। अस्याः उद्वतः प्रवतः समं बहु प्रदेशाः सन्ति। इयमेव नानावीर्याः ओषधीः बिभर्ति। पृथिव्यामेव समुद्रः सिन्धुः आपश्च प्रवहन्ति। पृथिव्यामेव सर्वे जडजंगमाः आनन्दिताः भवन्ति। अस्याः पृथिव्याः चतस्रः प्रदिशः सन्ति। इत्थं विश्वंभरा, वसुधानी, प्रतिष्ठा, हिरण्यवक्षा, जगतः निवेशनी, इन्द्रऋषभा भूमिः वैश्वानरम् अग्निं बिभ्रती अस्मान् द्रविणे दधातु। या पृथिवी प्रलयावस्थायां सृष्टेः प्राक् सलिले निमग्ना आसीत्। मनीषिणः यां पृथिवीं बुद्ध्वा अन्नचरन्। यस्याः पृथिव्याः सत्येन आवृतम् अमृतं हृदयं परमे व्योम्नि प्रतिष्ठितम् अस्ति। यस्यां पृथिव्यां परिचराः समानीः सार्वभौमिकाः आपः अहोरात्रे अप्रमादं क्षरन्ति, सा भूमिधारा भूमिः अस्मान् पयः दुहाम्, तेजसा अभिसिञ्चतु। सा माता भूमिः मे पुत्राय पयः विसृजताम्। भूमिः माता अहं पृथिव्याः पुत्रः अस्मि- माता भूमिः पुत्रो अहं पृथिव्याः।।

अभ्यास प्रश्न

१. पृथिवीसूक्तस्य सारं लिखत।

२. पृथिवीसूक्ते पृथिवी कथं वर्णिता इति प्रतिपादय।

३. पृथिवीसूक्ते अग्निः कथं वर्णितः इति ससूक्तं प्रतिपादय।

४. सत्यं बृहद्ऋतमुग्रम्... इति मन्त्रं व्याख्यात।

५. गिरयस्ते पर्वताः..... इति मन्त्रं व्याख्यात।

६. यस्यां वेदि.... इति मन्त्रं व्याख्यात।

७. यत् ते मध्यम्.......... इति मन्त्रं व्याख्यात।

८. महांस्त्वेन्द्रो... इति मन्त्रं व्याख्यात।

९. त्वज्जाता... इति मन्त्रं व्याख्यात।

१०. यस्याश्चतस्रः .... इति मन्त्रं व्याख्यात।

११. अथर्वा ऋषिः, अग्निः पृथ्वी च देवते।

१२. सत्यं बृहत् ऋतम् उग्रं दीक्षा तपः यज्ञः।

संदर्भ ग्रंथ

- वैदिक सूक्तावली, डॉ. रामदेव साहू, श्याम प्रकाशन, जयपुर, 2006.
- ऋक् सूक्तावलि - डॉ. विश्वनाथ शर्मा, अभिषेक प्रकाशन, जयपुर, 1195.
- वैदिक सूक्त मुक्तावली - डॉ. श्रीकृष्ण ोझा, अभिषेक प्रकाशन, 2005.
- वैदिक साहित्य और संस्कृति -वाचस्पति गैरोला, चौखम्भा प्रकाशन नई दिल्ली, 2003.

❖❖❖

अध्याय : 4

वैदिकसाहित्यम्

श्रीसूक्तम्

ॐ हिरण्यवर्णाम हरिणीं सुवर्णरजतस्रजाम्।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह।।१।।
तां म आवह जातवेदो लक्ष्मीमनपगामिनीम्।
यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम्।।२।।
अश्वपूर्वां रथमध्यां हस्तिनादप्रबोधिनीम्।
श्रियं देवीमुपह्वये श्रीर्मादेवी जुषताम्।।३।।
कांसोस्मितां हिरण्यप्राकारां आद्रां ज्वलन्तीं तृप्तां तर्पयन्तीम्।
पद्मेस्थितां पद्मवर्णां तामिहोपह्वयेश्रियम्।।४।।
चन्द्रां प्रभासां यशसा ज्वलन्तीं श्रियंलोके देव जुष्टामुदाराम्।
तां पद्मिनीमीं शरणमहं प्रपद्येऽलक्ष्मीर्मे नश्यतां त्वां वृणे।।५।।
आदित्यवर्णे तपसोऽधिजातो वनस्पतिस्तववृक्षोथ बिल्वः।
तस्य फलानि तपसानुदन्तु मायान्तरायाश्च बाह्या अलक्ष्मीः।।६।।
उपैतु मां देवसखः कीर्तिश्चमणिना सह।
प्रादुर्भुतो सुराष्ट्रेऽस्मिन् कीर्तिमृध्दिं ददातु मे।।७।।
क्षुत्पपासामलां जेष्ठां अलक्ष्मीं नाशयाम्यहम्।
अभूतिमसमृध्दिं च सर्वानिर्णुद मे गृहात।।८।।
गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्।
ईश्वरी सर्वभूतानां तामिहोपह्वये श्रियम्।।९।।
मनसः काममाकूतिं वाचः सत्यमशीमहि।

पशूनां रूपमन्नस्य मयि श्रीः श्रेयतां यशः।।१०।।
कर्दमेनप्रजाभूता मयिसंभवकर्दम।
श्रियं वासयमेकुले मातरं पद्ममालिनीम्।।११।।
आप स्रजन्तु सिग्धानि चिक्लीत वस मे गृहे।
नि च देवीं मातरं श्रियं वासय मे कुले।।१२।।
आर्द्रां पुष्करिणीं पुष्टि पिङ्गलां पद्ममालिनीम्।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह।।१३।।
आर्द्रां यः करिणीं यष्टीं सुवर्णां हेममालिनीम्।
सूर्यां हिरण्मयीं लक्ष्मी जातवेदो म आवह।।१४।।
तां म आवह जातवेदो लक्ष्मीमनपगामिनीम्।
यस्यां हिरण्यं प्रभूतं गावो दास्योश्वान् विन्देयं पुरुषानहम्।।१५।।
यः शुचिः प्रयतोभूत्वा जुहुयाादाज्यमन्नहम्।
सूक्तं पञ्चदशर्च च श्रीकामः सततं जपेत्।।१६।।
पद्मानने पद्मउरू पद्माक्षि पद्मसंभवे।
तन्मे भजसि पद्मक्षि येन सौख्यं लभाम्यहम्।।१७।।
अश्वदायी गोदायी धनदायी महाधने।
धनं मे लभतां देवि सर्वकामांश्च देहि मे।।१८।।
पद्मानने पद्मविपत्रे पद्मप्रिये पद्मदलायताक्षि।
विश्वप्रिये विष्णुमनोनुकूले त्वत्पादपद्मं मयि संनिधस्त्वं।।१९।।
पुत्रपौत्रं धनंधान्यं हस्ताश्वादिगवेरथम्।
प्रजानां भवसि माता आयुष्मन्तं करोतु मे।।२०।।
धनमग्निर्धनं वायुर्धनं सूर्योधनं वसु।
धनमिन्द्रो बृहस्पतिर्वरूणं धनमस्तु मे।।२१।।
वैनतेय सोमं पिब सोमं पिबतु वृतहा।
सोमं धनस्य सोमिनो मह्यं ददातु सोमिनः।।२२।।

न क्रोधो न च मात्सर्य न लोभो नाशुभामतिः।

भवन्ति कृतपुण्यानां भक्तानां श्रीसूक्तं जपेत्।।२३।।

सरसिजनिलये सरोजहस्ते धवलतरांसुकगन्धमाल्यशोभे।

भगवति हरिवल्लभे मनोज्ञे त्रिभुवनभूतिकरि प्रसीदमह्यम्।।२४।।

विष्णुपत्नीं क्षमां देवी माधवी माधवप्रियाम्।

लक्ष्मीं प्रियसखीं देवीं नमाम्यच्युतवल्लभाम्।।२५।।

महालक्ष्मी च विद्महे विष्णुपत्नी च धीमहि।

तन्नो लक्ष्मीः प्रचोदयात्।।२६।।

श्रीवर्चस्वमायुष्यमारोग्यमाविधाच्छोभमानं महीयते।

धान्यं धनं पशुं बहुपुत्रलाभं शतसंवत्सरं दीर्घमायुः।।२७।।

ॐ शान्तिः शान्तिः शान्तिः ।।

श्री सुक्तमपि श्रीसूक्त नाम्ना ज्ञायते। अतीव लोकप्रियामेका भक्तिरस्ति यया देवी लक्ष्म्ये आमन्त्रणाय श्रावयन्ति। रास्य धन समृद्धिश्च प्रतीकं मन्यते। श्री सूक्तस्य पाठः बहुशः हिन्दुजनानां गृहे सदैवं भवति। श्री सूक्तम् नाम्ना भजनानि ऋग्वेदे प्राप्यते। श्री सूक्तेऽस्मिन् देवीश्रियं नानाविध सार्णवत् किरणैः अलङ्टताः प्रकाशकम् अग्नि, चन्द्रः तथा च सूर्य रूपेण उज्ज्वलतायाः वर्णन कृतमस्ति। सः स्वर्ण पशु अश्वैः तथा भोजन-कपेण प्रसिद्ध पुरस्कारं एवञ्च बहुविधं सर्वश्रेष्ठ रूपेण सम्बोधनं कृतमस्ति तथा तस्याः भगिनी अलकामी (दौर्भाग्यम्) अपिइनी कृतमस्ति, या आवश्यकता, बुभुक्षा, पिपासा, निर्धनतया सम्बन्धितमस्ति। जापकं उर्वरतया सः योजयति एवं तस्याः मृत्रिकायाः मातुः रूपेण वर्णनं कृतम्। यत् शीतलता, सुगन्धि माध्यमेन बोधगम्ये गोमये निवासं करोति तथा च प्रचुरमात्रायां अन्नं उत्पादयति।

श्री (लक्ष्मी) अस्माकं श्रन्तः ब्रह्माण्डे च आध्यात्मिक ऊर्जायारपि समावेशोऽस्ति। यस्य कुण्डलिनी कथ्यते। केवलं श्रीसूक्त गानेन अथवा अस्य श्रुता माता लक्ष्मीः बहुविधं धनं, स्वास्थ्य, भाग्यं, शान्तिश्च आनपेयुः।

आशुः शिशानो वृषभो न भीमो घनाघनः क्षोभणश्चर्षणीनाम्। सक्रंन्दनोऽनिमिष एकबीरः शत सेना अजयत्साकमिन्द्रः।।३३।।

(आशु।शिशिन। ववृषभ। न। भीम। घनाघन। क्षोभण। चर्षणीनाम्।। सक-कन्दनऽइतिसम् क्रन्दन। अनिमिषऽइत्त्यनि मिष। एकबीरऽइत्त्येक वीर। शतम्। सेना। अजयत्। साकम्। इन्द्र।।३३।।)

उ० आशु: शिशान: अनुवाक:। अप्रतिरथऋषि:। ऐन्द्रेऽप्रतिरथोऽपश्यत्। मर्माणि त इत्यन्त:। आदितो द्वादशैन्द्यस्त्रिष्टुभो ब्रह्मा दक्षिणतो जपति। आशु: शीघ्र:। शिशान:। 'शो तनूकरणे'। शिशानो वज्रम्। वृषभो न भीम: वृषभ इव भीम: भीमो बिभ्यत्यस्मादित। घनाघन: हनहनेत्येव वक्ता। यद्वा घनशरीर:। क्षोभणश्चर्षणीनाम् संचालक: चर्षणीनां मनुष्याणाम्। संक्रन्दन: समाह्वाता संग्रमकारिणाम्। आहूय चानिमिष: अग्रमादी। यद्वा अनिमिषो देव:। एकवीर: एक एवासहायो विक्रान्त:। य ईदृग्गुणविशिष्ट: स: स तं बह्व्य: सेना: अजयत् जयति। साकं सहैव। इन्द्र:।।३३।।

म० 'आहवनीये प्रणीयमानेऽप्रतिरथस्य द्वादश ब्रुवन्नग्नौ सर्वत्रैके' (का० ११।१।९।१०)। अग्नौ चयने इध्ममादीप्याहवनीये चित्यां प्रति नीयमाने ब्रह्माप्रति-रथसूक्तस्य द्वादश ऋचो जपन् दक्षिणतोऽनुगच्छतीति सूत्रार्थ:। अप्रतिरथदृष्टा इन्द्रदेवत्या द्वादश त्रिष्टुभ:। इन्द्र: शतं सेना: शतसंख्याका: शत्रुसेना: साकं सहैव एकप्रयत्नेनैवाजयत् जयति। कीदृश: इन्द्र:। आशु: अश्नुते व्याप्नोति आशु: शीघ्रगामी उण्प्रत्यय:। शिशान: 'शो तनूकरणे' 'बहुलं छन्दसि'(पा० २।४।७६) इति जुहोत्यादित्वाच्छानचि द्वित्वम्। श्यति वज्रं तीक्ष्णीकरोति शिशान:। वृषभो न वृषभ इव भीम: भयंकर:। घनाघन: शत्रूणामतिशयेन घातक: हन हनेति वक्ता वा वृष्टिकर्तृमेघरूपो वा। 'वर्षुकाब्दो घनाघ्-ान:'इत्यभिधानात्। चर्षणीनां मनुष्याणां क्षोभण: क्षोभयतीति क्षोभण: क्षोभहेतु: चालक:। संक्रन्दन: सम्यक् क्रन्दनं परभयहेतुर्ध्वनिर्यस्य। यद्वा समाह्वाता शत्रूणाम्। अनिमिषि: नास्ति निमेषो यस्य स: देवत्वात्। यद्वा कदाचिदपि निमेषं न करोति। अत्यन्तसावधान इत्यर्थ:। एकवीर: एकश्चासौ वीरश्च अन्यनिरपेक्षं शत्रूनेक एव जेतुं समर्थ:।।३३।।

संकन्दनेनाऽनिमिषेण जिष्णुना युत्कारेण दुश्चयवनेन धृष्णुना। तदिन्द्रेण जयत तत्सहध्वं युधो नर इषुहस्तेन वृष्णा।।३४।।

(सङकन्दनेनेतिसम् क्रन्दनेन। अनिमिषेणेत्त्यनि मिषेण। जिष्ण्णुना। युत्त्कारेणेतियुत् कारेण। दुश्च्च्यवनेनेतिदु च्यवनेन। धृष्ण्णुना।। तत्। इन्द्रेण। जयत। तत्। सहद्धम्। युध। नर। इषुहस्त्तेनेतीषु हस्त्तेन। ववृष्ण्णा।।३४।।)

उ० संक्रन्दनेन शब्दकारिणा अनिमिषेण एकचित्तेन अप्रमाद्यता वा। जिष्णुना जयनशीलेन। युत्कारेण 'युध संप्रहारे' अस्य किकपि युत्। संप्रहारकारिणा दुश्च्यवनेन अप्रच्याव्येन अप्रच्युतस्वभावेन वा। धृष्णुना प्रसहनशीलेन। तदिन्द्रेण जयत। ईदृग्गु-

णविशिष्टेनेन्द्रेण तज्जयत। दुर्जयमिति शेषः। तच्च सहध्वम् तच्चाभिभवत। हे युधः, 'युध संप्रहारे' इत्यस्यैत्किकपि बहुवचनम्। हे योद्धारः। 'पादादावभिमन्त्रितस्य च' इत्यादिरुदात्तः। हे नरः मनुष्याः, इषुहस्तेनेन्द्रेण। वृष्णा सेक्त्रा वर्षणशीलेन वा।।३४।।

म० युध्यन्ते ते युधः किकप् पादादावामन्त्रि तस्येति आद्युदात्तः। हे युधो नरो योद्धारो मनुष्याः, इन्द्रेण कृत्वा यूयं तत् परबलं जयत वशीकुरुत। वशीकृत्य च तत् सहध्वम् अभिभवत। विनाशयतेत्यर्थः। कीदृशेनेन्द्रेण। संक्रन्दनेन शब्दकारिणा। अनिमिषेण एकचित्तेन। जिष्णुना जयनशीलेन। युत्कारेण युधं करोतीति युत्कारस्तेन। कर्मण्यण् युद्धकारिणा। दुश्चयवनेन दुःखेन च्यावयितुं शक्यः दुश्च्यवनस्तेन अजय्येन धृष्णुना प्रगल्भेन भीतिरहितेन इषुहस्तेन इषवो हस्ते यस्य तेन वारुणाद्यायुधोपेतेन। वृष्णा वर्षतीति वृषा तेन कामानां वर्षुकेण।।३४।।

स इषुहस्तैः स निषङ्गिभिर्वशी सस्त्रष्टा स युध इन्द्रो गणेन। स सृष्टजित्सोमपा बाहुशर्ध्युग्रधन्वा प्रतिहिताभिरस्ता।।३५।।

(स। इषुहस्तैरितीषु हस्तै। स। निषङ्गिभिरितिनिषङ्गि भि। वशी। सस्त्रष्टेति-सम् स्त्रष्टा। स। युध। इन्द्र। गणेन।। ससृष्टजिदितिससृष्ट जित्। सोमपाऽइतिसोम पा। बाहुशर्द्धीतिबाहु शर्द्धी। उग्रधन्वेत्तयुग्र धन्वा। प्रतिहिताभिरितिप्रति हिताभिं। अस्ता।।३५।।)

उ० स इषुहस्तैः स इन्द्रः इषुहस्तैः योद्धृभिः संसृजति स इषुहस्तानेव योऽद्धन्। स निषङ्गिभिः। स एवेन्द्रो निषङ्गिभिः खङ्गिभिः संसृजति निषङ्गिण एव योऽद्धन् स्वान्। किंच। वशी कान्तः सर्वजनप्रियो वा स्वतन्त्रो वा निगृहीतादिषडवर्गो वा ईश्वरो वा। सएवेन्द्रे युधः योद्धन्स्वान् शत्रुगणेन संसृष्टा। किंच संसृष्टजित् संसृष्टाञ्जयति शत्रून्। सोमपाश्च बाहुशर्धी च बाहुबलः संयोगिबलनिरपेक्षः। शर्घ इति बलनाम। उग्रधन्वा उद्यतध-ानुः। प्रतिहिताभिरस्ता। शत्रुशरीरेषु प्रतिनिहिताभिरिषुभिः इन्द्रः अस्ता क्षेप्तेत्यनुमीयते। लघुसंप्रधानो लक्षपाती चेत्यभिप्रायः।।३५।।

म० स इन्द्रोऽस्मानवत्विति शेषः। संस्त्रष्टा 'ण्वुल्तृचौ—' (पा० ३।१।१३३) इति तृच्प्रत्ययः। युद्धाय संसर्गकर्ता। वशी वशयति रिपूनिति वशी। यद्वा कान्तः जनप्रियः स्वतन्त्रो वा निगृहीतारिषडवर्गो वा ईश्वरो वा। गणेन रिपुसमूहेनापि सह युधः युध्यतेऽसौ युधः युद्धकर्ता 'इगुपधज्ञा' (पा० ३।१।१३५) इति कप्रत्ययः। संसृष्टजित् संसृष्टान् युद्धाय सङ्गतान् रिपून् जयति संसृष्टजित्। सोमपाः सोमं पिबतीति यजमानानां यागेषु

सोमपानकर्ता। बाहुशर्धी बाह्वो: शर्धो बलमस्यास्तीति बाहुशर्धी बाहुबलोपेत:। संयोा-गनिरपेक्ष इत्यर्थ:। शर्ध इति बलनाम। उग्रधन्वा उग्रमुत्कृष्टं धनुर्यस्य स:। 'धनुषश्च' (पा० ५।४।१३१) इत्यनङादेश:। प्रतिहिताभिरस्ता स्वेन धनुष प्रेरिताभिरिषुभिरस्ता क्षेप्ता 'असु क्षेपणे' तृन् आद्युदात्तत्वात् अस्यतीत्येवंशील: रिपुनाशयितेत्यर्थ:। सशब्दावृत्ति: पादपूरणार्था।।३५।।

बृहस्पते परिदीया रथेन रक्षोहमित्राँअपबाधमान:। प्रभञ्जन्सेना: प्रमृणो युधा जयन्न-स्माकमेध्यविता रथानाम्।।३६।।

(बृहस्पते। परि। दीय। रथेन। रक्षोहेतिरक्ष हा। अमित्तान्। अपबाधमानऽइत्त्यप बाधमान।। प्रभञ्जन्निति प्र भञ्जन्। सेना। प्रमृणऽइतिप्र मृण। युधा। जयन्। अस्म्माकम्। एधि। अविता। रथानाम्।।३६।।)

उ० बृहस्पते। हे बृहस्पते, परिदीया। दीयतिर्गतिकर्मा। परियाहि रथेन। रक्षोहा रक्षसां हन्ता। अमित्रान् शत्रून्। अपबाधमान:। किंच प्रभञ्जन्प्रमर्दयन् सेना:। प्रमृणो युधा जयन्। मृणातिर्हिंसार्थ:। तस्य किकपि द्वितीयाबहुवचनम्। प्रमृण: हिंसकान् युधा युद्धेन जयन् अस्माकम् एधि भव। अविता गोप्ता रथानाम्। बृहस्पतिरपीन्द्रस्य पुरोहित इतीन्द्रसंबन्धेनैव स्तूयते।।३६।।

म० बृहस्पतिरिन्द्र: वाग्वै बृहती तस्या एष पति: व्याकरणकर्तृत्वादिन्द्रस्य वा-क्पतित्वमिन्द्रस्य पुरोहितत्वेन वा बृहस्पतिरेव स्तूयते। हे बृहस्पते, त्वं रथेन परिदीय सर्वतो गच्छ। दीयतिर्गत्यर्थ:। गत्वा चास्माकं रथानामस्मदीयस्यन्दनानामविता रथक एधि भव। कीदृशस्त्वम्। रक्षोहा रक्षांसि हन्तीति रक्षोहा किकप् रक्षसां हन्ता। अमित्रान शत्रूनपबाधमान: पीडयन्। सेना: परकीया: प्रभञ्जन् प्रकर्षेण भग्ना: कुर्वन्। युधा युद्धेन प्रमृणो जयन्। मृणतिर्हिंसाकर्मा। तस्य किकपि द्वितीयाबहुवचनम्। प्रमृणो हिंसकान् जयन् पराभवन्।।३६।।

बलविज्ञाय: स्थविर: प्रवीर: सहस्वान्वाजी सहमान उग्र:। अभिवीरो अभिसत्त्वा सहोजा जैत्रमिन्द्र रथमातिष्ठ गोवित्।।३७।।

(बलविज्ज्ञायऽइतिबल विज्ज्ञाय।स्थविर। प्रवीरऽइतिप्र वीर। सहस्वान्। वाजी। सहमान। उग्ग्र।। अभिवीरऽइत्त्यभि वीर। अभिसत्त्वेत्त्यभि सत्त्वा। सहोजाऽइतिसह जा। जैर्त्तम्। इन्द्र। रथम्। आ। तिष्ट्ठ। गोविदितिगो विवत्।।३७।।)

उ० बलविज्ञाय:। यस्त्वं बलमाविष्कुर्वन्विज्ञायसे अयमिन्द्र इति। स्थविरश्च सर्वानुशासक: सर्वमान्यो वा चिरन्तनो वा। प्रवीरश्च अभिवीर: वीरं वीरमभि अभिवरी:। अभि सत्त्वा च सत्त्वं सत्त्वमभि अभिसत्त्वा। सहोजाश्च। सह इति बलनाम। बलात् जात:। नह्मन्यस्माज्जत इत्थंबल: स्यात्। स त्वं जैत्रं जेतारं हे इन्द्र, रथम् आतिष्ठ। गोवित् सन् स्तुतिवित्सन्। गोशब्दो वाग्वचन:।।३७।।

म० हे इन्द्र, त्वं जैत्रं जयनशीलं रथमातिष्ठ आरोह। कीदृशस्त्वम्। बलविज्ञाय: बलं परकीयं विशेषेण जानाति बलविज्ञाय: कर्मण्यण् 'आतो युक् चिण्कृतो:' (पा० ७।३।३३) यद्वा बलेन कृत्वा विज्ञायते करणे घञ्। स्थविर: पुरातन: सर्वानुशासक:। प्रवीर: प्रकृष्टो वीर: शूर:। सहस्वान् सहो बलमस्यास्तीति सहस्वान्। वाजोऽस्यास्तीति वाजी अन्नवान्। सहमान: शत्रूनभिभवन्। उग्र: युद्धेषु क्रूर: अभिवीर: अभितो वीरा: शूरा: यस्य स:। अभिसत्वा। अभित: सत्वान: परिचारका: प्राणिनो यस्य सोऽभिस्त्वा। सहसो बलाज्जात: सहोजा:। न ह्यन्यस्माज्जात ईदृग्बल: स्यात्। गां स्तुतिगिरं वेत्ति गोवित्।।३७।।

गोत्रभिदं गोविदं वज्रबाहुं जयन्तमज्म प्रमृणन्तमोजसा। इम सजाता अनु वीरयध्वमिन्द्र सखायो अनु सरभध्वम्।।३८।।

(गोत्रभिदमितिगोत्र भिदम्। गोविदमितिगो विदम्। वज्ज्रबाहुमितिवज्ज्र बाहुम्। जयन्तम्। अज्ज्म। प्रमृणन्तमितिप्र मृणन्तम्। ओजसा।। इमम्। सजाताऽइतिस जाता। अनु। वीरयद्धम्।

इन्द्रम। सखाय। अनु। सम्। रभद्धम्।।३८।।)

उ० गोत्रभिदम्। असुरगोत्रं भिनत्तीति गोत्रभित्। यद्वा गोत्र इति मेधनामसु पठितम्। स हि गा: अप: त्रायते। तस्य गोत्रस्य मेघस्य भेत्तारं वृष्ट्यर्थम्। गोविदम् उपलब्धारम्। यद्वा वाग्विदं स्तुतिविदम् पण्डितं वा वज्रपाणिम् जयन्तम्। जयतेर्गत्यर्थस्य अज्म। अज्मेति संग्रामनाम। संग्रामं गच्छन्तम्। प्रमृणन्तम् ओजसा । मृणतिहिसाकर्मा। प्रमर्दयन्तं बलेन। इममिन्द्रम् हे सजाता: समानजन्मानो देवा:। अनुवीरयध्वम् वीरकर्मकुर्वाणमनुगम्य वीरकर्मणैव प्रोत्साहयत। हे सखाय: समानख्याना देवा:, अनुसरंभध्वम् अनुसंगम्य रभसं कुरुत।।३८।।

म० हे सजाता: समानं जातं जन्म येषां ते समानजन्मान: सखायो: देवा:, इममिन्द्रमनु

वीरयध्वम् 'शूर वीर विक्रान्तौ' अदन्तश्चरादि: लोट्। वीरकर्म कुर्वाणमनुगम्य वीरकर्मणा प्रोत्साहयत अनु संरभध्वम्। सरंम्भं वेगं कुर्वाणमनु संरम्भं कुरुत। कीदृशमिन्द्रम्। गोत्रभिंद गोत्रमसुरकुलं भिनत्ति गोत्रभित्तम्। यद्वा गा अप: त्रायते गोत्रो मेघ: तस्य भेत्तारम्। गोविदम् गां वाचं वेत्तीति गोवित् तम् पण्डितम्। वज्रबाहुं वज्रं बाहौ यस्य तम्। अज्म संग्रामं जयन्तम्। अज्मेति युद्धनाम। अजतेर्गत्यर्थस्य। ओजसा बलेन प्रमृणन्तं शत्रून्हिंसन्तम्। मृणतिहिसाकर्मा।।३८।।

अभि गोत्राणि सहसा गाहमानोऽदयो वीर: शतमन्युरिन्द्र:। दुश्च्यवन: पृतनाषाडयुध्योऽस्-माक सेना अवतु प्र युत्सु।।३९।।

(अभि। गोत्राण। सहसा। गाहमान। अदय। वीर। शतमन्र्युरितिशत मन्र्यु। इन्द्र।। दुश्च्यवनऽइतिदु च्यवन। पृतनाषाट। अयुद्ध्य। अस्म्माकम्। सेना। अवतु। प्र।

उ० अभिगोत्राणि अभिगाहमानो गोत्राणि असुरकुलानि मेधवृन्दानि वा। सहसा बलेन। अदयो निस्त्रिंश:। वीर: बिक्रान्त:। शतमन्यु: बहुक्रोध: इन्द्र:। दुश्च्यवन:' च्याव्य:। पृतनाषाट् पृतनां संग्रामं सहते अभिभवति। अयुध्य: अविद्यमानप्रतियोध:। य इत्थंभूत इन्द्र: सोऽस्माकं सेनाम् अवतु पालयतु। प्रयुत्सु युद्धेषु।।३९।।

म० इन्द्र: युत्यु युद्धेषु अस्माकं सेना: प्रावतु प्रकर्षेण रक्षतु 'छन्दसि परेऽपि' (पा० १।४।८१) इत्युपसर्गस्य क्रियापदात् परप्रयोग:। कीदृश इन्द्र:। गोत्राणि असुरकुलानि मेघवृन्दानि वा अभिगाहमान: सर्वतो विलोडयन्। अदय: दयारहित:। वीर: विक्रान्त:। शतमन्यु: शतमसंख्यो मन्यु: क्रोधो यस्थ शतयज्ञो वा। दुश्चयवन: अप्रच्याव्य:। पृतनां संग्रामं सहते अभिभवतीति पृतनाषाट्। अयुध्य: योद्धुमशक्य:। नास्ति युध्य: प्रतिया-धास्येतिवा।।३९।।

इन्द्र आसां नेता बृहस्पतिर्दक्षिणा यज्ञ: पुर एतु सोम:। देवसेनानामभिभञ्जतीनां जयन्तीनां मरुतो यन्त्वग्रम्।।४०।।

(इन्द्र। आसाम्। नेता। बृहस्प्पति। दक्विपणा। यज्ज्ज। पुर। एतु। सोम।। देवसे-नानामितिदेव सेनानाम्। अभिभञ्जतीनामित्त्यभि भञ्जतीनाम्। जयन्तीनाम्। मरुत। यन्तु। अग्ग्रम्।।४०।।)

उ० इन्द्र आसाम्। देवसेनानां व्यूहरचनात् इन्द्र आसां नेता भवतु। बृहस्पतिश्च। मन्त्री प्रधानानि हि कार्याणि करोति। दक्षिणायज्ञः दक्षिणतो यज्ञः एतु। पुर एतु सोमः पुरस्तादागच्छतु सोमः। यद्वा। दक्षिणापुरस्तात् एतु यज्ञश्च सोमश्च। केषामित्यत आह। देवसेनानाम् अभिभञ्जतीनाम्। 'भञ्जो आमर्दनेः जयन्तीनाम्। मरुतः गणभूताः यन्तु अग्रम् निरुध्य।।४०।।

म० इन्द्रः बृहस्पतिश्च आसां देवसेनानां नेता प्रणेता भत्विति शेषः। यज्ञः यज्ञपुरुषो विष्णुर्दक्षिणा दक्षिणत एतु गच्छतु। दक्षिणादाच्प्रत्ययः। सोमः परोऽग्रे एतु। मरुतो गणदेवा अग्रं सेनाग्रभागं यन्तु गच्छन्तु। कीदृशीनां देवसेनानाम्। अभिभञ्जतीनां 'भञ्जो आमर्दनेः शत्रून्मर्दयन्तीनाम्। तथा जयन्तीनां विजयमानानाम्।।४०।।

इन्द्रस्य वृष्णो वरुणस्य राज्ञ आदित्यानां मरुता शर्ध उग्रम। महामनसां भुवनच्यवानां घोषो देवानां जयतामुदस्थात्।।४१।।

(इन्द्रस्य। वृष्णण। वरुणस्य। राज्ञ। आदित्यानाम्। मरुताम्। शर्द्ध। उग्रम्।। महामनसमामितिमहा मनसाम्। भुवनच्च्यवानामितिभुवन च्यवानाम्। घोष। देवानाम्। जयताम्। उत्। अस्त्थात्।।४१।।)

उ० इन्द्रस्य वृष्णः इन्द्रस्य वर्षितुः। वरुणस्य च राज्ञः। आदित्यानां मरुतां च शर्धः बलं हस्त्यश्वरथपदातिलक्षणम्। उग्रम् उद्गूर्णायुधम्। उदस्थादित्यनुषङ्गः। यदा चैतदुदस्थात् अथानन्तरमेव। महामनसाम् अकिलष्टमनसाम्। भुवनाच्यवानां भुवनच्यावनसमर्थानाम् घोषः शब्दः। देवानां जयताम् उदस्थात् उत्थितः जितं जितमिति।।४१।।

म० वृष्णाः कामवर्षितुरिन्द्रस्य राज्ञो वरुणस्यादित्यानां द्वादशानां मरुतां चैषां देवानामुग्रमुत्कृष्टं शर्धो बलं गजतुरगरथपत्त्यात्मकसैन्यं घोषो जितं जितमिति शब्दश्च उदस्थात् उत्थितः। जितं जितमिति वददिन्द्रादिसैन्यमुत्थितमित्यर्थः। कीदृशानां देवानाम्। महामनसां महन्मनो येषां ते महामनसस्तेषां युद्धे स्थिरचित्तानाम्। तथा भुवनच्यवानां भुवनं लोकं च्यावयन्ति ते भुवनच्यवास्तेषां भुवनच्यावनसमर्थानाम्। जयतां विजय-मानानाम्।।४१।।

उद्धर्षय मघवन्नायुधान्युत्सत्वनां मामकानां मनासि। उद्वत्रहन्वाजिनां वाजिनान्युद्रथानां जयतां यन्तु घोषाः।।४२।।

(उत्। हर्षय। मघवन्नितिमघ। वन्। आयुधानि। उत्। सत्त्वनाम्। मामकानाम्।

मनासि।। उत्। वर्त्तहन्निितिवृर्त्त हन्। वजिनाम्। वाजिनानि। उत्। रथानाम्। जयताम्। यन्तु। घोषा।।४ २ ।।)

उ० उद्धर्षय उद्रतहर्षान् कुरु। हे मघवन् आयुधानि। उत्सत्वनाम् उद्धर्षय च सत्वनाम् सत्त्वानां मनुष्याणाम्। मामकानां मदीयानां। मनांसि उद्धर्षय। हे वृत्रहन्, वाजिनामश्वानाम्। वाजिनानि वेजनवत्त्वानि। चञचलत्वं ह्यश्वस्य गुण:। उद्रथानां च जयतां यनतु घोषा:। उद्यन्तु च त्वत्प्रसादात् रथानां च जयतां मे घोषा: शबदा:।।४ २ ।।

म० हे मधवन् धनवन्निन्द्र, आयुधानि उद्धर्षय उभ्दूतहर्षाणि करु। मामकानां मदीयानां सत्वनां प्राणिनां मनांसि च उद्धर्षय हर्षयुक्तान् कुरु। हे वृत्रहन् वैरिघातिन् वाजिनामश्वानां वाजिनानि शीघ्रगमनानि उद्धर्षय उत्कृष्टानि करु। किंच जयतां विजयमानानां रथानां घोषा: शब्दा उद्यन्तु उद्रच्छन्तु रथा:। सशब्दा: प्रसरन्तु।।४ २ ।।

अस्माकमिन्द्र: समृतेषु ध्वजेष्वस्माकं या इषवस्ता जयन्तु। अस्माकं वीरा उत्तरे भवन्त्वस्माँ२ ।। उ देवा अवता हतेषु।।४ ३ ।।

(अस्म्माकम्। इन्द्र। समृतेष्ष्वितिसम् ऋतेषु। ध्वजेषु। अस्म्माकम्। या। इषव। ता। जयन्तु।। अस्म्माकम्। वीरा। उत्तरऽइत्त्युत् तरे। भवन्तु। अस्म्मान्। ऊँऽइत्त्यूँ। देवा। अवत। हतेषु।।४ ३ ।।)

उ० अस्माकमिन्द्र:। अस्माकं तावत् समृतेषु संगतेषु ध्वजेषु शत्रुबलध्वजलालीभूतेषु। इन्द्रे रक्षिता भवतु। इन्द्रप्रसादादेव अस्माकं या इषव: ता: जयन्तु। अस्माकं च वीरा उत्तरे विजयिनो भवन्तु। अस्मान् उ। विनिग्रहार्थीय उकार:। अस्मानेव हे देवा:, अवत रक्षत। हवेषु आह्वानेषु।।४ ३ ।।

म० ध्वजेषु समृतेषु 'ऋ गतौ' सङगतेषु शत्रुध्वजै: संयुक्तेषु सत्सु इन्द्र: अस्माकं रक्षिता भवत्विति शेष:। तदा नोऽस्माकं या इषवोऽस्मदीयै: प्रयुक्तास्ता जयन्तु परसैन्यानि वन्नतु। अस्माकं ये वीरा: शूरास्ते उत्तरे परकीयभटेभ्य उत्कृष्टा भवन्तु। उ अपिच हे देवा:, हवेषु अस्मान् यूयूमवत रक्षत 'अन्येषामपि दृश्यते' (पा० ६। ३। १ ३ ७)इति दीर्घ:।।४ ३ ।।

अमीषां चितं प्रतिलोभयन्ती गृहाणाङगन्यप्वे परेहि। अभि प्रेहि निर्दह हत्सु शोकै-

रन्धेनामित्रास्तमसा सचन्ताम्।।४४।।

(अमीषाम्। चित्तम्। प्रतिलोभयन्तीतिप्रति लोभयन्ती। गृहाण। अङगानि। अप्पवे। परा। इहि।। अभि। प्र। इहि। नि। दह। हृत्त्खितिहृत् सु। शोकै। अन्घेन। अमित्ता। तमसा। सचन्ताम्।।४४।।)

उ० अमीषां चित्तम् अप्वा देवता। साच पुनर्व्याधिवों भयं वा। यस्मादेतया विद्धो व्याप्तः अपचीयतेऽनया भक्ष्यमाणः तस्मादप्वा अपशब्दान्त्याकारलोपस्ततष्टाप् 'ऐन्द्योऽभिरूपा द्वादश भवन्ति' इति श्रुतिः। इयमपीन्द्रसेनासंबन्धिनी। अमीषाम् संबन्धिनां मनुष्याणाम् चित्तम् चित्तविति वचनव्यत्ययः। प्रतिलोभयन्ती। 'लुभ विमोहने'। विमोहयमाना। गृहाणामङगानि हे अप्वे, ततः परेहि परागच्छ पुनरन्यान् शत्रून्गृहीतुम् अतो भूयोभूयः करणेनैतानेव शत्रूनभिप्रेहि। निर्दह चैषां हृदयानि शोकैः। हृत्स्विति सप्तमीबहुवचनं द्वितीयाबहुवचनस्थाने। हृदयानि निर्दह शोकैः। यथा अन्धेन ध्वान्तलक्षणेन अमित्राः तमसा सचन्ताम् तमसा संसेव्यन्ताम्। द्वादशैन्द्यः समाप्ताः।।४४।।

म० अप्वा देवता सा व्याघिर्भयं वा यस्मादेतया विद्धोऽपचीयते तस्मादप्वा। अपपूर्वाद्वातेरन्तर्भूतण्यर्थात् 'अन्येभ्योऽपि दृश्यते' (पा० ३।२।१०१) इति डप्रत्ययः। अपशब्दान्त्याकारलोपश्डछान्दसः ततष्टाप्। अपवति अपगमयति सुखं प्राणांश्चेत्यप्ता। 'ऐन्द्योऽभिरूपा द्वादश भवन्ति' (९। २। ३। ६) इति श्रुतेरियमपीन्द्रसेनासंबन्धिनी। हे अप्वे, अमीषां शत्रूणां चित्तं चित्तानि प्रतिलोभयन्ती मोहयन्ती अङगानि शत्रुगात्राणि गृह्णाना ततः परेहि अङगान्यादाय परागच्छ। पुनरन्यान् रिपून् गृहीतुमभि शत्रुसङघं प्रेहि प्रगच्छ। तेषां हृत्सु हृदयानि शोकैर्धनपुत्रनाशादिनिमित्तैर्निर्दह विभक्तिव्यत्ययः। किंच अमित्राः शत्रवोऽन्धेन तमसा गाढान्धकारेण सचन्तां सङगच्छन्तां 'षच संबन्धे' लोट्। द्वादशैन्द्र्यः समाप्ताः।।४४।।

1.14 संदर्भ ग्रंथ

- वैदिक सूक्तावली, डॉ. रामदेव साहू, श्याम प्रकाशन, जयपुर, 2006.
- ऋक् सूक्तावलि – डॉ. विश्वनाथ शर्मा, अभिषेक प्रकाशन, जयपुर, 1195.
- वैदिक सूक्त मुक्तावली – डॉ. श्रीकृष्ण ेझा, अभिषेक प्रकाशन, 2005.